प्रेक्षिष्यन्ते पथिककवनिताः प्रत्ययादाश्वसत्यः ।
कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

७. संतप्तानामिति ।। हे पयोद । त्वं संतप्तानामातपेन वा प्रवासविरहेण वा संज्वरितानाम् ।। " संतापः संज्वरः समौ " इत्यमरः ।। शरणं पयोदानेनातपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि ।। "शरणं गृहरक्षित्रोः" इत्यमरः ।। तत्तस्मात्कारणाद्धनपतेः कुबेरस्य क्रोधेन विश्लेषितस्य प्रियया वियोजितस्य मे मम संदेशं वार्तां प्रियाया हर । प्रियां प्रति नयेत्यर्थः ।। संबन्धसामान्ये षष्ठी । संदेशहरणेनावयोः संतापं नुदेत्यर्थः ।। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्तकं तत्राह—गन्तव्येति ।। बहिर्भवं बाह्यम् ।। " बहिर्देवपञ्चजनेभ्यश्च " इति ञ्यः ।। बाह्य उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता ।। " हर्म्यादि धनिनां वासः " इत्यमरः ।। अनेन व्यावर्तकमुक्तम् ।। अलका नामालकेति प्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तव गन्तव्या । त्वया गन्तव्येत्यर्थः ।। " कृत्यानां कर्तरि वा " इति षष्ठी ।।

मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनमानुषङ्गिकं फलमित्याह—

८. त्वामिति ।। पवनपदवीमाकाशमारूढं त्वाम् । पन्थानं गच्छन्ति ते पथिकाः ।। " पथः ष्कन् " इति ष्कन्प्रत्ययः ।। तेषां वनिताः प्रोषित-

7. Thou art, O cloud, the shelter of the afflicted, convey, therefore, to my beloved a message from me separated (from her) by the anger of the god of wealth: thou shouldst repair to the abode of the lord of the *Yakshas*, *Alakâ* by name, having palaces illumined by the moonlight (issuing) from the head of *Siva* residing in the outer garden.

8. The women whose husbands are abroad, sustaining themselves by the hope (of their return), will with the ends of their curls lifted

7. M. धनपतेः क्रोध° for धनपतिक्रोध°.

8. P. W. B. C2. G2. K1. N. R. M. आश्वसन्त्यः for आश्वसत्यः ; P. अयमिव for अहमिव.

बाह्° उद्यान ह्°

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥९॥

भर्तृकाः ॥ प्रत्ययात्प्रियागमनविश्वासात् ॥ " प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु "इत्यमरः॥ आश्वसत्यो विश्वसिताः॥ श्वसिधातोः शत्रन्तात् " उगितश्च "इति ङीप् ॥ तथोद्गृहीतालकान्ता दृष्टिप्रसारार्थमुन्नमय्य धृतालकाग्राः सत्यो भक्षिप्रेक्षिष्यन्ते । अत्युत्कण्ठतया द्रक्ष्यन्तीत्यर्थः ॥ मदागमनेन पथिकाः कथमागमिष्यन्तीत्यत्राह—तथाहि । त्वयि संनद्धे व्यापृते सति विरहेण विधुरां विवशां जायां क उपेक्षेत ॥ न कोऽपीत्यर्थः ॥ अन्योऽपि मद्व्यतिरिक्तोऽपि यो जनोऽहमिव पराधीनवृत्तिः परायत्तजीवनको न स्यात् । स्वतन्त्रस्तु न कोऽप्युपेक्षेतेति भावः ॥ अत्रार्थान्तरन्यासोऽलंकारः ॥ तदुक्तम्— " कार्यकारणसामान्यविशेषाणां परस्परम् ॥ समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः " इति लक्षणात् ॥

निमित्तान्यपि ते शुभानि दृश्यंत इत्याह—

९. मन्दं मन्दमिति ॥ अनुकूलपवनो वायुस्त्वां मन्दं मन्दम् । अतिमन्दमित्यर्थः ॥ अत्र कथंचिद्वीप्सायामेव द्विरुक्तिर्निर्वाह्या । " प्रकारे गुणवचनस्य " इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुब्लुकि मन्दमन्दमिति स्यात् । तदेवाह वामनः—"मन्दं मन्दमित्यत्राप्रकारार्थे द्विर्भावः" इति ॥ यथा सदृशम् । भाविफलानुरूपमित्यर्थः ॥ " यथा सादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रमे " इति यादवः ॥ नुदति प्रेरयति । अयं सगन्धः सगर्वः । संबन्धीति केचित् ॥ " गन्धो गन्धक आमोदे लेशे संबन्धगर्वयोः " इत्युभयत्रापि विश्वः ॥ ते तव वामो वामभागस्थः ॥ " वामस्तु वक्रे रम्ये स्यात्सव्ये वामगतेऽपि च " इति

---

up, behold thee borne on the wind's path (i. e. the sky): when thou art stirring in the sky, what other man, whose life might not be dependent upon another (man) as mine is, would leave his wife (alone) distressed by separation.

9. A favourable breeze is driving thee very gently and auspiciously and this proud *Chataka* is warbling sweetly on thy left side; the female cranes too, arranged in wreathes in the sky in order to experience the happiness of gestation, are sure to wait upon thee (who art so) lovely to the sight.

---

9. K2. M. तोयगृध्नुः, W. G1. G2. K1. N. R. M. ते सगर्वः, M. ते सबन्धुः for ते सगन्धः ; W. M. गर्भाधानक्षमपरिचयं, M. गर्भाधानस्थिरपरिचयं for गर्भाधानक्षणपरिचयात्. ; R. नयनसुखदं, for नयनसुभगं. P. reads this stanza as 10th.

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥१५॥
त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

विश्वः ॥ अद्रेरद्रिकल्पस्य ॥ दिङ्नागाचार्यस्य शृङ्गं प्राधान्यम् ॥ " शृङ्गं प्राधान्यसान्वोश्च " इत्यमरः ॥ हरतीति हेतुना सिद्धैः सारस्वतसिद्धैर्महाकविभिरङ्गनाभिश्च दृष्टोत्साहः सन्खमुत्पतोच्चैर्भवेति स्वप्रबन्धमात्मानं वा प्रति कवेरुक्तिरिति ॥ " संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि । स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात् " इत्येतच्छ्लोकनिर्माणात्तस्य कवेर्निचुलसंज्ञेत्याहुः ॥

१५. रत्नेति ॥ रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयमाखण्डलस्येन्द्रस्यैतद्धनुःखण्डम् ॥ एतदिति हस्तेन निर्देशो विवक्षितः ॥ पुरस्तादग्रे वल्मीकाग्राद्वामलूरविवरात् ॥ " वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् " इत्यमरः ॥ प्रभवत्याविर्भवति । येन धनुःखण्डेन ते तव श्यामं वपुः । स्फुरितरुचिनोज्ज्वलकान्तिना बर्हेण पिच्छेन ॥ " पिच्छबर्हे नपुंसके " इत्यमरः ॥ गोपवेषस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुरिव । अतितरां कान्तिं शोभामापत्स्यते प्राप्स्यति ॥

१६. त्वयीति ॥ कृषेर्हलकर्मणः फलं सस्यं त्वयि ॥ अधिकरणविवक्षायां

15. Here rises in front from the mouth of an anthill, a piece of Indra's bow as fine-looking as an intermingling of the rays of jewels; whereby thy dark body will attain to a great splendour as that of *Vishnu* dressed as a cowherd does by means of a peacock's plumes . glittering lustre.

16. Being drunk in by the eyes, of the country dames, moist from

15. P. रत्नच्छायव्यतिकरः for रत्नच्छायाव्यतिकरः ; W. M. आलप्स्यते for आपत्स्यते.

16. C1. C2. K2. M. भ्रूविलासानभिज्ञैः for भ्रूविकारानभिज्ञैः. P. W. N. M. °सुरभिक्षेत्रं for °सुरभि क्षेत्रम्. K2. M. प्रवलय गतीं for व्रज लघुगतिः ; W. G1. N. M. किञ्चिदेव for भूय एव.

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥१७॥

सप्तमी ॥ आयत्तमधीनम् ॥ " अधीनो निघ्न आयत्तः " इत्यमरः ॥ इति हेतोः प्रीत्या स्निग्धैः। अकृत्रिमप्रेमार्द्रैरित्यर्थः। भ्रूविकाराणां भ्रूविलासानामनभिज्ञैः। पामरत्वादिति शेषः । जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन् । मालं मालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलम् ॥ "मालमुन्नतभूतलम्" इत्युत्पलमालायाम् ॥ सद्यस्तत्कालमेव सीरैर्हलैरुत्कषणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथारुह्य । तत्राभिवृष्येत्यर्थः ॥ " सुरभिर्घ्राणतर्पणः " इत्यमरः ॥ किंचित्पश्चाद् व्रज गच्छ ॥ लघुगतिस्तत्र निर्वृष्टत्वात्क्षिप्रगमनः सन् ॥ " लघु क्षिप्रमरं द्रुतम्" इत्यमरः ॥ भूयः पुनरप्युत्तरेणैवोत्तरमार्गेणैव व्रज ॥ तृतीयाविधाने "प्रकृत्यादिभ्य उपसंख्यानम् " इति तृतीया ॥ यथा कश्चिद्बहुवल्लभः पतिः कुत्रचित्क्षेत्रे कलत्रे गूढं विहृत्य ॥ " क्षेत्रं शरीरकेदारे सिद्धस्थानकलत्रयोः" इति विश्वः ॥ दाक्षिण्यभङ्गभयान्नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं संचरति तद्वदिति ध्वनिः ॥

१७. त्वामिति ॥ आम्राश्चूताः कूटेषु शिखरेषु यस्य स आम्रकूटो नाम सानुमान्पर्वतः ॥ " आम्रश्चूतो रसालोऽसौ" इति । " कूटोऽस्त्री शिखरं शृङ्गम्" इति चामरः ॥ आसारो धारावृष्टिः ॥ "धारासंपात आसारः " इत्यमरः ॥ तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तम् । कृतोपकारमित्यर्थः । अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यङ्मूर्ध्ना वक्ष्यति वोढा ॥ वहेर्लृट् ॥ तथाहि । क्षुद्रः कृपणोऽपि ॥ "क्षुद्रो दरिद्रे कृपणे नृशंसे "इति यादवः॥ संश्रयाय संश्रयणाय मित्रे सुहृदि ॥ " अथ मित्रं सखा सुहृत्" इत्यमरः ॥ प्राप्ते आगते सति । प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखो न भवति । यस्तथा तेन प्रकारेणोच्चैरुन्नतः स

---

affection and ignorant of the amorous sportings of the eye-brows because the fruit of husbandry depends upon thee, mount instantly to the elevated hilly spot called *Mala* so as to make it fragrant by reason of the upturning of the plough; and having gone a little westward proceed again in the northernly direction at a quick pace.

17. On its summit the mountain *Amrakuta* will well bear thee (who art) overcome by the fatigue of the journey and whose showers have allayed (its) forest conflagration; even a low man, out of regard to former favours done, turns not his back on a friend who comes (to him) for refuge, much less will one so exalted.

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१८॥
स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥

आम्रकूटः किं पुनर्विमुखो न भवतीति किमु वक्तव्यमित्यर्थः ॥ एतेन प्रथमावसथे सौख्यलाभात्ते कार्यसिद्धिरस्तीति सूचितम् । तदुक्तं निमित्तनिदाने— " प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि । शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवम्" इति ॥

१८. छन्नेति ॥ हे मेघ । परिणतैः परिपक्वैः फलैर्द्योतन्त इति तथोक्तैः । आषाढे वनचूताः फलन्ति पच्यन्ते च मेघवातेनेत्याशयः । काननाम्रैर्वनचूतैश्छन्नोपान्त आवृतपार्श्वोऽचल आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबन्धच्छाये । श्यामवर्ण इत्यर्थः ॥ " वेणी तु केशबन्धे जलस्रुतौ" इति यादवः ॥ त्वयि शिखरं शृङ्गमारूढे सति ॥ "यस्य च भावेन भावलक्षणम्" इति सप्तमी ॥ मध्ये श्यामः शेषे मध्यादन्यत्र विस्तारे परितः पाण्डुर्हरिणः ॥ "हरिणः पाण्डुरः पाण्डुः " इत्यमरः ॥ भुवः स्तन इव । अमरमिथुनानाम् । खेचराणामिति भावः । प्रेक्षणीयां दर्शनीयामवस्थां नूनं यास्यति । मिथुनग्रहणं कामिनामेव स्तनत्वेनोत्प्रेक्षा संभवतीति कृतम् । यथा परिश्रान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन्स्वपिति तद्वद्भवानपि भुवो नायिकायाः स्तन इति ध्वनिः॥

१९. स्थित्वेति ॥ हे मेघ । वने चरन्ति ते वनचराः ॥ " तत्पुरुषे कृ-

18. When thou, resembling an oiled plait of hair, hast mounted on its top, the mountain, with its sides covered with forest-mango-trees glittering with ripe fruit, wilt, like the earth's breast dark in the middle and white on the rest of its surface, surely attain to a condition worthy of being gazed at by the pairs of celestial beings.

19. After resting for a short time on that (mountain) having

18. M. मेघश्यामः for मध्ये श्यामः ;

19. P. तस्मिन्स्थित्वा for स्थित्वा तस्मिन. W. G1. G2. B. K1. M. तोयोत्सर्गाद्द्रुततर°, M. तोयोत्सर्गाल्लघुतर° for तोयोत्सर्गद्रुततर°. R. M. वन्ध्यपादे M. वन्ध्यपादे for विन्ध्यपादे.

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥२०॥

ति बहुलम् " इति बहुलग्रहणादलुङ्भवति ॥ तेषां वधूभिर्भुक्ताः कुञ्जा लतागृहा यत्र तस्मिन् ॥ " निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे " इत्यमरः ॥ तत्र ते नयनविनोदोऽस्तीत्यर्थः । तस्मिन्नाम्रकूटे । मुहूर्तमल्पकालम् । न तु चिरं स्वकार्यविरोधादिति भावः ॥ " मुहूर्तमल्पकाले स्याद्घटिकाद्वितयेऽपि च " इति शब्दार्णवे ॥ स्थित्वा विश्रम्य । तोयोत्सर्गेण " त्वामासार—" इत्युक्तवर्षेण द्रुततरगतिर्लाघवाद्धेतोरतिक्षिप्रगमनः सन् । तस्मादाम्रकूटात्परमनन्तरं तत्परं वर्त्म मार्गं तीर्णोऽतिक्रान्तः । उपलैः पाषाणैर्विषमे विन्ध्यस्याद्रेः पादे प्रत्यन्तपर्वते ॥ " पादाः प्रत्यन्तपर्वताः " इत्यमरः ॥ विशीर्णां समन्ततो विस्रमराम् ॥ एतेन कस्याश्चित्कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते ॥ रेवां नर्मदाम् ॥ " रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका " इत्यमरः ॥ गजस्याङ्गे शरीरे भक्तयो रचनाः । रेखा इति यावत् ॥ " भक्तिर्निषेवणे भागे रचनायाम् " इति शब्दार्णवे ॥ तासां छेदैर्भङ्गिभिर्भागैर्विरचितां भूतिं शृङ्गारमिव भसितामिव वा ॥ " भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि संपदि " इति विश्वः ॥ द्रक्ष्यसि । अयमपि महांस्ते नयनकौतुकलाभ इति भावः

२०. तस्या इति ॥ हे मेघ । वान्तवृष्टिरुद्गीर्णवर्षः सन् । कृतवमनश्च व्यज्यते । तिक्तैः सुगन्धिभिस्तिक्तरसवद्भिश्च ॥ " तिक्तो रसे सुगन्धौ च " इति विश्वः ॥ वनगजमदैर्वासितं सुरभितं भावितं च । हिमवद्विन्ध्यमलया गजानां प्रभवा इति विन्ध्यस्य गजप्रभवत्वादिति भावः । जम्बूकुञ्जैः प्रतिहतरयं प्रतिबद्धवे-

bowers enjoyed by foresters' wives, thou crossing over to the road next to it at a pace quickened by the discharge of water, wilt see the (river) *Narmada* spread out at the foot of the mountain *Vindhya* uneven on account of rocks, like a decoration on an elephant's body made by scattered marks of painted streaks.

20. With thy rain vomited (i. *e.* discharged), thou canst proceed after having sucked the water of the river which is scented with the fragrant ichor of wild elephants and the current of which is retarded by clusters of *Jambu* trees; the wind will not be able, O cloud, to shake thee (thus) full of substance; for every thing becomes light when empty, while fullness contributes to solidity.

20. R. M. तीक्ष्णैः for तिक्तैः; K2. M. जम्बूखण्ड° for जम्बूकुञ्ज°.

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

गम् । सुखपेयमित्यर्थः । अनेन लघुत्वं कषायभावना च व्यज्यते । तस्या रेवायास्तोयमादाय गच्छेर्व्रज । हे घन मेघ । अन्तः सारो बलं यस्य तं त्वामनिल आकाशवायुः । शरीरस्थश्च गम्यते । तुलयितुं न शक्ष्यति शक्तो न भविष्यति । तथाहि । रिक्तोऽन्तःसारशून्यः सर्वोपि लघुर्भवति । प्रकम्प्यो भवतीत्यर्थः । पूर्णता सारवत्ता गौरवायाप्रकम्प्यत्वाय भवतीत्यर्थः ॥ अयमत्र ध्वनिः । आदौ वमनशोधितस्य पुंसः पश्चाच्छ्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानाल्लब्धबलस्य वातप्रकोपो न स्यादिति । यथाह वाग्भटः— " कषायाश्चाहिमास्तस्य विशुद्धौ श्लेष्मणो हिताः । किमु तिक्तकषाया वा ये निसर्गात्कफापहाः ॥ कृतशुद्धेः क्रमात्पीतपेयादेः पथ्यभोजिनः । वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिनः " इति ॥

२१. नीपमिति ॥ सारङ्गा मतङ्गजाः कुरङ्गा वा ॥ " सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे " इति विश्वः ॥ अर्धरूढैरेकदेशोद्गतैः केसरैः किञ्जल्कैर्हरितं पालाशवर्णं कपिशं श्यामवर्णम् । श्यामारुणमिति यावत् ॥ " पालाशो हरितो हरित् " इति । "श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते" इति चामरः ॥ हरितं च तत्कपिशं च । " वर्णो वर्णेन " इति समासः ॥ नीपं स्थलकदम्बकुसुमम् ॥ " अथ स्थलकदम्बके । नीपः स्यात्पुलके " इति शब्दार्णवे ॥ दृष्ट्वा संप्रेक्ष्य । विदित्वेति यावत् । तथा कच्छेष्वनूपेष्वनुकच्छम् ॥ " अव्ययं विभक्ति—" इत्यादिना विभक्त्यर्थेऽव्ययीभावः ॥ " जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः " इत्यमरः ॥ आविर्भूताः प्रथमाः प्रथमोत्पन्ना मुकुला यासां ताः कन्दलीर्भूमिकदलीः ॥ " द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपि " इति शब्दार्णवे ॥ जग्ध्वा भक्षयित्वा ॥ "अदो जग्धिः—" इति जग्ध्यादेशः ॥ अरण्येष्वधिकसुरभिमतिघ्राणतर्पणम् ॥ " दग्धारण्येषु " इति पाठे " दग्धम् "

---

21. After seeing the *Kadamba* flower green and brown on account of its halfgrown filaments; after eating on every bank the plantain trees on which first buds have appeared; and after smelling the very fragrant odour of the ground in forests, the elephants (or antelopes) will indicate the path of thee, the sprinkler of waterdrops.

---

21. P. W. G1. G2. K1. K2. R. N. M.
दग्धारण्येषु for जग्ध्वारण्येषु. M. नवजलमुचः for जललवमुचः.

अम्भोबिन्दुग्रहणचतुरांश्चातकान्वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि ॥ २२ ॥
उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ॥ २३ ॥

इत्यधिकविशेषणम् ॥ अर्थवशात्कन्दलीश्च दृष्ट्वेत्यन्वयो द्रष्टव्यः ॥ उर्व्या भूमेर्गन्धमाघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्त्यनुमापयिष्यन्ति । यत्र यत्र वृष्टिकार्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमित्यनुमीयत इति भावः ॥

प्रक्षिप्तमपि व्याख्यायते—

२२. अम्भ इति ॥ अम्भोबिन्दूनां वर्षोदबिन्दूनां ग्रहणे । "सर्वसद्यापतितमम्बु न चातकस्य हितम्" इति शास्त्राद्भूस्पृष्टोदकस्य तेषां रोगहेतुत्वादन्तराल एव स्वीकारे । चतुरांश्चातकान्वीक्षमाणाः कौतुकात्पश्यन्तः श्रेणीभूता बद्धपङ्क्तीः ॥ अभूततद्भावे च्विः ॥ बलाका बकपङ्क्तीः परिगणनयैका द्वे तिस्र इति संख्यानेन निर्दिशन्तो हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये त्वद्गर्जितकाले सोत्कण्ठान्युत्कण्ठापूर्वकाणि प्रियसहचरीणां संभ्रमेणालिङ्गितान्यासाद्य । स्वयंग्रहणाश्लेषसुखमनुभूयेत्यर्थः । त्वां मानयिष्यन्ति । त्वन्निमित्तत्वात्सुखलाभस्येति भावः ।

२३ उत्पश्यामीति ॥ हे सखे मेघ । मत्प्रियार्थं यथा तथा द्रुतं क्षिप्रम् ॥

22. The *Siddhas*, marking the *Châtaka* birds expert in catching the drops of rainwater, and pointing out the female cranes arranged in rows by counting (them one by one), will think highly of thee after receiving at the time of thy thundering, eager and hurried embraces from their dear wives.

23. I foresee thy delay, O friend, on every mountain fragrant with *Kutaja* flowers, though (thou art) desirous of going speedily for my

22. W. G1. G2. K1. R. N. M. °ग्रहणरभसान् for °ग्रहणचतुरान्. W. C2. M. सोत्कंपानि for सोत्कण्ठानि. K1. M. संभ्रमालिंगनानि for संभ्रमालिंगितानि.

23. M. सनयनजलैः for सजलनयनैः ; K1. M. प्रत्युद्गातः for प्रत्युद्यातः

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २४ ॥

" लघु क्षिप्रमरं द्रुतम् " इत्यमरः ॥ यियासोर्यातुमिच्छोरपि ॥ यातेः सन्नन्तादुप्रत्ययः ॥ ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि ॥ " ककुभः कुटजेऽर्जुने " इति शब्दार्णवे ॥ पर्वते पर्वते प्रतिपर्वतम् ॥ वीप्सायां द्विरुक्तिः ॥ कालक्षेपं कालविलम्बम् ॥ "क्षेपो विलम्बे निन्दायाम्" इति विश्वः ॥ उत्पश्याम्युत्प्रेक्षे ॥ विलम्बहेतुं दर्शयन्नाशुगमनं प्रार्थयते—शुक्लेति ॥ सजलानि सानन्दबाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैर्मयूरैः ॥ " मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः " इति यादवः ॥ केकाः स्ववाणीः ॥ " केका वाणी मयूरस्य " इत्यमरः ॥ स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः । मयूरवाणीकृतातिथ्य इत्यर्थः । भवान्कथमपि यथाकथंचिदाशु गन्तुं व्यवस्येदुद्युञ्जीत ॥ प्रार्थने लिङ् । " शेषे प्रथमः " इति प्रथमपुरुषः । शेषश्चायं भवच्छब्दो युष्मदस्मच्छब्दव्यतिरेकात् ॥ " स्वागतीकृत्य केकाः " इत्यत्र केकास्वारोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात्परिणामालंकारः । तदुक्तमलंकारसर्वस्वे— " आरोप्यमाणस्यप्रकृतोपयोगित्वे परिणामः" इति ॥

२४. पाण्ड्विति ॥ हे मेघ । त्वय्यासन्ने संनिकृष्टे सति दशार्णा नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैर्विकसितैः ॥ " केतकीमुकुलाग्रेषु सूचिः स्यात् " इति शब्दार्णवे ॥ केतकैः केतकीकुसुमैः पाण्डुच्छाया हरिणवर्णा उपवनानां वृतयः कण्टकशाखावरणा येषु ते तथोक्ताः ॥ " प्राकारो वरणः सालः प्राचीरं प्रान्ततो वृतिः " इत्यमरः ॥ तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीडारम्भैः कुलायनिर्माणैः ॥ "कुलायो नीडमस्त्रियाम्" इत्यमरः ॥ चित्याया इमानि चैत्यानि रथ्यावृक्षाः ॥ "चैत्यमायतने बुद्धबिम्बे चोद्देशपादपे" इति विश्वः ॥ आकुलानि संकीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः । तथा

---

good: greeted by the peacocks with their eyes full of (joyful) tears, and their cries having been made (by them) into a welcome, thou must try somehow or other to move on rapidly.

24. Whilst thou art near, the country of *Dasârna* will become lovely by (having) *Jambu* forests dark-coloured with ripe fruit, will have the hedges of its groves white-coloured with *Ketaka* flowers open at

---

24. W. M. नीडारम्भे for नीडारम्भैः. W. K2. M. फलपरिणतिश्याम°, N. M. परिणतिफलश्याम° for परिणतफलश्याम°.

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
गर्जितं तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यत्त-
त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २५ ॥

परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैरन्ता रम्याः ॥ " मृताववसिते रम्ये समाप्तावन्त इष्यते " इति शब्दार्णवे ॥ तथा कतिपयेष्वेव दिनेषु स्थायिनो हंसा येषु ते तथोक्ता एवंविधाः संपत्स्यन्ते भविष्यन्ति ॥ " पोटायुवतिस्तोककतिपय— "इत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्त्यस्य शास्त्रस्य प्रायिकत्वात् ॥

२५. तेषामिति ॥ दिक्षु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्यास्ताम् ॥ " लक्षणं नाम्नि चिह्ने च " इति विश्वः ॥ तेषां दशार्णानां संबन्धिनीम् । धीयन्तेऽस्यामिति धानी ॥ " करणाधिकरणयोश्च " इति ल्युट् ॥ राज्ञां धानी राजधानी ॥ " कृद्योगा च षष्ठी समस्यते " इति वक्तव्यात्समासः ॥ तां प्रधाननगरीम् ॥ " प्रधाननगरी राज्ञां राजधानीति कथ्यते " इति शब्दार्णवे ॥ गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः ॥ " विलासी कामुकः कामी स्त्रीपरो रतिलम्पटः " इति शब्दार्णवे ॥ अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते । त्वयेति शेषः ॥ कर्मणि लुट् ॥ कुतः । यद्यस्मात्कारणात् तत् स्वादु मधुरम् । चला ऊर्मयो यस्य तच्चलोर्मि तरङ्गितं वेत्रवत्या नाम नद्याः पयः सभ्रूभङ्गं भ्रुकुटियुक्तम् । दशनपीडयेति भावः । मुखमिवाधरमिवेत्यर्थः । तीरोपान्ते तटप्रान्ते यत्स्तनितं गर्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि व्यपदिश्यते । " ऊर्ध्वमुच्चलितकण्ठनासिकं हुङ्कृतं स्तनितमल्पघोषवत् " इति लक्षणात् ॥ पास्यसि । पिबतेर्लृट् ॥ " कामिनामधरास्वादः सुरतादतिरिच्यते " इति भावः ॥

---

the apex, the sacred trees in its villages full of the nest-formations of domestic birds, (and) the swans staying there for some days.

25. On arriving at its capital, bearing the name *Vidiśá* renowned in all the quarters, thou wilt forthwith attain fully the object of being a lover, for thou wilt drink of the *Vetravati's* water sweet and having trembling waves, like a face having contracted eyebrows, in a manner pleasant by thy thundering on the edge of the bank.

---

25. P. फलमपि महत्, W. M. फलमतिमहत् for फलमविकलं. N. M. लब्ध्वा for लब्धा. P. M. स्वादु यत्र, W. B. K2. M. स्वादु युक्तं, C1. C2. M. स्वादु यस्मात् for स्वादु यत्तत्. P. चलोर्म्याः for चलोर्मि.

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २६ ॥

२६. नीचैरिति ॥ हे मेघ । तत्र विदिशासमीपे । विश्रामो विश्रमः खेदापनयः ॥ भावार्थे घञ्प्रत्ययः ॥ स एव हेतुः तस्य विश्रामहेतोः विश्रामकारणात् । विश्रामार्थमित्यर्थः ॥ "षष्ठी हेतुप्रयोगे" इति षष्ठी ॥ विश्रामेत्यत्र "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति पाणिनीये वृद्धिप्रतिषेधेऽपि "विश्रामो वा" इति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः ॥ प्रौढपुष्पैः प्रबुद्धकुसुमैः कदम्बैर्नीपवृक्षैस्त्वत्संपर्कात्तव सङ्गात् । पुलका अस्य जाताः पुलकितमिव संजातपुलकमिव स्थितम् ॥ तारकादित्वादितच्प्रत्ययः ॥ नीचैरित्याख्या यस्य तं नीचैराख्यं गिरिमधिवसेः । गिरौ वसेरित्यर्थः ॥ "उपान्वध्याङ्वसः" इति कर्मत्वम् ॥ यो नीचैर्गिरिः । पण्याः क्रेयाः पण्यस्त्रियो वेश्याः ॥ "वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनी" इति शब्दार्णवे ॥ तासां रतिषु यः परिमलो गन्धविशेषः ॥ "विमर्दोत्थे परिमलो गन्धे जनमनोहरे" इत्यमरः ॥ तमुद्गिरन्त्याविष्कुर्वन्तीति तथोक्तानि तैः । शिलावेश्मभिः कन्दरैर्नागराणां पौराणामुद्दामान्युत्कटानि यौवनानि प्रथयति प्रकटयति ॥ उत्कटयौवनाः कचिदनुरक्ता वाराङ्गना विश्रम्भविहाराकाङ्क्षिण्यो मात्रादिभयान्निशीथसमये कंचन विविक्तं देशमाश्रित्य रमन्ते । तच्चात्र बहुलमस्तीति प्रसिद्धिः ॥ अत्रोद्गारशब्दो गौणार्थत्वान्न जुगुप्सावहः । प्रत्युत काव्यस्यातिशोभाकर एव । तदुक्तं दण्डिना—"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते" इति ॥

---

26. There thou mayst, for repose, rest on a mountain called *Nichais* bristling, as it were, with *Kadamba* trees having full-blown flowers, at thy touch; which (mountain) bespeaks the ungoverned youth of the townsmen by means of its stony-houses emitting perfumes (used) in sports with harlots.

---

26. P. विश्रान्तिहेतोः for विश्रामहेतोः.

विश्रान्तः सन्व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम् ॥ २७ ॥

२७. विश्रान्त इति ॥ विश्रान्तः संस्तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् । अथ विश्रान्तेरनन्तरम् । वनेऽरण्ये या नद्यस्तासां तीरेषु जातानि स्वयंरूढानि । अकृत्रिमाणीत्यर्थः " नदनदी—" इति पाठे " पुमान्स्त्रिया " इत्येकशेषो दुर्वारः ॥ तेषामुद्यानानामारामाणां संबन्धीनि यूथिकाजालकानि मागधीकुसुममुकुलानि ॥ " अथ मागधी । गणिका यूथिका " इत्यमरः ॥ "कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि " इति हलायुधः ॥ नवजलकणैः सिञ्चन्नार्द्रीकुर्वन् ॥ अत्र सिञ्चतेरार्द्रीकरणार्थत्वाद्द्रवद्रव्यस्य करणत्वम् । यत्र तु क्षरणमर्थस्तत्र द्रवद्रव्यस्य कर्मत्वम् । यथा " रेतः सिक्त्वा कुमारीषु " । "मुखैर्निषिञ्चन्तमिवामृतं त्वचि " इत्येवमादि । एवं किरतीत्यादीनामपि " रजः किरति मारुतः " । " अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः " इत्यादिष्वर्थभेदाश्रयणेन रजोलाजादीनां कर्मत्वकरणत्वे गमयितव्ये ॥ तथा गण्डयोः कपोलयोः स्वेदस्यापनयनेन प्रमार्जनेन या रुजा पीडा ॥ भिदादित्वादङ्प्रत्ययः । तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां तथोक्तानाम् । पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पावचायिकाः स्त्रियः ॥ " कर्मण्यण् " । " टिड्ढाणञ्—" इत्यादिना ङीप् ॥ तासां मुखानि । छायाया अनातपस्य दानात् । कान्तिदानं च ध्वन्यते ॥ " छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः " इत्यमरः ॥ कामुकदर्शनात्कामिनीनां मुखविकाशो भवतीति भावः । क्षणपरिचितः क्षणं संसृष्टः सन् । न तु चिरम् । व्रज गच्छ ॥

27. Being (thus) refreshed proceed,—sprinkling with fresh water-drops the buds of the great-flowered jasmine sprung up (spontaneously) on the banks of the forest rivers, and by casting a shadow, coming into momentary contact with the faces of female flower-gatherers having their ear-lotuses withered by injury (caused) by the wiping of the sweat from their cheeks.

27. P. वननदीतीरजानां निषिञ्चन्, W. R. N. K2. M. नगनदीतीरजातानि सिञ्चन्, G1. G2. K1. M. नवनदीतीरजातानि सिञ्चन् for वननदीतीरजातानि सिञ्चन्. K1. N. M. गल्ल° for गण्ड°. M. °छायादानक्षण° for° छायादानात्क्षण°.

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ॥
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २८ ॥
वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २९ ॥

२८. वक्र इति ॥ उत्तराशामुदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्था उज्जयिनीमार्गो वक्रो यदपि । दूरो यद्यपीत्यर्थः ॥ विन्ध्यादुत्तरवाहिन्या निर्विन्ध्यायाः प्राग्भागे कियत्यपि दूरे स्थितोज्जयिनी । उत्तरपथस्तु निर्विन्ध्यायाः पश्चिम इति वक्रत्वम् ॥ तथाप्युज्जयिन्या विशालानगरस्य ॥ "विशालोज्जयिनी समा" इत्युत्पलः ॥ सौधानामुत्सङ्गेषूपरिभागेषु प्रणयः परिचयः ॥ "प्रणयः स्यात्परिचये याञ्चायां सौहृदेऽपि च" इति यादवः ॥ तस्य विमुखः पराङ्मुखो मा स्म भूः । न भवेरित्यर्थः ॥ "स्मोत्तरे लङ् च" इति चकारादाशीरर्थे लुङ् । "न माङ्योगे" इत्यडागमप्रतिषेधः ॥ तत्रोज्जयिन्यां विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यश्चकितैर्भीतैर्लोलापाङ्गैश्चञ्चलकटाक्षैः पौराङ्गनानां लोचनैर्न रमसे यदि तर्हि त्वं वञ्चितः प्रतारितोऽसि । जन्मवैफल्यं भवेदित्यर्थः ॥

संप्रत्युज्जयिनीं गच्छतस्तस्य मध्येमार्गं निर्विन्ध्यासंबन्धमाह—

२९. वीचीति ॥ हे सखे । पथ्युज्जयिनीपथे वीचिक्षोभेण तरङ्गचलनेन

---

28. Though the road is a circuitous one for thee who hast set forth on a journey to the North, yet do not be averse to forming an acquaintance with the roofs of the palaces of उज्जयिनी; if thou art not gratified by the eyes of the townswomen there, having tremulous outercorners frightened by the flashes of lightning-streaks, thou art (indeed) defrauded (of the object of thy life).

29. Meeting on thy way the river निर्विन्ध्या, which has for its

---

28. G2. K1. M. उत्तरस्यां, N. उत्तरायां for उत्तराशाम्. W. M. मा च भूः for मा स्मः भूः. W. K2. M. °स्फुरणचकितैः for स्फुरितचकितैः P. यत्र for तत्र P. वञ्चितः स्याः for वञ्चितोऽसि.

29. R. N. M. वीची° for वीचि°. M. °क्वणित° for °स्तनित°.

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः । falling
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३० ॥

स्तनितानां मुखराणाम् ॥ कर्तरि क्तः ॥ विहगानां हंसानां श्रेणिः पङ्क्तिरेव काञ्चीगुणो यस्यास्तस्याः स्खलितेनोपलस्खलनेन मदस्खलितेन च सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्या गच्छन्त्याश्च तथा दर्शिता प्रकटिता आवर्तोऽम्भसां भ्रम एव नाभिर्यया ॥ "स्यादावर्तोऽम्भसां भ्रमः" इत्यमरः॥ निष्क्रान्ता विन्ध्यान्निर्विन्ध्या नाम नदी ॥ "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति समासः । "द्विगुप्राप्तापन्नालम्–" इत्यादिना परवल्लिङ्गताप्रतिषेधः ॥ तस्या नद्याः संनिपत्य संगत्य । रसो जलमभ्यन्तरे यस्य सः । अन्यत्र रसेन शृङ्गारेणाभ्यन्तरोऽन्तरङ्गो भव । सर्वथा तस्या रसमनुभवेत्यर्थः ॥ "शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः । तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ ॥ आस्वादे च रसं प्राहुः" इति शब्दार्णवे ॥ ननु तत्प्रार्थनामन्तरेण कथं तत्रानुभवो युज्यत इत्यत आह––स्त्रीणामिति ॥ स्त्रीणां प्रियेषु विषये विभ्रमो विलास एवाद्यं प्रणयवचनं प्रार्थनावाक्यं हि ॥ स्त्रीणामेष स्वभावो यद्विलासैरेव रागप्रकाशनम् । न तु कण्ठत इति भावः ॥ विभ्रमश्चात्र नाभिसंदर्शनादिरुक्त एव ॥

निर्विन्ध्याया विरहावस्थां वर्णयंस्तन्निराकरणं प्रार्थयते—

३०. वेणीति ॥ अवेणी वेणीभूतं वेण्याकारं प्रतनु स्तोकं च सलिलं यस्याः

---

girdle-string, rows of birds noisy by the tumult of the waves, which glides onward in a manner charming on account of (its) stumbling (against rocks), and which displays its navel-like-eddies, partake of its waters; for amorous sports are women's first expression of desire to their lovers.

30. By thee alone, O amiable one, that measure can be adopted by which this river, — having its scanty water for a braid of hair, bearing

---

W. G2. K1. R. N. M. रसाभ्यन्तरं for रसाभ्यन्तरः N. M. प्रणयि वचनं for प्रणयवचनं.

30. P. W. G1. G2. K2. R. N. M. °सलिला तामतीतस्य, K1. M. B. °सलिला सात्वतीतस्य, M. °सलिला साप्यतीतस्य, M. °सलिलां तामतीतस्य for °सलिलासावतीतस्य. M. सिन्धुम् for सिन्धुः. W. K2. M. शीर्णपर्णैः, R. M. जीर्णपत्रैः for जीर्णपर्णैः. M. असुभग° for सुभग. K2. M. व्यञ्जयन्तीम् for व्यञ्जयन्ती.

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-
न्पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३१ ॥

सा तथोक्ता। अन्यत्र वेणीभूतकेशपाशेति च ध्वन्यते। रोहन्तीति रुहाः ॥ इगुपधलक्षणः कप्रत्ययः॥ तटयो रुहा ये तरवस्तेभ्यो भ्रश्यन्तीति तथोक्तैः। जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा । अत एव हे सुभग । विरहावस्थया पूर्वोक्तप्रकारया ॥ करणेन ॥ अतीतस्यैतावन्तं कालमतीत्य गतस्य । प्रोषितस्येत्यर्थः । ते तव सौभाग्यं सुभगत्वम् ॥ " हृद्भगसिन्ध्वन्ते पूर्वपदस्य च " इत्युभयपदवृद्धिः ॥ व्यञ्जयन्ती प्रकाशयन्ती । स खलु सुभगो यमङ्गनाः कामयन्त इति भावः । असौ पूर्वोक्ता सिन्धुर्नदी निर्विन्ध्या ॥ " स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे " इति वैजयन्ती ॥ येन विधिना व्यापारेण कार्श्यं त्यजति स विधिस्त्वयैवोपपाद्यः । कर्तव्य इत्यर्थः । स च विधिरेकत्र वृष्टिरन्यत्र संभोगस्तदभावनिबन्धनत्वात्कार्श्यस्येति भावः ॥ इयं पञ्चमी मदनावस्था । तदुक्तं रतिरहस्ये—" नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्छा मृतिरित्येताः स्मरदशा दशैव स्युः " इति ॥ " त्वामतीतस्य " इति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यानं तु सिन्धुर्नाम कश्चिन्नदः काश्मीरदेशेऽस्ति । नदी तु कुत्रापि नास्तीत्युपेक्ष्यमित्याचक्षते ॥

३१. प्राप्येति ॥ विदन्तीति विदाः॥ इगुपधलक्षणः कः॥ ओकसो वेश्मस्थानस्य विदाः कोविदाः॥ ओकारलोपः पृषोदरादित्वात्साधुः ॥ उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदास्तत्त्वज्ञा ग्रामेषु ये वृद्धास्ते सन्ति येषु तानवन्तींस्तन्नामजनपदान्प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां " सौधो-

---

a pale complexion on account of the withered leaves fallen from the trees growing on its banks and (thus) manifesting by its condition during separation the good fortune of thee who hast been away (so long) — casts off its draught (emaciation).

31. On reaching the country of the *Avantis*, having its old villagers well-versed in the legends of *Udayana*, proceed to the aforesaid city of *Ujjayini* great in wealth, another brilliant portion of

---

31. W. M. अवन्तीम् for अवन्तीन्. B. M. ज्ञानवृद्धान्, W M. ग्रामवृद्धाम् for ग्रामवृद्धान्. P. उपसर for अनुसर. K2. स्वचरित° for सुचरित°. P. K1. कृतमिव for हृतमिव.

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३२ ॥

न्सङ्गप्रणयविमुखो मा स्मभूरुज्जयिन्याः " इत्युक्तां श्रीविशालां संपत्तिमहतीम् । "शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते "इति शाश्वतः । विशालां पुरीमुज्जयिनीमनुसर व्रज ॥ कथमिव स्थिताम् । सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते । अत्यल्पावशिष्टे सतीत्यर्थः । गां भूमिं गतानाम् ॥ " गौरिला कुम्भिनी क्षमा" इत्यमरः ॥ पुनरपि भूलोकगतानामित्यर्थः । स्वर्गिणां स्वर्गवतां जनानां शेषैर्भुक्तशिष्टैः पुण्यैः सुकृतैर्हृतमानीतम् । स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यंभावादिति भावः । कान्तिरस्यास्तीति कान्तिमदुज्ज्वलम् । सारभूतमित्यर्थः । एकं भुक्तादन्यत् ॥ " एके मुख्यान्यकेवलाः " इत्यमरः ॥ दिवः स्वर्गस्य खण्डमिव स्थितामित्युत्प्रेक्षा । एतेनातिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते ॥

३२. दीर्घीकुर्वन्निति ॥ यत्र विशालायां प्रत्यूषेष्वहर्मुखेषु ॥ " प्रत्यूषोऽहर्मुखं कल्यम् " इत्यमरः ॥ पटु प्रस्फुटम् । मदकलं मदेनाव्यक्तमधुरम् ॥ " ध्वनौ तु मधुरास्फुटे । कलः " इत्यमरः ॥ सारसानां पक्षिविशेषाणाम् ॥ " सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः " इति यादवः ॥ यद्वा सारसानां हंसानाम् ॥ " चक्राङ्गः सारसो हंसः " इति शब्दार्णवे ॥ कूजितं रुतं दीर्घीकुर्वन् । संतानयन्नित्यर्थः । यावद्वातं शब्दानुवृत्तेरिति भावः । एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीडापक्षिकूजितमविच्छिन्नीकुर्वन्निति च गम्यते । स्फुटितानां विकसितानां कमलानामामोदिन परिमलेन सह या मैत्री

---

heaven, as it were, brought down by the remaining merits of those who had dwelt in heaven and come down (again) to the earth when the fruit of their virtuous deeds had diminished.

32. Where, at dawn, the breeze from the (river) *S'iprâ* prolonging the shrill cry of *Sârasa* birds sweet and indistinct through intoxication (of passion), sweet-scented by its contact with the fragrance of blown lotuses, (and) agreeable to the body, dissipates the languor of women (brought on) by enjoyment, like a lover who uses coaxing when soliciting enjoyment.

---

32. K1. R. N. M. पटुमदकलं for पटु मदकलं. M. स्फुरित॰ for स्फुटित॰. P. W. K1. K2. R. N. M. सिप्रावातः for शिप्रावातः.

हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गा-
न्संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥३३॥

संसर्गस्तेन कषायः सुरभिः ॥ " रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे " इति यादवः ॥ अन्यत्र विमर्दगन्धीत्यर्थः ॥ " विमर्दोत्थे परिमलो गन्धे जनमनोहरे । आमोदः सोऽतिनिर्हारी " इत्यमरः ॥ अङ्गानुकूलो मान्द्यात् गात्रसुखस्पर्शः । अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहन इत्यर्थः । भवभूतिना चोक्तम्—" अशिथिलपरिरम्भैर्दत्तसंवाहनानि " इति ॥ संवाह्यन्ते च सुरतश्रान्ताः प्रियैर्युवतयः । एतत्कविरेव वक्ष्यति—" संभोगान्ते मम समुचितो हस्तसंवाहनानाम् " इति ॥ शिप्रा नाम काचित्तत्रत्या नदी तस्या वातः शिप्रावातः ॥ शिप्राग्रहणं शैत्यद्योतनार्थम् ॥ प्रार्थना सुरतस्य याच्ञा तत्र चाटु करोतीति तथोक्तः । पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः ॥ कर्मण्यण्प्रत्ययः ॥ प्रियतमो वल्लभ इव स्त्रीणां सुरतग्लानिं संभोगखेदं हरति नुदति । चाटूक्तिभिर्विस्मृतपूर्वरतिखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः ॥ " प्रार्थनाचाटुकारः " इत्यत्र " खण्डितनायिकानुनीता " इति व्याख्याने सुरतग्लानिहरणं न संभवति । तस्याः पूर्वं सुरताभावात्पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपशमनार्थचाटुवचनसाध्यमित्युपेक्षैवोचिता विवेकिनाम् ॥ "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता " इति दशरूपके ॥

इतः परं प्रक्षिप्तमपि श्लोकत्रयं व्याख्यायते—

33. हारानिति ॥ यस्यां विशालायां कोटिशो विपणिषु पण्यवीथिकासु ॥ " विपणिः पण्यवीथिका " इत्यमरः ॥ रचितान्प्रसारितान् ॥ इदं विशेषणं यथालिङ्गं सर्वत्र संबध्यते ॥ ताराञ्छुद्धान् ॥ " तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके " इति विश्वः ॥ तरलगुटिकान्मध्यमणीभूतमहारत्नान् ॥ " तरलो

33. And where having seen in crores brilliant central gems, pearl-strings, conches and shells, (and) emeralds green as young grass and with the shoots of their rays jetting forth, and pieces of corals spread in market-places we imagine the oceans to have only water remaining to them.

33. P. तरलघटिकान्, G2. K1. R. M. तरलगुलिकान् for तरलगुटिकान्. M. शुक्तिशंखान् for शंखशुक्तीः. R. K1. M. यस्यां दृष्ट्वा, M. दृष्ट्वा यस्याः for दृष्ट्वा यस्यां. M. तोयमात्रा विशेषाः for तोयमात्रावशेषाः.

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून्रमयति जनो यत्र बन्धूनभिज्ञः ॥ ३४ ॥

हारमध्यगः"इत्यमरः ॥ " पिण्डे मणौ महारत्ने गुटिका बद्धपारदे " इति शब्दार्णवे । हारान्मुक्तावलीः । तथा कोटिशः शङ्खांश्च शुक्तीश्च मुक्तास्फोटांश्च ॥ " मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्कम्बुरस्त्रियौ " इत्यमरः ॥ शष्पं बालतृणं तद्वच्छ्यामान् ॥ " शष्पं बालतृणं घासो यवसं तृणमर्जुनम् " इत्यमरः ॥ उन्मयूखप्ररोहानुद्गतरम्याङ्कुरान्मरकतमणीन्गारुडरत्नानि । तथा विद्रुमाणां भङ्गान्प्रवालखण्डांश्च दृष्ट्वा सलिलनिधयः समुद्रास्तोयमात्रमवशेषो येषां ते तादृशाः संलक्ष्यन्ते । तथानुमीयन्त इत्यर्थः । रत्नाकरादप्यतिरिच्यते रत्नसंपद्भिरिति भावः ॥

३४. प्रद्योतस्येति ॥ अत्र प्रदेशे वत्सराजो वत्सदेशाधीश्वर उदयनः । प्रद्योतस्य नामोज्जयिनीनायकस्य राज्ञः प्रियदुहितरं वासवदत्तां जह्रे जहार । अत्र स्थले तस्यैव राज्ञः प्रद्योतस्य हैमं सौवर्णं तालद्रुमवनमभूत् । अत्र नलगिरिर्नामेन्द्रदत्तस्तदीयो गजो दर्पान्मदात्स्तम्भमालानमुत्पाट्योद्धृत्योद्भ्रान्त उत्पत्य भ्रमणं कृतवान् । इतीत्थंभूताभिः कथाभिरित्यर्थः । अभिज्ञः पूर्वोक्तकथाभिज्ञः कोविदो जन आगन्तून्देशान्तरादागतान् ॥ औणादिकस्तुन्प्रत्ययः ॥ बन्धून्यत्र विशालायां रमयति विनोदयति ॥ अत्र भाविकालंकारः । तदुक्तम्—" अतीतानागतं यत्र प्रत्यक्षत्वेन लक्ष्यते । अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतम् " इति ॥

---

34. And where the people versed (in legends) amuse their foreign brethren with stories like the following:—That here the king of the *Vatsas* (*Udayana*) carried away the darling daughter of *Pradyota*, that here the same king had a golden palm-grove; that here, forsooth, the elephant *Nalagiri* tearing out through fury the post (to which it was tied), roamed about in a wild manner.

---

34. G1. G2. K1. K2. R.N.M. नडागिरिः for नलगिरिः. G1. उन्मूल्य for उत्पाट्य. R. M. गमयति for रमयति.

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥ ३५ ॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ॥ ३६ ॥

३५. पत्रेति ॥ हे जलद । यत्र विशालायां वाहा हयाः पत्रश्यामाः पलाशवर्णा अत एव दिनकरहयस्पर्धिनो वर्णतो वेगतश्च सूर्याश्वकल्पास्तथा शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदान्मदस्रावाद्धेतोस्त्वमिव वृष्टिमन्तः । अग्रं नयन्तीत्यग्रण्यः ।। " सत्सूद्विष—" इत्यादिना क्विप् ॥ " अग्रग्रामाभ्यां नयतेः " इति वक्तव्याण्णत्वम् ।। योधानामग्रण्यो भटश्रेष्ठाः संयुगे युद्धे प्रतिदशमुखमभिरावणं तस्थिवांसः स्थितवन्तः । अत एव चन्द्रहासस्य रावणासेर्व्रणान्क्षतान्येवङ्काश्चिह्नानि तैः ॥ " चन्द्रहासो रावणासावसिमात्रेऽपि च क्वचित् " इति शाश्वतः ।। प्रत्यादिष्टाभरणरुचयः प्रतिषिद्धभूषणकान्तयः । शस्त्रप्रहारा एव वीराणां भूषणमिति भावः ।। अत्रापि भाविकालंकारः ॥

३६. जालोद्गीर्णैरिति ।। जालोद्गीर्णैर्गवाक्षमार्गनिर्गतैः।। " जालं गवाक्ष आ-

35. (And) where there are horses as green as the leaf (of a tree) and (therefore) rivalling with those of the sun, elephants as big as mountains and raining like thee by reason of the flowing ot ichor (from their temples), (and) best warriors who had on the battlefield held tneir own against the ten-faced (*Râvana*) and the lustre of whose ornaments has been obscured by the scars of wounds (caused) by *Chandrahâsa* (the sword of Râvana).

36. With thy body swollen by the incense (used) for perfuming the hair and escaping through the casements, with the presents (in the form) of dances given (to thee) by peacocks through fraternal

36. K1. R. N. M. °संस्कारधूमैः for °संस्कारधूपैः, G1. भुवन° for भवन°. P. नृत्तोपहारः, M. नृत्तोपचारः for नृत्योपहारः. P. W. G1. G2. K1. K2. R. N. M. अध्वखिन्नान्तरात्मा for अध्वखेदं नयेथाः P. G1. G2. K1. R. N. M. नीत्वा खेदं, K2. M. मुक्त्वा खेदं, W. M. त्यक्त्वा खेदं, M. रात्रिं नीत्वा for लक्ष्मीं पश्यन्.

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३७ ॥

नाये जालके कपटे गणे " इति यादवः ॥ केशसंस्कारधूपैः । वनिताकेशवासनार्थैर्गन्धद्रव्यधूपैरित्यर्थः ॥ अत्र संस्कारधूपयोस्तादर्थ्येऽपि यूपदार्वादिवत्प्रकृतिविकारत्वाभावादश्वघासादिवत्षष्ठीसमासो न चतुर्थीसमासः ॥ उपचितवपुः परिपुष्टशरीरः । तथा बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिर्गृहमयूरैर्दत्तो नृत्यमेवोपहार उपायनं यस्मै स तथोक्तः ॥ " उपायनमुपग्राह्यमुपहारस्तथोपदा " इत्यमरः ॥ कुसुमैः सुरभिषु सुगन्धिषु ॥ ललितवनिताः सुन्दरस्त्रियः ॥ " ललितं त्रिषु सुन्दरम् " इति शब्दार्णवे ॥ तासां पादरागेण लाक्षारसेनाङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेष्वस्या उज्जयिन्या लक्ष्मीं पश्यन्नध्वनाध्वगमनेन खेदं क्लेशं नयेथा अपनय ॥

३७. भर्तुरिति ॥ भर्तुः स्वामिनो नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्यासौ कण्ठच्छविरिति हेतोर्गणैः प्रमथैः॥ " गणस्तु गणनायां स्याद्गणेशे प्रमथे चये " इति शब्दार्णवे ॥ सादरं यथा तथा वीक्ष्यमाणः सन् । प्रियवस्तुसादृश्यादतिप्रियत्वं भवेदिति भावः । त्रयाणां भुवनानां समाहारास्त्रिभुवनम् ॥ " तद्धितार्थ—" इत्यादिना समासः ॥ तस्य गुरोस्त्रैलोक्यनाथस्य चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं याया गच्छ ॥ विध्यर्थे

---

affection, thou shouldst dispel the fatigue of the journey, seeing the beauty of their (city) in palaces scented with flowers and marked with the foot-prints of lovely women.

37. Being respectfully gazed at by the attendants (of *Siva*) as being possessed of the complexion of their master's throat, thou shouldst visit the holy abode of the husband of *Chandi*, lord of three worlds, having its gardens shaken by the *Gandhavati's* breezes bearing the fragrance of the lotus pollen and smelling of the materials (used) in baths by young women engaged in water-sports.

---

37. M. दृश्यमानः, M. वीक्षमाणः for वीक्ष्यमाणः. N. M. जायाः for यायाः. W. M. चण्डेश्वरस्य for चण्डीश्वरस्य. N. M. धौतोद्यानं for धूतोद्यानं. W. M. तोयक्रीडाविरत° for तोयक्रीडानिरत°.

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥३८॥

लिङ् ॥ श्रेयस्करत्वात्सर्वथा यातव्यामीति भावः ॥ उक्तं च स्कान्दे—"आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् । मर्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयात्" इति ॥ न केवलं मुक्तिस्थानमिदं किंतु विलासस्थानमपीत्याह—धूतेति ॥ कुवलयरजोगन्धिभिरुत्पलपरागगन्धवद्भिस्तोयक्रीडासु निरतानामासक्तानां युवतीनां स्नानं स्नानीयं चन्दनादि ॥ करणे ल्युट् ॥ "स्नानीयेऽभिषवे स्नानम्" इति यादवः॥ तेन तिक्तैः सुरभिभिः ॥ "कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्तिताः" इति हलायुधः॥ सौगन्ध्यातिशयार्थं विशेषणद्वयम् । गन्धवत्या नाम नद्यास्तत्रत्याया मरुद्भिर्मारुतैर्धूतोद्यानं कम्पिताक्रीडामिति धाम्नो विशेषणम् ॥

३८. अपीति ॥ हे जलधर । महाकालं नाम पूर्वोक्तं चण्डीश्वरस्थानमन्यस्मिन्संध्यातिरिक्तेऽपि काल आसाद्य प्राप्य ते तव स्थातव्यम् । त्वया स्थातव्यमित्यर्थः ॥ "कृत्यानां कर्तरि वा" इति षष्ठी ॥ यावद्यावता कालेन भानुः सूर्यो नयनविषयं दृष्टिपथमत्येत्यतिक्रामति । आ अस्तमयात् स्थातव्यमित्यर्थः ॥ यावदित्येतदवध्यर्थे । "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः ॥ किमर्थमत आह—कुर्वन्निति ॥ श्लाघनीयां प्रशस्यां शूलिनः शिवस्य संध्यायां बलिः पूजा तत्र पटहतां कुर्वन्संपादयन्नामन्द्राणामीषद्गम्भीराणां गर्जितानामविकलमखण्डं फलं लप्स्यसे प्राप्स्यसि ॥ लभेः कर्तरि लृट् ॥ महाकालनाथबलिपटहत्वेन विनियोगात्ते गर्जितसाफल्यं स्यादित्यर्थः ॥

---

38. Though arriving at *Mahâkâla* (the abode of *Siva*) at any other time (than the evening), thou shouldst stay (there), O cloud, until the sun passes beyond the range of sight; (since) performing the noble function of a drum at the evening worships of *Siva* thou wilt reap the full fruit of thy low thunderings.

---

38. W. G1. G2. K1. K2. R. N. M. अभ्येति for अत्येति; M. आमंत्राणां, M. आमद्राणाम् for आमन्द्राणाम्.

पादन्यासक्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ॥३९॥

३९. पादन्यासेति ॥ तत्र संध्याकाले पादन्यासैश्चरणनिक्षेपैर्नृत्याङ्गैः क्वणिताः शब्दायमाना रशना यासां तास्तथोक्ताः ॥ क्वणतेरकर्मकत्वात् " गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः ॥ लीलया विलासेनावधूतैः कम्पितै रत्नानां कङ्कणमणीनां छायया कान्त्या खचिता रूषिता वलयश्चामरदण्डा येषां तैः ॥ " वलिश्चामरदण्डे च जराविश्लथचर्मणि " इति विश्वः ॥ चामरैर्वालव्यजनैः क्लान्तहस्ताः ॥ एतेन दैशिकं नृत्यं सूचितम् । तदुक्तं नृत्यसर्वस्वे—"खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः । वीणां च धृत्वा यत्कुर्युर्नृत्यं तद्देशिकं भवेत्" इति ॥ वेश्या महाकालनाथमुपेत्य नृत्यन्त्यो गणिकास्त्वत्तो नखपदेषु नखक्षतेषु सुखान्सुखकरान् ॥ " सुखहेतौ सुखे सुखम् " इति शब्दार्णवे ॥ वर्षस्याग्रबिन्दून्प्रथमबिन्दून्प्राप्य त्वयि मधुकरश्रेणिदीर्घान्कटाक्षानपाङ्गानामोक्ष्यन्ते । " परैरुपकृताः सन्तः सद्यः प्रत्युपकुर्वते " इति भावः । कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यस इति ध्वनिः ॥

39. On receiving from thee the first drops of rain soothing to their nail-sores, the dancing-girls there who have their girdles jingling by the movements of their feet (in the dance) (and) their hands wearied by the *Chowries* waved playfully and possessed of handles inlaid with the lustre of gems, will shower on thee side-glances long as the rows of bees.

39. C1. C2. M. पादन्यासैः for पादन्यास°. P. W. G2. M. K1. R. N. M. °रसनाः for °रशनाः. M. °रचित° for °खचित°. °कान्त° for क्लान्त°. M. नखमणि° for नखपद°. W, आमोक्ष्यान्ति, N. M. अमोक्षन्ते for आमोक्ष्यन्ते.

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ४० ॥

४०. पश्चादिति ॥ पश्चात्संध्याबल्यनन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजपापुष्परक्तं प्रत्यग्रजपाकुसुमारुणं संध्यायां भवं सान्ध्यं तेजो दधानः । उच्चैरुन्नतं भुजा एव तरवस्तेषां वनं मण्डलेन मण्डलाकारेणाभिलीनोऽभिव्याप्तः सन् ॥ कर्तरि क्तः ॥ भवान्या भवपत्न्या ॥ "इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्" इति ङीष् । आनुगागमश्च ॥ शान्त उद्वेगो गजाजिनदर्शनभयं ययोस्ते अत एव स्तिमिते निश्चले नयने यस्मिन्कर्मणि तत्तथोक्तम् ॥ "उद्वेगस्त्वरिते क्लेशे भये मन्थरगामिनि" इति शब्दार्णवे ॥ भक्तिः पूज्येष्वनुरागः ॥ भावार्थे क्तिन्प्रत्ययः ॥ दृष्टं दृष्टा वा भक्तिर्यस्य स दृष्टभक्तिः सन् पशुपतेरार्द्रं शोणितार्द्रं यन्नागाजिनं गजचर्म ॥ "अजिनं चर्म कृत्तिः स्त्री" इत्यमरः ॥ तत्रेच्छां हर निवर्तय । त्वमेव तत्स्थाने भवेत्यर्थः । गजासुरमर्दनानन्तरं भगवान्महादेवस्तदीयमार्द्राजिनं भुजमण्डलेन बिभ्रत्ताण्डवं चकारेति प्रसिद्धिः ॥ दृष्टभक्तिरिति कथं रूपसिद्धिः । दृष्टशब्दस्य "स्त्रियाः पुंवद्—" इत्यादिना पुंवद्भावस्य दुर्घटत्वादपूरणीप्रियादिष्विति निषेधात् । भक्तिशब्दस्य प्रियादिषु पाठादिति । तदेतच्चोद्यम् । दृढभक्तिरिति शब्दमाश्रित्य प्रतिविहितं गणव्याख्याने दृढं भक्तिरस्येति नपुंसकं पूर्वपदम् । अदाढर्यनिवृत्तिपरत्वे दृढशब्दाल्लिङ्गविशेषस्यानुपकारित्वात्स्त्रीत्वमविवक्षितमिति ॥ भोजराजस्तु— "भक्तौ च कर्मसाधनायामित्यनेन सूत्रेण भज्यते सेव्यत इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति । भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवति" इत्याह । तदेतत्सर्वं सम्यग्विवेचितं रघुवंशसंजीविन्यां "दृढभक्तिरिति ज्येष्ठे" इत्यत्र । तस्माद्दृढभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम् ॥

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसंचारप्रकारमाह—

---

40. Afterwards when *Siva's* dance begins, resting in a circular form on the lofty forest of his tree-like arms and assuming a twilight spledour red as fresh *Japâ* flowers remove Siva's desire for the elephant's skin wet (with blood) whilst thy devotion is being witnessed by *Pârvati* with eyes steady (because) free from fear.

---

40. G1. G2. K1. R. N. M. विकसितजपा°, W. C1. C2. M. प्रतिनवजवा° for प्रतिनवजपा°. M. °पुष्परत्नं for °पुष्परक्तं. P. नृत्तारंभे for नृत्यारंभे. R. N. M. °भवान्याः for भवान्या.

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः ॥४१॥
तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४२ ॥

४१. गच्छन्तीनामिति ॥ तत्रोज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषिताम् । अभिसारिकाणामित्यर्थः । सूचिभिर्भेद्यैः । अतिसान्द्रैरित्यर्थः । तमोभी रुद्धालोके निरुद्धदृष्टिप्रसारे नरपतिपथे राजमार्गे कनकस्य निकषो निकष्यत इति व्युत्पत्त्या निकष उपलगतरेखा तस्येव स्निग्धं तेजो यस्यास्तया ॥ " स्निग्धं तु मसृणे सान्द्रे रम्ये क्लीबे च तेजसि " इति शब्दार्णवे ॥ सुदाम्नाद्रिणैकदिक्सौदामनी विद्युत् ॥ " तेनैकदिक् " इत्यण्प्रत्ययः ॥ तयोर्वीं मार्गं दर्शय । किं च तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्जिताभ्यां मुखरः शब्दायमानो मा स्म भूः । कुतः । ता योषितो विक्लवा भीरवः । ततो वृष्टिगर्जिते न कार्ये इत्यर्थः ॥ नात्र तोयोत्सर्गे स्तनितमिति विग्रहः । विशिष्टस्यैव केवलस्तनितस्याप्यनिष्टत्वात् । न च द्वन्द्वपक्षेऽल्पाच्तरपूर्वनिपातशास्त्रविरोधः । " लक्षणहेत्वोः क्रियायाः " इति सूत्र एव विपरीत निर्देशेन पूर्वनिपातशास्त्रस्यानित्यत्वज्ञापनादिति ॥

४२. तामिति ॥ चिरं विलसनात्स्फुरणात्खिन्नं विद्युदेव कलत्रं यस्य स भ-

---

41. Illumine with lightning having lustre resembling the streaks of gold (on a touch-stone), the ground for the women proceeding then by night to the abodes of their lovers along the high street where the sight is obstructed by darkness penetrable with a needle, (but) do not be noisy by thundering and discharging water, because they are timid.

42. Having passed that night on the terrace of some house, where

---

41. W. M. रात्रौ for नक्तम्. M. रुद्धालोकैः for रुद्धालोके W. G1. G2. K1. K2. R. M. सौदामिन्या for सौदामन्या. W. M. °छायया, G2. स्पर्धया for स्निग्धया. M. तोयोत्सर्गात् for तोयोत्सर्ग°. M. °विमुखः for मुखरः P. W. M. मा च भूः for मास्म भूः.

42. K1. N. M. भुवनवलभौ, W. N. M. भवनवडभौ for भवन॰ वलभौ. G2. K1. R. N. M. °पारापतायां for °पारावतायां.

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४३ ॥

वान्सुप्ताः पारावताः कलरवा यस्यां तस्याम् । विविक्तायामित्यर्थः ॥ "पारावतः कलरवः कपोतः" इत्यमरः ॥ जनसंचारस्तत्रासंभावित एवेति भावः । कस्यांचिद्भवनस्य वलभी । आच्छादने उपरिभाग इत्यर्थः ॥ "आच्छादनं स्याद्वलभी-गृहाणाम्" इति हलायुधः ॥ तां रात्रिं नीत्वा सूर्ये दृष्टे सति । उदिते सतीत्यर्थः । पुनरप्यध्वशेषं वाहयेव । तथाहि सुहृदां मित्राणामभ्युपेताङ्गीकृतार्थस्य प्रयोजनस्य कृत्या क्रिया येत्ते । अभ्युपेतसुहृदर्था इत्यर्थः ॥ सापेक्षत्वेऽपि गमकत्वात्समासः । "कृत्या क्रियादेवतयोः कार्ये स्त्रीकुपिते त्रिषु" इति यादवः ॥ "कृञः श च" इति चकारात्क्यप् ॥ न मन्दायन्ते खलु न मन्दा भवन्ति हि । न विलम्बन्त इत्यर्थः ॥ "लोहितादिडाज्भ्यः क्यष्" इति क्यष् । "वा क्यषः" इत्यात्मनेपदम् ॥

४३. तस्मिन्निति ॥ तस्मिन्काले पूर्वोक्ते सूर्योदयकाले प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम् ॥ "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति दशरूपके ॥ नयनसलिलं शान्तिं नेयं नेतव्यम् ॥ नयतिर्द्विकर्मकः ॥ अतो हेतोर्भानोर्वर्त्माशु शीघ्रं त्यज । तस्यावरको मा भूरित्यर्थः ॥ विपक्षेऽनिष्टमाचष्टे—सोऽपि भानुः । नलान्यम्बुजानि यस्याः सन्तीति नलिनी पद्मिनी ॥ "तृणेऽम्बुजे नलं ना तु राज्ञि नाले तु न स्त्रियाम्" इति शब्दार्णवे ॥ तस्याः स्वकान्तायाः कमलं स्वकुसुममेव वदनं तस्मात्प्रालेयं हिममेवास्रमश्रु हर्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः । नलिन्याश्च भर्तुर्भानोर्देशा-

pigeons roost with thy lightning-spouse fatigued by continual playing, thou shouldst go over the rest of thy journey when the sun rises; for those who have undertaken the accomplishment of any business for their friends, do not tarry.

43. The tears of women angry with their lovers have at that time to be wiped off; therefore quit the path of the sun quickly; for he also, having returned to remove the dew-tears from the lotus-face of the lotus plant, would be not a little incensed against thee obstructing his rays.

43. R. N. M. प्रालेयाश्रु, G2. W. K1. M. प्रालेयाश्रं for प्रालेयास्रं. M. कमलनयनात् for कमलवदनात्.

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४४ ॥

न्तरे नलिन्यन्तरगमनात्खण्डितात्वमित्याशयः । ततस्त्वयि । करानंशून्रुण-द्धीति कररुद् । क्विप् । तस्मिन्कररुधि सति । हस्तरोधिनी सतीति च गम्यते॥ " बलिहस्तांशवः कराः " इत्यमरः ॥ अनल्पाभ्यसूयोऽधिकविद्वेषः स्यात् । प्रायेणेच्छाविशेषविघाताद्वेषो रोषविशेषश्च कामिनां भवतीति भावः । किं च " ब्रह्माणं वार्कमीशानं विष्णुं वा द्वेष्टि यो जनः । श्रेयांसि तस्य नश्यन्ति रौरवं च भवेद्ध्रुवम्" इति निषेधात्कार्यहानिर्भविष्यतीति ध्वनिः ॥

४४ गम्भीराया इति ॥ गम्भीरा नाम सरित् ॥ उदात्तनायिका च ध्वन्यते ॥ तस्याः प्रसन्नेऽनुरक्तत्वाद्दोषरहिते चेतसीव प्रसन्नेऽतिनिर्मले पयसि । प्रकृत्या स्वभावेनैव सुभगः सुन्दरः ॥ " सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे । तुरीयांशे श्रीमति च सुभगः " इति शब्दार्णवे ॥ ते तव छाया चासावात्मा च सोऽपि प्रतिबिम्बशरीरं वा प्रवेशं लप्स्यते । अपिशब्दात् साक्षात्प्रवेशमनिच्छोरपीति भावः। तस्माच्छायाद्वारापि प्रवेशावश्यंभावित्वादस्या गम्भीरायाः । कुमुदवद्विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानामुद्वर्तनान्युल्लुण्ठनान्येव प्रेक्षितान्यवलोकनानि ॥ " त्रिषु स्याच्चटुलं शीघ्रम् " इति विश्वः ॥ एतावदेव गम्भीराया अनुरागलिङ्गम् । धैर्याद्धाष्टर्यात् । वैयात्यादिति यावत् । मोघीकर्तुं विफलीकर्तुं नार्हसि। नानुरक्ता विप्रलब्धव्येत्यर्थः ॥ धूर्तलक्षणं तु—"क्लिश्नाति नित्यं दयितामङ्कस्थामतिसुन्दरः । अन्यत्यरक्तां यत्नेन रक्तां धूर्तो विमुञ्चति" इति ॥

---

44. Yet thy self in the form of a shadow, naturally handsome, will enter the pellucid water of the *Gambhîrâ* (river) as into a pure heart; thou dost not, therefore, deserve by impudence on thy part, to disappoint its glances consisting of the rapid gambols of fish and as white as lotuses.

---

44. M. तस्मात्तस्याः for तस्मादस्याः . G2. K2. चपल° for चटुल°. W. M. °सफर° for °शफर°.

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ॥ ४५ ॥
त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४६ ॥

४५. तस्या इति ॥ हे सखे । प्राप्ता वानीरशाखा वेतसशाखा येन तत्तथोक्तमत एव किंचिदीषत्करधृतं हस्तावलम्बितमिव स्थितम् । मुक्तस्त्यक्तो रोधस्तटमेव नितम्बः कटिर्येन तत्तथोक्तम् ॥ " नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटौ" इति यादवः ॥ नीलं कृष्णवर्णं तस्या गम्भीरायाः सलिलमेव वसनं । नीलाम्बरधारणं विरहतापनिवारणमिति प्रसिद्धम् ॥ हृत्वापनीय लम्बमानस्य पीतसलिलभराल्लम्बमानस्य । अन्यत्र जघनारूढस्य । ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि ॥ कृच्छ्रत्वे हेतुमाह—ज्ञातेति ॥ ज्ञातास्वादोऽनुभूतरसः कः पुमान्विवृतं प्रकटीकृतं जघनं कटिस्तत्पूर्वभागो वा यस्यास्ताम् ॥ " जघनं स्यात्कटौ पूर्वश्रोणिभागापरांशयोः " इति यादवः ॥ विहातुं त्यक्तुं समर्थः । न कोऽपीत्यर्थः ॥

४६. त्वदिति ॥ त्वन्निष्यन्देन तव वृष्ट्योच्छ्वसिताया उपबृंहिताया वसु-

45. After taking away its dark garment in the form of water which, having left the loins in the form of the bank and clung to the branches of the reeds, is, as it were, slightly held up by the hand, thou, Oh friend, hanging down (on account of the weight of water drunk) wilt depart with great difficulty:—(for) who that has (once) experienced the pleasure is able to leave a woman with her hips uncovered?

46. A cool wind pleasant on account of contact with the smell of

45. M. नीत्वा for हृत्वा. K1. N. M. लब्धास्वादः for ज्ञातास्वादः. W. M पुलिनजघनां, G1. G2. K1. K2. N. M. विपुलजघनां, M. फुलितजघनां for विवृतजघनां.

46. W. M. G2. °निस्यंदो°, M. °निष्पन्दो°, K1. K2. R. N. M. °निस्पंदो° for °निष्यन्दो°. W. K2. M. °पुण्यः for °रम्यः . W. G2. K1. R. N. M. °श्रोतोरन्ध्र° for स्रोतोरन्ध्र°. P. °मधुरं for° सुभगं. P. M. वातः for वायुः. P. M. काननौदुम्बराणां, W. M. काननोदुम्बराणां, M. काननोदम्बराणां for काननोदुम्बराणाम्.

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४७ ॥

धाया भूमेर्गन्धस्य संपर्केण रम्यः । सुरभिरित्यर्थः ॥ स्रोतःशब्देनेन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते ॥ "स्रोतोऽम्बुवेगेन्द्रिययोः" इति विश्वः ॥ स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यद्ध्वनितं शब्दस्तेन सुभगं यथा तथा दन्तिभिर्गजैः पीयमानः । वसुधागन्धलोभादाघ्रायमाण इत्यर्थः । अनेन मान्द्यमुच्यते । काननेषु वनेषूदुम्बराणां जन्तुफलानाम् ॥ "उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः" इत्यमरः ॥ परिणमयिता परिपाचयिता ॥ "मितां ह्रस्वः" इति ह्रस्वः ॥ शीतो वायुः देवपूर्वं देवशब्दपूर्वं गिरिम् । देवगिरिमित्यर्थः । उपजिगमिषोरुपगन्तुमिच्छोः ॥ गमेः सन्नन्तादुप्रत्ययः ॥ ते तव नीचैः शनैर्वास्यति । त्वां वीजयिष्यतीत्यर्थः ॥ संबन्धमात्रविवक्षायां षष्ठी ॥ "देवपूर्वं गिरिम्" इत्यत्र देवपूर्वत्वं गिरिशब्दस्य । न तु संज्ञिनस्तदर्थस्येति । संज्ञायाः संज्ञित्वाभावादवाच्यवचनं दोषमाहुरालंकारिकाः । तदुक्तमेकावल्याम्— "यदवाच्यस्य वचनमवाच्यवचनं हि तत्" इति ॥ समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमनयोग्यो देवगिरिर्लक्ष्यत इति कथंचित्संपाद्यम् ॥

४७. तत्रेति ॥ तत्र देवगिरौ नियता वसतिर्यस्य तम् । नित्यसंनिहितमित्यर्थः ॥ पुरा किल तारकाख्यासुरविजयसंतुष्टः सुरप्रार्थनावशाद्भगवान्भवानीनन्दनः स्कन्दो नित्यमहमिह सह शिवाभ्यां वसामीत्युक्त्वा तत्र वसतीति प्रसिद्धिः ॥ स्कन्दं कुमारं स्वामिनम् । पुष्पाणां मेघः पुष्पमेघः । पुष्पमेघीकृतात्मा कामरूपत्वात्पुष्पवर्षुकमेघीकृतविग्रहः सन्व्योमगङ्गाजलार्द्रैः । पुष्पासारैः पुष्पसंपातैः ॥ "धारासंपात आसारः" इत्यमरः ॥ भवान्स्वयमेव स्नपयत्वभिषिञ्च-

---

the ground increased by thy showers, drunk in by eleph.nts in a manner pleasant on account of sounds in the apertures of their trunks, the ripener of the forest figs, will gently blow for thee, desirous of proceeding to *Devagiri*.

47. Turning thyself into a flower-cloud thou shouldst sprinkle *Skanda*, having a permanent residence there, with showers of blossoms moistened with the water of the Celestial Ganges:—For, that (*Skanda*) is the sun-excelling lustre placed by the bearer of the young moon (*Siva*) in the mouth of *Agni* (god of fire) for the protection of Indra's hosts.

---

47. M. वसूनां for चमूनां. G2. N. M. तद्वितेजः for तद्धि तेजः.

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ॥ ४८ ॥

तु । स्वयं पूजाया उत्तमत्वादिति भावः ॥ तथा च शंभुरहस्ये—" स्वयं यजाति चेद्देवमुत्तमा सोदरात्मजैः । मध्यमा या यजेद्भृत्यैरधमा याजनक्रिया " इति ॥ स्कन्दस्य पूज्यत्वसमर्थनेनार्थेनार्थान्तरं न्यस्यति—रक्षेति ॥ तद्भगवान् । स्कन्द इत्यर्थः ॥ विधेयप्राधान्यान्नपुंसकनिर्देशः ॥ वासवस्येमा वासव्यः ॥ " तस्येदम् " इत्यण् ॥ तासां वासवीनामैन्द्रीणां चमूनां सेनानां रक्षा एव हेतुः तस्य रक्षाहेतो रक्षया कारणेन । रक्षार्थमित्यर्थः ॥ " षष्ठी हेतुप्रयोगे " इति षष्ठी ॥ नवशशिभृता भगवता चन्द्रशेखरेण । वहतीति वहः ॥ पचाद्यच् ॥ हुतस्य वहो हुतवहो वह्निस्तस्य मुखे संभृतं संचितम् । आदित्यमतिक्रान्तमत्यादित्यम् ॥ " अत्यादयः क्रान्ताद्यर्थे द्वितियया " इति समासः ॥ तेजो हि साक्षाद्भगवतो हरस्यैव मूर्त्यन्तरमित्यर्थः । अतः पूज्यमिति भावः । मुखग्रहणं तु शुद्धत्वसूचनार्थम् । तदुक्तं शंभुरहस्ये—" गवां पश्चाद्द्विजस्याङ्घ्रिर्योगिनां हृत्कवेर्वचः । परं शुचितमं विद्यान्मुखं स्त्रीवह्निवाजिनाम् " इति ॥

४८. ज्योतिरिति ॥ ज्योतिषस्तेजसो लेखा राजयस्तासां वलयं मण्डलं यस्यास्तीति तथोक्तम् । गलितं भ्रष्टम् । न तु लील्यात्स्वयं छिन्नमिति भावः । यस्य मयूरस्य बर्हं पिच्छम् ॥ " पिच्छबर्हे नपुंसके " इत्यमरः ॥ भवानी गौरी । पुत्रप्रेम्णा पुत्रस्नेहेन कुवलयस्य दलं पत्रं तत्प्रापि तद्योगि यथा तथा कर्णे करोति । दलेन सह धारयतीत्यर्थः । यद्वा कुवलयस्य दलप्रापि दलभाजि दलार्हे कर्णे करोति ॥ क्विबन्तात्सप्तमी ॥ दलं परिहृत्य तत्स्थाने बर्हं धत्ते

48. Afterwards, by means of (thy) thunderings (made) intense by being reverberated by the mountain, thou shouldst make that *Skanda's* peacock dance, which has the corners of its eyes whitened by the light of Siva's moon, and whose molting plume covered with circlets of streaks of lustre, *Pârvati* places on her ear, in such a manner as to come in contact with the lotus-leaf (already resting there) through affection for her son.

48. M. °वलयगलितं for °वलयि गलितं. M, पुत्रस्नेहात्, K2. M. पुत्रप्रीत्या for पुत्रप्रेम्णा. K2. M. कुवलयपद° for कुवलयदल°. M. °क्षेपि, N. °स्पर्शि for °प्रापि. W. M. प्याययेः, M. आप्याययेः for पावकेः.

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ४९॥

इत्यर्थः ॥ नाथस्तु " कुवलयदलक्षेपि " इति पाठमनुसृत्य " क्षेपो निन्दापसारणं वा " इति व्याख्यातवान् ॥ हरशशिरुचा हरशिरश्चन्द्रिकया धौतापाङ्गं स्वतोऽपि शौक्ल्यादतिधवलितनेत्रान्तम् ॥ " अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः ॥ पावकस्याग्नेरपत्यं पावकिः स्कन्दः ॥" अत इञ्" इति इञ् ॥ तस्य तं पूर्वोक्तं मयूरं पश्चात्पुष्पाभिषेचनानन्तरमद्रेर्देवगिरेः ॥ कर्तुः ॥ ग्रहणेन गुहासंक्रमणेन गुरुभिः । प्रतिध्वानमहद्भिरित्यर्थः । गर्जितैर्नर्तयेथा नृत्यं कारय । मार्दङ्गिकभावेन भगवन्तं कुमारमुपास्स्वेति भावः ॥ " नर्तयेथाः " इत्यत्र " अणावकर्मकाच्चित्तवत्कर्तृकात् " इत्यात्मनेपदापवादः " निगरणचलनार्थेभ्यश्च" इति परस्मैपदं वा न भवति तस्य " न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः " इति प्रतिषेधात् ॥

४९. आराध्येति ॥ एनं पूर्वोक्तं शरा बाणतृणानि ॥ " शरो बाणतृणे बाणे " इति शब्दार्णवे ॥ तेषां वनं शरवणम् ॥ " प्रनिरन्तःशरे– " इत्यादिना णत्वम् ॥ तत्र भवो जन्म यस्य तं शरवणभवम् देवं स्कन्दम् ॥" शरजन्मा षडाननः" इत्यमरः ॥" अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः " इति वामनः । अवर्ज्योऽगतिकत्वादाश्रणीय इत्यर्थः ॥ आराध्योपास्य वीणिभिर्वीणावद्भिः ॥ व्रीह्यादित्वादिनिः ॥ सिद्धद्वन्द्वैः सिद्धमिथुनैः । भगवन्तं स्कन्दमुपवीणयितुमागतैरिति भावः । जलकणभयात् । जलसेकस्य वीणाक्कणनप्रतिबन्धकत्वादिति भावः । मुक्तमार्गस्त्यक्तवर्त्मा सन्नुल्लङ्घिताध्वा । कियन्तमध्वानं गतः

49. After paying thy respects to the god (Skanda) born in a forest of reeds thou, with thy path being left by the pairs of *Siddha's* bearing lutes (in their hands) from fear of drops of water, having traversed the road (a little further), shouldst stop (there) desirous of doing honour to Rantideva's fame sprung from the slaughter of the daughters of *Surabhi* (cows) and transformed into a river (*Charmanvati* by name) on the earth.

49. K2. एवं for एनं. W. M. शरवन° for शरवण°. G2. K2. R. N. M. °भुवं for °भवं. W. M. दत्तमार्गः, M. दत्तवर्त्मा, K2. त्यक्तमार्गः for मुक्तमार्गः. G2. K1. N. R. M. श्रोतोमूर्त्या for स्रोतोमूर्त्या. M. परिणितां for परिणतां.

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ५० ॥

इत्यर्थः । सुरभितनयानां गवामालम्भेन संज्ञपनेन जायत इति तथोक्ताम् । भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रन्तिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिम् । चर्मण्वत्याख्यां नदीमित्यर्थः । मानयिष्यन्सत्कारिष्यन्व्यालम्बेथाः । आलम्ब्यावतरेरित्यर्थः ॥ पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेष्वेकत्र संभृताद्रक्तनिष्यन्दाच्चर्मराशेः काचिन्नदी सस्यन्दे । सा चर्मण्वतीत्याख्यायत इति ॥

५०. त्वयीति ॥ शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेश्चौरे वर्णचौरे । तत्तुल्यवर्ण इत्यर्थः । त्वयि जलमादातुमवनते सति पृथुमपि दूरभावात् दूरत्वात्तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोश्चर्मण्वत्याख्यायाः प्रवाहम् । गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः ॥ अयमपि बहुव्रीहिः पूर्ववज्जन्मादुत्तरपदेषु द्रष्टव्यः ॥ नूनं सत्यं दृष्टीरावर्ज्य नियम्यैकमेकयष्टिकं स्थूलो महान्मध्यो मध्यमणीभूत इन्द्रनीलो यस्य तं भुवो भूमेर्मुक्तागुणं मुक्ताहारमिव प्रेक्षिष्यन्ते ॥ अत्रात्यन्तनीलमेघसंगतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमितीवशब्देन व्यज्यते । निरुक्तकारस्तु " तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनम् " इतीवशब्ददर्शनादत्राप्युपमैवेति बभ्राम ॥

50. While thou, pilferer of the hue of *Krishna* art bending down to take water (from the river) the sky-goers, having turned their eyes down will really look upon the stream of that river, though large, (appearing to be) small owing to distance, as if it were the earth's single-stringed pearl-necklace with a large sapphire in the centre.

50. K1. दूरदेशात् for दूरभावात्. G1. G2. R. N. K2. M. दूरं for नूनं. M. आबध्य for आवर्ज्य. M. वृष्टीः for दृष्टीः.

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ॥ ५१ ॥

५१. तामिति ॥ तां चर्मण्वतीमुत्तीर्य भ्रुवो लता इव भ्रूलताः ॥ उपमितिसमासः ॥ तासां विभ्रमा विलासाः परिचिताः क्लृप्ता येषु तेषां पक्ष्माणि नेत्रलोमानि ॥ " पक्ष्म सूत्रादिसूक्ष्मांशे किञ्जल्के नेत्रलोमनि " इति विश्वः ॥ तेषामुत्क्षेपादुन्नमनाद्धेतोः । कृष्णाश्च ताः शाराश्च कृष्णशारा नीलशबलाः ॥ " वर्णो वर्णेन " इति समासः ॥ " कृष्णरक्तासिताः शाराः " इति यादवः ॥ ततश्च शारशब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थम् । रक्तत्वं तु न विवक्षितमुपमानानुसारात्तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधादितरस्याप्रसङ्गात् । क्वचिद्भावकथनं तूपपत्तिविषयम् ॥ उपरि विलसन्त्यः कृष्णशाराः प्रभा येषां तेषाम् । कुन्दानि माघ्यकुसुमानि ॥ " माघ्यं कुन्दम् " इत्यमरः ॥ तेषां क्षेप इतस्ततश्चलनं तस्यानुगा अनुसारिणो ये मधुकरास्तेषां श्रियं मुष्णन्तीति तथोक्तानाम् । क्षिप्यमाणकुन्दानुविधायिमधुकरकल्पानामित्यर्थः । दशपुरं रन्तिदेवस्य नगरं तत्र वध्वः स्त्रियः ॥ " वधूर्जाया स्नुषा स्त्री च " इत्यमरः ॥ तासां नेत्रकौतूहलानां नेत्राभिलाषाणाम् । साभिलाषदृष्टीनामित्यर्थः । आत्मबिम्बं स्वमूर्तिं पात्रीकुर्वन्विषयीकुर्वन्व्रज गच्छ ॥

---

51. Crossing that (river) proceed:—making thy body, the object of curiosity of the *Dashapura* women's eyes, acquainted with the (graceful) movements of the creeper-like eyebrows, having dark and variegated lights flashing up by reason of the uplifting of the eyelashes, and therefore stealing (as it were) the beauty of bees following the movements of *Kunda* flowers.

---

51. P. W. G1. G2. K1. R. N. M. °कृष्णसार° for °कृष्ण-शार°. G2. M. कुन्दोत्क्षेपा° for कुन्दक्षेपा°. W. M. °श्रीजुषां, M. °श्रीयुषां° G2. N. M. °श्रीमुखां for °श्रीमुषाम्.

ब्रह्मावर्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ५२ ॥

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तः शुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः ॥ ५३ ॥

५२. ब्रह्मावर्तमिति ॥ अथानन्तरं ब्रह्मावर्तं नाम जनपदं देशम् ॥ अत्र मनुः—“ सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ॥ तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ” इति ॥ छाययानातपमण्डलेन गाहमानः प्रविशन्न तु स्वरूपेण । “पीठक्षेत्राश्रमादीनि परिवृत्यान्यतो व्रजेत् ” इति वचनात् । क्षत्रप्रधनपिशुनम् । अद्यापि शिरःकपालादिमत्तया कुरुपाण्डवयुद्धसूचकमित्यर्थः ॥ “ युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्” इत्यमरः ॥ तत्प्रसिद्धं कुरूणामिदं कौरवं क्षेत्रं भजेथाः । कुरुक्षेत्रं व्रजेत्यर्थः। यत्र कुरुक्षेत्रे गाण्ड्यस्यास्तीति गाण्डीवं धनुर्विशेषः ॥ “गाण्ड्यजगात्संज्ञायाम् ” इति मत्वर्थीयो वप्रत्ययः ॥ “ कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ ” इत्यमरः ॥ तद्धनुर्यस्य स गाण्डीवधन्वार्जुनः ॥ “ वा संज्ञायाम् ” इत्यनङादेशः ॥ शितशरशतैर्निशितबाणसहस्रै राजन्यानां राज्ञां मुखानि धाराणामुदकधाराणां पातैः कमलानि त्वमिवाभ्यवर्षदभिमुखं वृष्टवान् । शरवर्षणशिरांसि चिच्छेदेत्यर्थः ॥

५३. हित्वेति ॥ बन्धुप्रीत्या कुरुपाण्डवस्नेहेन । न तु भयेन। समरविमुखो

---

52. Then entering the country (called) *Brahmâvarta* by (thy) shadow, thou shouldst visit the field of the *Kurus*, indicative of the war between the *Kshatriyas* in which, the bearer of the *Gândiva* bow (Arjuna) covered the faces of the *Kshatriya* princes with hundreds of sharp arrows, as thou dost the lotuses with heavy showers.

53. Having made use, O friend, of the waters of the *Sarasvati*,

---

52. W. G1. G2. K1. K2. R. N. M. अधः, M. अदः, M. अदुः for अथ. M. सितशर° for शितशर°. G1. K1. N. M. गाङ्गिव° for गाण्डीव°. W. M. अभ्याषिञ्चन् for अभ्यवर्षन्.

53. M. कृत्वा, M. छित्वा, M. भूत्वा, K1. त्यक्त्वा for हित्वा. P. N. M. बन्धुस्नेहात् for बन्धुप्रीत्या. P. G1. K2. M. अधिगमम् for अभिगमम्. W. C1. C2. G1. G2. K1. K2. R. N. M. त्वमपि for त्वमसि. G1. M. भवसि for भविता.

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५४ ॥

बुद्धिनिःस्पृहः । लाङ्गलमस्यास्तीति लाङ्गली हलधरः । अभिमतरसामभीष्टस्वादां तथा रेवत्याः स्वप्रियाया लोचने एवाङ्कः प्रतिबिम्बितत्वाच्चिह्नं यस्यास्तां हालां सुराम् ॥ " सुरा हलिप्रिया हाला " इत्यमरः ॥ " अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात्साधु " इत्युदाजहार वामनः ॥ हित्वा त्यक्त्वा । दुस्त्यजामपीति भावः । याः सारस्वतीरपः सिषेवे । हे सौम्य सुभग । त्वं तासां सरस्वत्या नद्या इमाः सारस्वत्यस्तासामभिगमं सेवां कृत्वान्तोऽन्तरात्मनि शुद्धो निर्मलो निर्दोषो भविता ॥ " ण्वुल्तृचौ " इति तृच् ॥ असि सद्य एव पूतो भविष्यसीत्यर्थः ॥ " वर्तमानसामीप्ये वर्तमानवद्वा " इति वर्तमानप्रत्ययः ॥ वर्णमात्रेण वर्णेनैव कृष्णः श्यामः । न तु पापेनेत्यर्थः । अन्तःशुद्धिरेव संपाद्या न तु बाह्या । बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान्बलभद्र एव निदर्शनम् । अतो भवतापि सरस्वती सर्वथा सेवितव्येति भावः ॥

५४. तस्मादिति ॥ तस्मात्कुरुक्षेत्रात्कनखलस्याद्रेः समीपेऽनुकनखलम् ॥ " अनुर्यत्समया " इत्यव्ययीभावः ॥ शैलराजाद्धिमवतोऽवतीर्णां सगरतनयानां स्वर्गसोपानपङ्क्तिम् । स्वर्गप्राप्तिसाधनभूतामित्यर्थः । जह्नोर्नाम राज्ञः कन्यां जाह्नवीं गच्छेर्गच्छ ॥ विध्यर्थे लिङ् ॥ या जाह्नवी गौर्या वक्त्रे या भ्रुकुटिरचना सापत्न्यरोषाद्भ्रूभङ्गकरणं ॥ तां फेनैर्विहस्यहसित्वेव ॥ धावल्यात्फेनानां हासत्वेनोत्प्रेक्षा ॥ इन्दौ शिरोमाणिक्यभूते लग्ना ऊर्मय एव हस्ता यस्याः सेन्दुलग्नोर्मिहस्ता सती शंभोः केशग्रहणमकरोत् । यथा काचित्प्रौढा नायिका

which the bearer of the plough (Balarâma), refraining from the wine, possessed of an agreeable flavour (and) bearing the marks of *Revati's* eyes (through reflection) partook of, when he turned his face away from the battle field, out of regard for his kinsmen, thou (thus) purified within, wilt be dark only in colour.

54. Thence thou shouldst go by the side of *Kanakhala* to Jahnu's daughter (the Ganges), descended from the Lord of mountains (The Himâlaya), (and) forming a flight of steps ta heaven for *Sagara's*

54. W. M. वक्रभ्रुकुटि° for वक्त्रभ्रुकुटि°. W. N. M. विहस्यैव, M. विहस्यैाच° for विहस्येव. N. °लग्नोर्मि° for लग्नोर्मि°.

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासंगमेवाभिरामा ॥ ५५ ॥

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५६ ॥

सपत्नीमसहमाना स्ववाल्लभ्यं प्रकटयन्ती स्वभर्तारं सह शिरोरत्नेन केशेष्वाकर्षति तद्वदिति भावः ॥ इदं च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात्पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथामुपजीव्योक्तम् ॥

५५. तस्या इति ॥ सुरगज इव कश्चिद्दिग्गज इव व्योम्नि पश्चादर्धं पश्चार्धः । पश्चिमार्धमित्यर्थः ॥ पृषोदरादित्वात्साधुः ॥ तेन लम्बत इति पश्चार्धलम्बी सन्पश्चार्धभागेन व्योम्नि स्थित्वा । पूर्वार्धेन जलोन्मुख इत्यर्थः । अच्छस्फटिकविशदं निर्मलस्फटिकावदातं तस्या गङ्गाया अम्भस्तिर्यक्तिरश्चीनं यथा तथा पातुं त्वं तर्कयेर्विचारयेश्चेत् । सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या भवतश्छायया प्रतिबिम्बेनासौ गङ्गा अस्थाने प्रयागादन्यत्रोपगतः प्राप्तो यमुनासंगमो यया सा तथाभूतेवाभिरामा स्यात् ॥

५६. आसीनानामिति ॥ आसीनानामुपविष्टानां मृगाणां कस्तूरिकामृगा-

sons; which (river) laughing, as it were, with its foam at the frowns on Gourî's face, seized the hair of Siva with her wave-hand touching the moon on his head.

55. Shouldst thou think of drinking obliquely of its water—clear as pure crystal, with thy hinder part resting on the sky, like a celestial elephant, then owing to thy shadow moving along on the stream, it (the river) would at once be as beautiful as if it had been joined by the *Yamunâ* at a place other than Prayâga.

55. On reaching the mountain, the source of the same river (the

55. W. G1. G2. K1. K2. R. N. M. पूर्वार्धलम्बी for पश्चार्धलम्बी. R. M. °स्फुटिक° for °स्फटिक°. M. संतर्पन्त्या, W. संसर्पन्त्याः for संसर्पन्त्या. P. G1. G2. K1. K2. B. R. N. M. छायया सा for छाययासौ. M. °उपनत° for °उपगत°. W. G1. G2. K1. K2. N. M. °संगमेन G. M. °संगमे च for °संगमेव. M. अभिरम्या G1. अभिरामं for अभिरामा.

56. M. शुभ्राम्, K2. M. रम्यां for शुभ्र°. M. तुखारैः for तुषारैः.

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्त्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५७ ॥

णाम् ॥ अन्यथा नाभिगन्धानुपपत्तेः ॥ नाभिगन्धैः कस्तूरीगन्धैस्तेषां तदुद्भवत्वात् । अत एव मृगनाभिसंज्ञा च ॥ " मृगनाभिर्मृगमदः कस्तूरी च " इत्यमरः ॥ अथवा नाभयः कस्तूर्यः ॥ " नाभिः प्रधाने कस्तूरीमदे च क्वचिदीरितः " इति विश्वः ॥ तासां गन्धैः सुरभिताः सुरभीकृताः शिला यस्यतं तस्या गङ्गाया एव प्रभवत्यस्मादिति प्रभवः कारणम् । तुषारैर्गौरं सितम् ॥ " अवदातः सितो गौरः " इत्यमरः ॥ अचलं प्राप्य । विनीयतेऽनेनेति विनयनम् ॥ करणे ल्युट् ॥ अध्वश्रमस्य विनयनेऽपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन् । शुभ्रो यस्त्रिनयनस्य त्र्यम्बकस्य वृषो वृषभः ॥ " सुकृते वृषभे वृषः " इत्यमरः ॥ तेनोत्खातेन विदारितेन पङ्केन सहोपमेयामुपमातुमर्हां शोभां वक्ष्यसि वोढासि ॥ वहतेर्लृट् ॥ " त्रिनयन—" इत्यत्र " पूर्वपदात्संज्ञायामगः " इति णत्वं न भवति " क्षुभ्नादिषु च " इति निषेधात् ॥ तस्याः प्रभवमित्यादिना हिमाद्रौ मेघस्य वैवाहिको गृहविहारो ध्वन्यते ॥

५७. तमिति ॥ वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः ॥ " अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोः " इत्यमरः ॥ तेषां संघट्टनेन संघर्षणेन जन्म यस्य स तथोक्तः ॥ जन्मोत्तरपदत्वाद्व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम् ॥ उल्काभिः स्फुलिङ्गैः क्षपिता निर्दग्धाश्चमरीणां बालभाराः केशसमूहा येन । दव इत्यग्निर्दवाग्निर्वनवह्निः ॥ " वने च वनवह्नौ च दवो दाव इतीष्यते " इति यादवः ॥ तं हिमाद्रिं बाधेत चेत्पीडये-

Ganges) white with snow, and with its rocks scented by the musk of the deer lying (there), (and) seated on its crest, remover of the fatigue of the journey, thou wilt have a beauty comparable to the mud dug up by the white bull of the three-eyed god (Síva).

57. If the forest conflagration, which is caused by the mutual friction of the trunks of the *Sarala* trees whilst the wind is blowing and which with its flames destroy the bushy tails of the *Chamaris*, should injure that (mountain), it behoves thee to completely extinguish it with thousands of water-showers; for the resources of the great, have for their end, (only) the alleviation of the miseries of the distressed.

57. P. त्वं चेद् for तं चेद्. G1. K2.R. N. M. वहति, M. स्फुरति for सरति. W. M. °क्षयित° for °क्षपित.°

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मि-
न्मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥५८॥

यदि । एनं दवाग्निं वारिधारासहस्रैः शमयितुमर्हसि ॥ युक्तं चैतदित्याह—उत्तमानां महतां संपदः समृद्धय आपन्नानामार्त्तानामार्त्तिप्रशमनमापन्निवारणमेव फलं प्रयोजनं यासां तास्तथोक्ता हि । अतो हिमाचलस्य दावानलस्त्वया शमयितव्य इति भावः ॥

५८. य इति ॥ तस्मिन्हिमाद्रौ संरम्भः कोपः ॥ " संरम्भः संभ्रमे कोपे" इति शब्दार्णवे ॥ तेनोत्पतन उत्प्लवने रभसो वेगो येषां ते तथोक्ताः ॥ "रभसो वेगहर्षयोः" इति विश्वः ॥ ये शरभा अष्टापदमृगविशेषाः ॥ " शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे " इति विश्वः ॥ मुक्तोऽध्वा शरभोत्प्लवनमार्गो येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः ॥ संभावनायां लिङ् ॥ भवतोऽतिदूरत्वात्स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्येत्यर्थः ॥ ताञ्शरभांस्तुमुलाः संकुलाः करका वर्षोपलाः ॥ " वर्षोपलस्तु करका " इत्यमरः॥ तासां वृष्टिस्तस्याः पातेनावकीर्णान्विक्षिप्तान्कुर्वीथाः कुरुष्व ॥ विध्यर्थे लिङ् ॥ क्षुद्रोऽप्याधिक्षिपन्प्रतिपक्षः सद्यः प्रतिक्षेप्तव्य इति भावः । तथाहि ॥ आरभ्यन्त इत्यारम्भाः कर्माणि तेषु यत्न उद्योगः स निष्फलो येषां ते तथोक्ताः । निष्फलकर्मोपक्रमा इत्यर्थः । अतः के वा परिभवपदं तिरस्कारपदं न स्युर्न भवन्ति । सर्वे एव भवन्तीत्यर्थः ॥ यदत्र " घनोपलस्तु करक " इति यादववचनात्करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण " करकाणामावृष्टिः " इति केषांचिद्व्याख्यानं तदन्ये

58. Those *Sàrabha's* there, who, impetuous in their angry jump may on a sudden (attempt to) outstrip thee, removed from their path (only) to injure their own bodies, thou shouldst scatter by means of tumultuous showers hail-stones;—who indeed that strive in vain in their undertakings, would not become an object of contempt?

58. W. K2. M. त्वां मुक्तध्वनिमसहनाः for संरंभोत्पतनरभसाः. M. कायभंगाय for स्वांगभंगाय. W. K2. M. दर्पोत्सेकादुपरि, R. N. M. मुक्तध्वानं सपदि for मुक्ताध्वानं सपदि. G1. G2. K1. R. N. M. सरभाः for शरभाः. W. K2. M. लंघयिष्यन्त्यलंघ्यम्, M. लंभयेयुर्भवन्तम् for लंघयेयुर्भवन्तम्, W. G1. G2. K2. R. N. M. °वृष्टिहासाव° for °वृष्टिपाताव°. P. केषां न for के वा न. M. °पाशाः for °यत्नाः

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
कल्पिष्यन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५९ ॥

नानुमन्यन्ते । "वर्षोपलस्तु करका" इत्यमरवचनव्याख्याने क्षीरस्वामिना "कमण्डलौ च करकः सुगते च विनायक" इति नानार्थे पुंस्यपि वक्ष्यतीति वदतोभयलिङ्गताप्रकाशनात् । यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेध इति न तद्विरोधोऽपि । "करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ । पक्षिभेदे करे चापि करका च घनोपलं" इति विश्वप्रकाशवचने तूभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्ता । अत एव रुद्रः—"वर्षोपलस्तु करका करकोऽपि च दृश्यते" इति ॥

५९. तत्रेति ॥ तत्र हिमाद्रौ दृषदि कस्यांचिच्छिलायां व्यक्तं प्रकटं शश्वत्सदा सिद्धैर्योगिभिः ॥ "सिद्धिर्निष्पत्तियोगयोः" इति विश्वः ॥ उपचितबलिं रचितपूजं ॥ "बलिः पूजोपहारयोः" इति यादवः ॥ अर्धश्चासाविन्दुश्चेत्यर्धेन्दुः ॥ "अर्धः खण्डे समांशेऽर्धम्" इति विश्वः ॥ स मौलौ यस्य तस्येश्वरस्य चरणन्यासं पादविन्यासम् ॥ भक्तिः पूज्येष्वनुरागस्तया नम्रः सन्परीयाः प्रदक्षिणं कुरु ॥ परिपूर्वादिणो लिङ् ॥ यस्मिन्पादन्यासे दृष्टे सत्युद्धूतपापा निरस्तकल्मषाः सन्तः श्रद्दधाना विश्वसन्तः पुरुषाः । श्रद्धा विश्वासः । आस्तिक्यबुद्धिरिति यावत् ॥ "श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्या" इति श्रत्पूर्वाद्दधातेः शानच् ॥ करणस्य क्षेत्रस्य विगमादूर्ध्वं देहत्यागानन्तरम् ॥ "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः ॥ स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् ॥ "गणाः प्रमथसंख्यौघाः" इति वैजयन्ती ॥ तस्य प्राप्तये कल्पिष्यन्ते समर्था भविष्यन्ति ॥ क्लृतेः पर्याप्तिवचनस्यालमर्थत्वात्तद्योगे

---

59. Bending down in adoration thou shouldst circumambulate the foot-mark of *Siva*, wearing the half-moon on his head, visible there on a rock, and perpetually covered over with offerings, by devotees; on seeing which, the faithful, freed from their sins, will become fit to attain to the permanent position of *Ganas* after their separation from the body.

---

59. P. G1. G2. K1. K2. R. N. M. उपहृत°, M. उपहित°, M. उपहृत° for उपचित°. W. G1. G2. K1. M. दूरं for ऊर्ध्वम्. C1. C2. G1. G2. K1. R. N. M. संकल्पन्ते, W. K2. M. कल्पन्तऽस्य for कल्पिष्यन्ते. G2. M, दृष्टे यस्मिन् for यस्मिन्दृष्टे.

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥ ६० ॥

" नमःस्वस्ति—" इत्यादिना चतुर्थी ॥ " अलमिति पर्याप्त्यर्थग्रहणम् " इति भाष्यकारः ॥ " अव्यक्तो व्यञ्जयामास शिवः श्रीचरणद्वयम् ॥ हिमाद्रौ शाम्भवादीनां सिद्धये सर्वकर्मणाम् ॥ दृष्ट्वा श्रीचरणन्यासं साधकः स्थिरयेत्तनुम् । इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयम् " इति शंभुरहस्ये ॥

६०. शब्दायन्त इति ॥ हे मेघ । अनिलैः पूर्यमाणाः कीचका वेणुविशेषाः ॥ " वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः " इत्यमरः ॥ " कीचको दैत्यभेदे स्याच्छुष्कवंशे द्रुमान्तरे " इति विश्वः ॥ मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्वन्ति । स्वनन्तीत्यर्थः ॥ " शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे " इति क्यङ् ॥ अनेन वंशवाद्यसंपत्तिरुक्ता । संसक्ताभिः संयुक्ताभिर्वंशवाद्यानुषक्ताभिर्वा ॥ " संरक्ताभिः " इति पाठे संरक्तकण्ठीभिरित्यर्थः ॥ किंनरीभिः किंनरस्त्रीभिः । त्रयाणां पुराणां समाहारस्त्रिपुरम् ॥ "तद्धितार्थोत्तरपद—" इति समासः । पात्रादित्वान्नपुंसकत्वम् ॥ तस्य विजयो गीयते । कन्दरेषु दरीषु ॥ " दरी तु कन्दरो वा स्त्री " इत्यमरः ॥ ते तव निर्ह्रादो मुरजे वाद्यभेदे ध्वनिरिव । मुरजध्वनिरिवेत्यर्थः । स्याच्चेत्तर्हि तत्र चरणसमीपे पशुपतेर्नित्यं संनिहितस्य शिवस्य । नृत्ये इति शेषः । संगीतं सम्यग् गीतं ॥ " तौर्यत्रिकं तु संगीतं न्यायारम्भे प्रसिद्धके । तूर्याणां त्रितये च " इति शब्दार्णवे ॥ तदेवार्थः संगीतार्थः संगीतवस्तु ॥ " अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु " इत्यमरः ॥ समग्रः संपूर्णो भावी ननु भविष्यति खलु ॥ " भविष्यति गम्यादयः " इति भविष्यदर्थे णिनिः ॥

---

60. The bamboos filled with wind are making a sweet sound, the conquest of Tripura, is being sung by the wives of the *Kinnaras*, united (in chorus) and if thou shouldst be thundering in the caves so as to be) in the place of the sound of a drum, will not the aparatus for Siva's concert be complete there?

---

60. P. W. G1. G2. K1. K2. R. N. M. संरक्ताभिः for संसक्ताभिः. P. W. G1. G2. K1. K2. R. N. M. निर्ह्रादी ते for निर्ह्रादस्ते. P. मुरव इव, G1. G2. M. मरुज इव N. M. मुरज इव for मुरज इव. K2. M. कन्दरासु for कन्दरेषु. P. K2. M. N. समस्तः for समग्रः.

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषा-
न्हंसद्वारं भृगुपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः॥६१॥

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यंबकस्याट्टहासः ॥ ६२ ॥

६१. प्रालेयेति ॥ प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे ॥ " अव्ययं विभक्ति—" इत्यादिना समीपार्थेऽव्ययीभावः ॥ तांस्तान् ॥ वीप्सायां द्विरुक्तिः ॥ विशेषान्द्रष्टव्यार्थान् ॥"विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनि " इति शब्दार्णवे ॥ अतिक्रम्य दर्शं दर्शमतीत्येत्यर्थः । अनुसरेरित्यनागतेन संबन्धः ॥ हंसानां द्वारं हंसद्वारम् ॥ मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण संचरन्त इत्यागमः ॥ भृगुपतेर्जामदग्न्यस्य यशोवर्त्म । यशःप्रवृत्तिकारणमित्यर्थः । यत्क्रौञ्चस्याद्रे रन्ध्रमस्ति तेन क्रौञ्चबिलेन बलेर्दैत्यस्य नियमने बन्धनेऽभ्युद्यतस्य प्रवृत्तस्य विष्णोर्व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पाद इव तिर्यगायामेन क्षिप्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभत इति तथाविधः सन्नुदीचीमुत्तरां दिशमनुसरेरनुगच्छ॥ पुरा किल भगवतो देवाद्धूर्जटेर्धनुरुपनिषदमधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्धया क्रौञ्चशिखरिणमतिनिशितविशिखमुखेन हेलया मृत्पिण्डभेदं भित्त्वा तत एव क्रौञ्चक्रोडादिव सद्यः समुज्जृम्भिते कस्मिन्नपि यशःक्षीरनिधौ निखिलमपि जगज्जालमाप्लावितमिति कथा श्रूयते ॥

६२. गत्वेति ॥ क्रौञ्चबिलनिर्गमनानन्तरमूर्ध्वं च गत्वा दशमुखस्य राव-

61. On passing by the various wonders on the slopes of the *Himalaya*, thou looking beautiful by expanding (thyself) slantingly like the black foot of *Vishnu* intent on the overthrow of *Bali*, shouldst proceed to the North by way of the pass in (mount) *Krauncha*, the outlet for the flamingoes (and) the path of the glory of the Lord of the *Brigus* (*Parashurama*).

62. Then going upwards, thou shouldst be the guest of (the

61. M. उपक्रम्य for अतिक्रम्य. P. अनुपतेः for अनुसरेः. P. R. बलिनियमनेऽभ्युद्यतस्य, M. बलिनियमनायोद्यतस्य, G1. G2. N. M. बलिनियमनाभ्युद्युतस्य for बलिनियमनाभ्युद्यतस्य.

62. M. °दर्शनस्य for °दर्पणस्य. W. M. तुंगोच्छ्रायैः for शृंगोच्छ्रायैः. M. कुसुम° for कुमुद°. K1. K2. W. R. G1. G2. N. M.प्रतिदिशम् for प्रतिदिनम्.

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६३ ॥

णस्य भुजैर्बाहुभिरुच्छ्वासिता विश्लेषिताः प्रस्थानां सानूनां संधयो यस्य तस्य ॥ एतेन नयनकौतुकसद्भाव उक्तः ॥ त्रिर्दशपरिमाणमेषामस्तीति त्रिदशाः ॥ " संख्ययाव्यया—" इत्यादिना बहुव्रीहिः ॥ " बहुव्रीहौ संख्येये डच्—" इत्यादिना समासान्तो डजिति क्षीरस्वामी ॥ त्रिदशानां देवानां वनितास्तासां दर्पणस्य ॥ कैलासस्य स्फटिकत्वाद्रजतत्वाद्वा बिम्बग्राहित्वेनेदमुक्तम् ॥ कैलासस्यातिथिः स्याः । यः कैलासः कुमुदविशदैर्निर्मलैः शृङ्गाणामुच्छ्रायैरौन्नत्यैः खमाकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतत्र्यम्बकस्य त्रिलोचनस्याट्टहासोऽतिहास इव स्थितः ॥ " अट्टावतिशयक्षौमौ " इति यादवः॥ धावल्याद्धासत्वेनोत्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम् ॥

६३. उत्पश्यामीति ॥ स्निग्धं मसृणं भिन्नं मर्दितं च यदञ्जनं कज्जलं तस्यामेवाभा यस्य तस्मिंस्त्वयि तटगते सानुं गते सति सद्यः कृत्तस्य छिन्नस्य द्विरददशनस्य गजदन्तस्य छेदवद्गौरस्य धवलस्य तस्याद्रेः कैलासस्य मेचके श्यामले ॥ " कृष्णे नीलासितश्यामकालश्यामलमेचकाः " इत्यमरः ॥ वाससि वस्त्रेऽसन्यस्ते सति हलभृतो बलभद्रस्येव स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीमुत्पश्यामि । शोभा भविष्यतीति तर्कयामीत्यर्थः॥ श्रौती पूर्णोपमालंकारः ॥

---

mount) *Kailasa*, the looking--glass of the wives of the gods, having the joints of its elevated parts upheaved by the arms of the ten-faced demon (*Râvana*); which (mount) extending into the sky its lofty peaks, white as the lotus, stands as it were, the loud laughter of the three-eyed God (*Siva*), accumulated day by day.

63. When thou, shining like glossy powdered antimony, hast stood over its slopes, I foresee, that the beauty of that mountain (*Kailasa*), white as a newly-cut piece of ivory, will be worthy of being looked at with motionless eyes, like that of the bearer of the plough (*Balarâma*) when dark-blue garments are thrown over his shoulders.

---

63. P. °रदन° for °दशन°. P. M. K2. लीलामद्रेः for शोभामद्रेः. M. तिमिर° for स्तिमित°. K1. K2. W. G1. G2. R. N. M. अंशन्यस्ते for अंसन्यस्ते.

हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६४ ॥

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६५ ॥

६४. हित्वेति ॥ तस्मिन्क्रीडाशैले कैलासे ॥ "कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः । क्रीडार्थं निर्मिताः शंभोर्देवैः क्रीडाद्रयोऽभवन्" इति शंभुरहस्ये ॥ शंभुना शिवेन भुजग एव वलयः कङ्कणं हित्वा गौर्या भीरुत्वात्त्यक्त्वा दत्तहस्ता सती गौरी पादचारेण विचरेद्यदि तर्ह्यग्रयायी पुरोगतस्तथा स्तम्भितो घनीभावं प्रापितोऽन्तर्जलस्यौघः प्रवाहो यस्य स तथाभूतः । भङ्गीनां पर्वणां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन् । मणीनां तटं मणितटं तस्यारोहणाय सोपानत्वं कुरु । सोपानभावं भजेत्यर्थः ॥

६५. तत्रेति ॥ तत्र कैलासेऽवश्यं सर्वथा सुरयुवतयो वलयकुलिशानि

64. And if *Gouri* supported by *Siva* with his hand, after casting away the snake-bracelet, should move about on foot on that mountain of sport, go on before her, with the flow of (thy) water restrained within thee and with thy body moulded into the form of wave-like steps (and) become a ladder for the ascent of the jewelled slopes.

65. The heavenly damsels there will assuredly use thee as a shower-

64. P. G2. K1. R. M. तस्मिन् हित्वा, K2. M. हित्वा नीलं for हित्वा तस्मिन्. K2. M. तु for च. K2. P. W. B. विहरेत् for विचरेत्. G2. M. सूचित° for स्तंभित°. W. M. व्रज पदसुखस्पर्शमारोहणेषु, M. कुरु सुखपदारोहणायाग्रयायी, P. कुरु मणितटारोहणायाग्रचारी, M. K2. कुरु मणिशिलारोहणायाग्रयायी for कुरु मणितटारोहणायाग्रयायी.

65. G1. G2. K1. K2. R. N. M. कुलिशवलय° for वलयकुलिश°. M. जनितसलिलोद्गारमन्तःप्रवेशम् for वलयकुलिशोद्घट्टनोद्गीर्णतोयम्. M. K2. नेष्यन्ते for नेष्यंति. K2. M. त्यागः for मोक्षः. P. यदि तव for तव यदि. M. शर्मशून्य for घर्मशून्य. P. B. K2. M. भीषयेः, G1. G2. K1. R. N. M. भापयेः for भाययेः.

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६६ ॥

कङ्कणकोटयः ॥ शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते ॥ तैरुद्घट्टनानि प्रहारास्तैरुद्गीर्णमुत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धारा यन्त्रधारास्तासां गृहत्वं कृत्रिमधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति ॥ हे सखे मित्र । घर्मे निदाघे लब्धस्य ॥ घर्मलब्धत्वं चास्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात्प्राथमिकमेघत्वाद्वा । यथोक्तम्—" आषाढस्य प्रथम—" इति ॥ तव ताभ्यः सुरयुवतिभ्यो मोक्षो न स्याद्यदि तदा क्रीडालोलाः क्रीडासक्ताः । प्रमत्ता इत्यर्थः । ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिर्गर्जितैः करणैर्भाययेस्त्रासयेः ॥ अत्र हेतुभयाभावादात्मनेपदं पुगागमः षुगागमश्च न ॥

६६. हेमेति ॥ हे जलद । हेमाम्भोजानां प्रसवि जनकम् ॥ " जिद्दक्षि—" इत्यादिनेनिप्रत्ययः ॥ मानसस्य सरसः सलिलमाददानः । पिबन्नित्यर्थः । तथैरावतस्येन्द्रगजस्य । कामचारित्वाद्वा शिवसेवार्थमिन्द्रागमनाद्वा समागतस्येति भावः । क्षणे जलादानकाले मुखे पटेन या प्रीतिस्तां कुर्वन् । तथा कल्पद्रुमाणां किसलयानि पल्लवभूतान्यंशुकानि सूक्ष्मवस्त्राणीव ॥ " अंशुकं वस्त्रमात्रे स्यात्परिधानोत्तरीययोः । सूक्ष्मवस्त्रे नातिदीप्तौ " इति शब्दार्णवे ॥ वातैर्मेघवातैर्धुन्वन् । नाना बहुविधाश्चेष्टास्तोयपानादयो येषु तैर्ललितैः क्रीडितैः ॥ " ना भावभेदे स्त्रीनृत्ये ललितं त्रिषु सुन्दरे । अस्त्रियां प्रमदागारे क्रीडिते जातपल्लवे " इति शब्दार्णवे ॥ तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व ॥ " निर्वेशो भृतिभोगयोः " इत्यमरः ॥ यथेच्छविहारो मित्र-

---

bath with thy water let out in consequence of the friction caused by the points of their arm-lets but if, O friend, thou acquired (by them) in the hot season canst not escape from them, thou must terrify them engaged in sports, with thunders disagreeable to the ear.

66. Taking the water of the *Mânasa* lake, producive of golden-lotuses,—procuring for *Airâvata* (Indra's elephant) the gratification of a veil for his face during the time (of drinking) and shaking, like garments, the shoots of the *Kalpa* tree with thy breezes—with amusements (like these) of various kinds, thou O cloud, enjoy that lord of mountains to thy heart's content.

---

66. W. K2. M. कामाव for कामम्, P. G1. G2. K2. M. ऐरावणस्य for ऐरावतस्य P. स्ववातैः, M. प्रवातैः for इव वातैः. K2. W. G1. M. वातैः सजलपृषतैः कल्पवृक्षांशुकानि छायाभिन्नस्फटिकाविशदम्, M. वातैः सजलनयनैः कल्पवृक्षांशुकानि छायाभिन्नस्फटिकविशदम्, K2. कल्पद्रुमकिशलयान्यंशुकानीव वातैश्छायाभिन्नस्फटिकविशदम् for कल्पद्रुमकिसलयान्यंशुकानीव वातैर्नानाचेष्टैर्जलदललितैः. M. G1. पर्वतं तं for तं नगेन्द्रम्.

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६७॥

गृहेषु मैत्र्याः फलम् । सहजमित्रं च ते कैलासः । मेघपर्वतयोरब्जसूर्ययोरब्धिचन्द्रयोः शिखिजीमूतयोः समीराग्न्योर्मित्रता स्वयमिति भावः ॥

६७. तस्येति ॥ प्रणयिनः प्रियतमस्येव तस्य कैलासस्योत्सङ्ग उर्ध्वभागे ऊरौ च ॥ " उत्सङ्गो मुक्तसंयोगे सक्थन्यूर्ध्वतलेऽपि च " इति मालतीमालायाम् ॥ गङ्गा दुकूलं शुभ्रवस्त्रमिवेत्युपमितसमासः ॥ " दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके " इति शब्दार्णवे ॥ अन्यत्र तु गङ्गेव दुकूलम् ॥ तत्स्रस्तं यस्यास्तां तथोक्तामलकां कुबेरनगरीं दृष्ट्वा । कामिनीमिवेति शेषः । हे कामचारिन् । त्वं पुनस्त्वं तु न ज्ञास्यस इति न । किं तु ज्ञास्यस एवेत्यर्थः॥ कामचारिणस्ते पूर्वमपि बहुकृत्वो दर्शनसंभवादज्ञानमसंभावितमेवेति निश्चयार्थे नञ्द्वयप्रयोगः । तदुक्तम्—" स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोगः " इति ॥ उच्चैरुन्नतानि विमानानि सप्तभूमिकभवनानि यस्यां सा ॥ " विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि " इति यादवः ॥ मेघसंवाहनस्थानसूचनार्थमिदं विशेषणम् ॥ अन्यत्र विमाना निष्कोपा । यालका । वो युष्माकं काले । मेघकाल इत्यर्थः ॥ कालस्य सर्वमेघसाधारण्याद्व इति बहुवचनम् ॥ सलिलमुद्गिरतीति सलिलोद्गारम् । स्रवत्सलिलधारमित्यर्थः ॥ अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैर्मौक्तिकसरैर्ग्रथितं प्रत्युप्तम् ॥ " पुंश्चल्यां मौक्तिके मुक्ता " इति यादवः ॥ अलकमिव चूर्णकुन्तलानीव ॥ जातावेकवचनम् ॥ " अलकाश्चूर्णकुन्तलाः " इत्यमरः ॥ वहति बिभर्ति ॥ अत्र कैलासस्यानुकूलनायकत्वमलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते ।(" एकायत्तोऽनुकूलः स्यात् " इति । " प्रियोपलालिता नित्यं स्वाधीनपतिका मता " इति च लक्षयन्ति । उदाहरन्ति च—" लालयन्नलकप्रान्तान्रचयन्पत्रमञ्जरीम् । एकां विनोदयन्कान्तां छायावदनुवर्तते " इति ॥)

इति श्रीमहामहोपाध्यायमल्लिनाथसूरिविरचितया संजीविनासमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासविरचिते मेघदूते काव्ये पूर्वमेघः समाप्तः ।

---

67. On seeing *Alakâ*, thou, wanderer at thy will, wilt not, but recognise it with its garment-like Ganges fallen on the slope of that (mount) as on the lap of a lover, which (city) possessed of lofty palaces supports, in thy season (i. e. rainy season) a host of water-shedding clouds as a beautiful woman (supports) her hair wreathed with strings of pearls.

---

67. K2. M. व्योमचारिन् for कामचारिन्. W. G1. G2. K1. K2. R.N. M. °विमानैः for °विमाना.

उत्तरमेघः ।

---ooo---

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

१ विद्युत्वन्तमिति ॥ यत्रालकायां ललिता रम्या वनिताः स्त्रियो येषु ते । सह चित्रैर्वर्तन्त इति सचित्राः ॥ " आलेख्याश्चर्ययोश्चित्रम् " इत्यमरः ॥ " तेन सहेति तुल्ययोगे " इति बहुव्रीहिः । " वोपसर्जनस्य " इति सहशब्दस्य सभावः ॥ संगीताय तौर्यत्रिकाय प्रहतमुरजास्ताडितमृदङ्गाः ॥ " मुरजा तु मृदङ्गे स्याड्ढक्कामुरजयोरपि " इति शब्दार्णवे ॥मणिमया मणिविकारा भुवो येषु । अभ्रं लिहन्तीत्यभ्रंलिहान्यभ्रंकषाणि ॥ " वहाभ्रे लिहः " इति खश्प्रत्ययः । " अरुर्द्विष— " इत्यादिना मुमागमः ॥ अग्राणि शिखराणि येषां ते तथोक्ताः । अतितुङ्गा इत्यर्थः ॥ प्रासादा देवगृहाणि ॥ " प्रासादो देवभूभुजाम् " इत्यमरः ॥ विद्युतोऽस्य सन्तीति विद्युत्वन्तम् । सेन्द्रचापमिन्द्रचापवन्तम् । स्निग्धः श्राव्यो गम्भीरो घोषो गर्जितं यस्य तम् । अन्तरन्तर्गतं तोयं यस्य तम् । तुङ्गमुन्नतं त्वां तैस्तैर्विशेषैर्ललितवनितत्वादिधर्मैस्तुलयितुं समीकर्तुमलं पर्याप्ताः ॥ " अलं भूषणपर्याप्तिशक्तिवारणवाचकम् " इत्यमरः ॥ अत्रोपमानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यमन्योन्यसादृश्यान्मेघप्रासादयोः साम्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा । वस्तुतो भिन्नयोः परस्परसादृश्यादभिन्नयोरुपमानोपमेयधर्मयोः पृथगुपादानाद्बिम्बप्रतिबिम्बभावः ॥

संप्रति सर्वदा सर्वर्तुसंपत्तिमाह—

---

1. Where (in *Alakâ*) the palaces with beautiful women and pictures, with drums beaten for singing and dancing, with jewelled floors and cloud-licking tops, are able to compete with thee, having lightning and rainbow, having a deep and pleasant sound, having water inside and loftiness, in the various particulars (respectively).

---

1. P. °मुरवाः, M. °मरुजाः, G1. N. M.° मुरुजाः for °मुरजाः. P. K2. M. स्निग्धपर्जन्यघोषम् for स्निग्धगंभीरघोषम्.

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥

२. हस्त इति ॥ यत्रालकायां वधूनां स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलम् ॥ शरल्लिङ्गमेतत् । तदुक्तम्—" शरत्पङ्कजलक्षणा " इति ॥ अलके कुन्तले ॥ जातावेकवचनम् ॥ अलकेष्वित्यर्थः । बालकुन्दैः प्रत्यग्रमाघ्यकुसुमैरनुविद्धम् । अनुवेधो ग्रन्थनम् ॥ नपुंसके भावे क्तः ॥ यद्यपि कुन्दानां शैशिरत्वमस्ति " माघ्यं कुन्दम् " इत्यभिधानात्तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हैमन्तकार्यत्वमित्याशयेन बालेति विशेषणम् ॥ " अलकम् " इति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात् । नाथस्तु नियतपुंलिङ्गताहानिश्चेति दोषान्तरमाह । तदसत् । " स्वभाववक्राण्यलकानि तासाम् " । " निर्धूतान्यलकानि पाटितमुरः क्षतोऽधरः खण्डितः " इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनात् ॥ आनने मुखे लोध्रप्रसवानां लोध्रपुष्पाणां शैशिराणां रजसां परागेण ॥ " प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचने " इति विश्वः ॥ पाण्डुतां नीता श्रीः शोभा । चूडापाशे केशपाशे नवकुरबकं वासन्तः पुष्पविशेषः । कर्णे चारु पेशलं शिरीषं ग्रैष्मः पुष्पविशेषः । सीमन्ते मस्तककेशवीथ्याम् ॥ " सीमन्तमस्त्रियां मस्तकेशवीथ्यामुदाहृतम् " इति शब्दार्णवे ॥ तवोपगमः । मेघागम इत्यर्थः । तत्र जातं त्वदुपगमजम् । वार्षिकमित्यर्थः । नीपं कदम्बकुसुमम् । सर्वत्रास्तीति शेषः । अस्तिर्भवन्तिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात् । इत्थं कमलकुन्दादि तत्तत्कार्यसमाहाराभिधानादर्थात्सर्वर्तुसमाहारसिद्धिः। कारणं विना कार्यस्यासिद्धेरिति भावः॥

---

2. Where the women have lotuses in (their) hands for sport, the inlaying of young *Kunda* flowers in (their) hair, beauty made yellowish-white by the pollen of *Lodhra* blossom on (their) faces, fresh *Kurabaka* flowers in (their) braids of hair, charming *Shirisha* flowers in (their) ears, and *Kadamba* flowers springing up at thy approach in the partings of (their) hair.

---

2. W. G1. G2. K1. K2. R. N. M. अलकं for अलके. M. °कुन्दानुवेधः for कुन्दानुविद्धम्. R. G1. G2. K1. K2. N. W. M. रोध्र° for लोध्र°. P. W. G1. G2. K1. K2. R. N. M. आननश्रीः for आनने श्रीः M. W. °कुरुवकं, G1. G2. K1. R. कुरबकं for कुरबकम्. M. कर्णे करोति for कर्णे शिरीषं. W. M. सीमन्तेऽपि for सीमन्ते च.

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥३॥
आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥४॥

३. यत्रेति ॥ यत्रालकायां पादपा वृक्षाः । नित्यानि पुष्पाणि येषां ते तथा । न त्वृतुनियमादिति भावः । अत एवोन्मत्तैर्भ्रमरैर्मुखराः शब्दायमानाः । नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां तास्तथा । न तु हेमन्तवर्जितमित्यर्थः । अत एव हंसश्रेणीभी रचितरशनाः । नित्यं हंसपरिवेष्टिता इत्यर्थः । भवनशिखिनः क्रीडामयूरा नित्यं भास्वन्तः कलापा बर्हाणि येषां ते तथोक्ताः । न तु वर्षास्वेव । अत एव केकाभिरुत्कण्ठा उद्ग्रीवाः । प्रदोषा रात्रयो नित्या ज्योत्स्ना येषां ते । न तु शुक्लपक्ष एव । अत एव प्रतिहता तमसां वृत्तिर्व्याप्तिर्येषां ते च ते रम्याश्चेति तथोक्ताः ॥

४. आनन्देति ॥ यत्रालकायां वित्तेशानां यक्षाणाम् ॥ “ वित्ताधिपः कुबेरः स्यात्प्रभौ धनिकयक्षयोः ” इति शब्दार्णवे ॥ आनन्दोत्थमानन्दजन्य-

---

3. Where the trees are ever-blossming and noisy with intoxicated bees, the lotus-ponds have lotuses ever (blooming) and girdles formed of the rows of swans, the domestic peacocks have (their) tails ever-shining and (their) necks uplifted by (their) cries, and evenings are ever moonlit and pleasant on account of the course of darkness being obstructed.

4. Where indeed the gods of wealth (*Yakshas*) have tears proceeding from joy and from no other causes, no other pain than that

---

3. G1. यस्यां मत्त° for यत्रोन्मत्त°. P. °भ्रमरनिकराः for °भ्रमरमुखराः. K1. K2. G1. R. P. N. M. °रसना for °रशना P. G1. K1, R. N. M. °ज्योत्स्नाप्रतिहत° for °ज्योत्स्नाः प्रतिहत°.

4. G2. M. इष्टसंयोगसाध्यः for इष्टसंयोगसाध्यात्. P. G1. G2. K1. K2. R. N. M. अन्यत्र for अन्यस्मात्. P. G2. K1. R. N. M. न खलु च for न च खलु.

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ५ ॥

मेव नयनसलिलम् । अन्यैर्निमित्तैः शोकादिभिर्न । इष्टसंयोगेन प्रियजनसमागमेन साध्यान्निवर्तनीयात् । न त्वप्रतीकार्यादित्यर्थः । कुसुमशरजान्मदनशरजन्यतापादन्यस्तापो नास्ति । प्रणयकलहादन्यस्मात्कारणाद्विप्रयोगोपपत्तिर्विरहप्राप्तिरपि नास्ति । किं च यौवनादन्यद्वयो वार्धकं नास्ति खलु ॥ श्लोकद्वयं प्रक्षिप्तम् ॥

५. यस्यामिति । यस्यामलकायां यक्षा देवयोनिविशेषा उत्तमस्त्रीसहाया ललिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि वा । अत एव ज्योतिषां तारकाणां छायाः प्रतिबिम्बान्येव कुसुमानि तै रचितानि परिष्कृतानि ॥ " ज्योतिस्ताराग्निभाज्वालादृक्पुत्रार्थाध्वरात्मसु " इति वैजयन्ती ॥ एतेन पानभूमेरम्लानशोभत्वमुक्तम् । हर्म्यस्थलान्येत्य प्राप्य । त्वद्गम्भीरध्वनिरिव ध्वनिर्येषां तेषु पुष्करेषु वाद्यभाण्डमुखेषु ॥ " पुष्करं करिहस्ताग्रेवाद्यभाण्डमुखे जले " इत्यमरः ॥ शनकैर्मन्दमाहतेषु सत्सु ॥ एतच्च नृत्यगीतयोरप्युपलक्षणम् ॥ कल्पवृक्षप्रसूतं कल्पवृक्षस्य काङ्क्षितार्थप्रदत्वान्मध्वपि तत्र प्रसूतम् । रतिः फलं यस्य तद्रतिफलाख्यं मधु मद्यमासेवन्ते । आदृत्य पिबन्तीत्यर्थः ॥ " तालक्षीरसितामृतामलगुडोन्मत्तास्थिकालाह्वयादर्विन्द्रद्रुममोरटेक्षुकदलीगुग्गुलुप्रसूनैर्युतम् । इत्थं चेन्मधुपुष्पभङ्ग्युपचितं पुष्पद्रुमूलावृतं क्वाथेन स्मरदीपनं रतिफलाख्यं स्वादु शीतं मधु " इति मदिरार्णवे ॥

---

arising from the flower-arrowed God (Cupid) and removable by union with the desired (persons), where separation is brought about by no other cause than love-quarrels and where there is no other period of life than youth.

5. Where the *Yakshas* accompanied by best women repair to the chambers of (their) palaces made of crystals and adorned with flower-like reflections of stars, and taste (eagerly) the wine called *Ratiphala* produced from the *Kalpa* tree, whilst drums are being gently beaten, with sounds as deep as thine (are).

---

5. P. G2. K2. N. M. °रचनानि for °रचितानि. W. M. रतिरसम् for रतिफलम्. M. °गंभीरोद्घानिषु for °गंभीरध्वनिषु. M. P. मधुरं for शनकैः.

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६ ॥

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपा-
न्ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७ ॥

६. मन्दाकिन्या इति ॥ यत्रालकायाममरैः प्रार्थिताः । सुन्दर्य इत्यर्थः । कन्या यक्षकुमार्यः ॥ " कन्या कुमारिकानार्योः " इति विश्वः ॥ मन्दाकिन्या गङ्गायाः सलिलेन शिशिरैः शीतलैर्मरुद्भिः सेव्यमानाः सत्यः । तथानुतटं तटेषु रोहन्तीत्यनुतटरुहः ॥ क्विप् ॥ तेषां मन्दाराणां छाययानातपेन वारितोष्णाः शमितातपाः सत्यः कनकस्य सिकतासु मुष्टिभिर्निक्षेपेण गूढैः संवृतैरत एवान्वेष्टव्यैर्मृग्यैर्मणिभी रत्नैः संक्रीडन्ते ।गूढमणिसंज्ञया दैशिकक्रीडया सम्यक्क्रीडन्तीत्यर्थः ॥ " क्रीडोऽनुसंपरिभ्यश्च " इत्यात्मनेपदम् ॥ " रत्नादिभिर्वालुकादौ गुप्तैर्द्रष्टव्यकर्मभिः । कुमारीभिः कृता क्रीडा नाम्ना गूढमणिः स्मृता ॥ रासक्रीडा गूढमणिर्गुप्तकेलिस्तु लायनम् । पिच्छकन्दुकदण्डाद्यैः स्मृता दैशिककेलयः " इति शब्दार्णवे ॥

७. नीवीति ॥ यत्रालकायामनिभृतकरेषु चपलहस्तेषु प्रियेषु । नीवी व-

---

6. Where maidens sought (in marriage) by the Gods, waited upon (i. e. fanned) by the breezes cooled by the water of the *Ganges*, screened from the sun by the shade of the *Mandâra* trees growing on the banks, sport with jems which are (first) hidden by being thrust with closed hand amongst the golden sands and have (then) to be searched for.

7. Where the handfuls of powder, of the *Bimba—lipped* (women)

---

6. B. C1. M. पयसि for सलिल°. P. तटवन°, M. उपतट° for अनुतट°. M, G2. अमरैः for अमर°.

7. M. °उच्छ्वसन° for °उच्छ्वसित°. W. G1. G2. K1. K2. R. N. M. यक्षांगनानाम् for बिम्बाधराणाम्.; W. M. वासःकामात् for क्षौमं रागात्. W M. अभिमुखगतान् for अभिमुखमपि. G1. M. विफलप्रेरणः, M. विफलप्रेरितः, G1. G2. K1. K2. R. N. M. विफलः प्रेरितः for विफलप्रेरणा.

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां सलिलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशो जालमार्गै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥ ८ ॥

स्तनग्रन्थिः ॥ " नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससः " इति विश्वः ॥ नीवीति बन्धो नीवीबन्धः ॥ चूतवृक्षवदपौनरुक्त्यम् ॥ तस्योच्छ्वसितेन त्रुटितेन शिथिलं क्षौमं दुकूलं रागादाक्षिपत्स्वाहरत्सु सत्सु ह्रीमूढानां लज्जाविधुराणाम् । बिम्बं बिम्बिकाफलम् ॥ " बिम्बं फले बिम्बिकायाः प्रतिबिम्बे च मण्डले " इति विश्वः ॥ बिम्बमिवाधरो यासां तासां बिम्बाधराणां स्त्रीविशेषाणाम् । " विशेषाः कामिनीकान्ताभीरुबिम्बाधराङ्गनाः " इति शब्दार्णवे ॥ चूर्णस्य कुङ्कुमादेर्मुष्टिः । अर्चिभिर्मयूखैस्तुङ्गान् ॥ " अर्चिर्मयूखशिखयोः " इति विश्वः ॥ रत्नान्येव प्रदीपानभिमुखं यथा तथा प्राप्यापि विफलप्रेरणा दीपनिर्वापणाक्षमत्वान्निष्फलक्षेपा भवति ॥ अत्राङ्गनानां रत्नप्रदीपनिर्वापणप्रवृत्त्या मौग्ध्यं व्यज्यते ॥

८. नेत्रेति ॥ हे मेघ । नेत्रा प्रेरकेण सततगतिना सदागतिना वायुना ॥ " मातरिश्वा सदागतिः " इत्यमरः ॥ यद्विमानाग्रभूमीः यस्या अलकाया विमानानां सप्तभूमिकभवनानामग्रभूमीरुपरिभूमिका नीताः प्रापिताः । त्वामिव पश्यन्ति यान् ते त्वादृशः । त्वत्सदृशा इत्यर्थः ॥ " त्यदादिषु दृशोऽनालोचने कञ्च " इति कञ्प्रत्ययः ॥ जलमुचो मेघाः ॥ आलेख्यानां सचित्राणाम् ॥ " चित्रं

---

overcome by shame whilst their lovers with tremulous hands—cast aside, through passion, (their) silken garments loosened by the untying of their knots, are flung in vain at the high—lustred jewel—lamps, even though they (the handfuls) get them within their reach.

8. Being led by their guide the wind, to the palace-terraces of which (city), clouds like thee after causing harm with drops of water to the paintings (there) become at once overcome by fear as it were, and being skilled in imitating the escape of smoke,—depart, broken into parts, through the openings of lattices.

---

8. W.M. ये for यद्°. P. B. C1. C2. R. M. स्वजलकणिका°, K1. W. M. सजलकणिकाः, M. नवजलकणैः, N. स्वजलकणिकैः for सलिलकणिका°. M. जललवमुचः for इव जलमुचः. P. W. B. C1. C2. G1. G2. K1. N. M. त्वादृशा यत्र जालैः, R. M. त्वादृशा यंत्रजालैः for त्वादृशो जालमार्गैः. M. K2. °निपुणम् for °निपुणा. G2. R. M. निःपतंति for निष्पतंति.

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गिताना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चंद्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥९॥

लिखितरूपाद्यं स्यादालेख्यं तु यत्नतः । निर्मितं तु महाचित्रं" इति शब्दार्णवे ॥ सलिलकणिकाभिः जलकणैर्दोषं स्फोटनमुत्पाद्य सद्यः शङ्कास्पृष्टा इव सापराधत्वाद्भयाविष्टा इव ॥ "शङ्का वितर्कभययोः" इति शब्दार्णवे ॥ धूमोद्गारस्य धूमनिर्गमस्यानुकृतावनुकरणे निपुणाः कुशला जर्जरा विशीर्णाः सन्तो जालमार्गैर्गवाक्षरन्ध्रैर्निष्पतन्ति निष्क्रामन्ति ॥ यथा केनचिदन्तःपुरसंचारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापितास्तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य सद्यः साशङ्काः क्लृप्तवेशान्तरा जाराः क्षुद्रमार्गैर्निष्क्रामन्ति तद्वदिति ध्वनिः । प्रकृतार्थे शङ्कास्पृष्टा इवेत्युत्प्रेक्षा ॥

९. यत्रेति ॥ यत्रालकायां निशीथेऽर्धरात्रे ॥ "अर्धरात्रनिशीथौ द्वौ" इत्यमरः ॥ त्वत्संरोधस्य मेघावरणस्यापगमेन विशदैर्निर्मलैश्चन्द्रपादैश्चन्द्रमरीचिभिः ॥ "पादा रश्म्यङ्घ्रितुर्यांशाः" इत्यमरः ॥ स्फुटजललवस्यन्दिन उल्बणाम्बुकणस्राविणस्तन्तुजालावलम्बा वितानलम्बिसूत्रपुञ्जाधाराः । तद्गुणगुम्फिता इत्यर्थः । चन्द्रकान्ताश्चन्द्रकान्तमणयः । प्रियतमानां भुजैरुच्छ्वासितानि । श्रान्त्या जलसेकाय वा प्रशिथिलितान्यालिङ्गितानि यासां तासां स्त्रीणां सुरतजनिताङ्गग्लानिं शरीरखेदम् । अवयवानां ग्लानतामिति यावत् । व्यालुम्पन्त्यपनुदन्ति ॥

---

9. Where at midnight, the moon-gems hanging in net-works of thread and dropping particles of water bursting out through (the influence of) the moon's rays clear on the removal of thy obstruction, dispel the languor caused by amorous pleasures in the bodies of the women, with embraces loosened by the arms of their lovers.

---

9. G1. G2. K1. K2. R. N. M. °भुजालिंगनोच्छ्वासितानां, M. °भुजालिंगितोच्छ्वासितानां, B. C1. C2. M. °भुजोच्छ्वासितालिंगनानां for °भुजोच्छ्वासितालिंगितानाम्. G2. M. यंत्रजालावलम्बा for तन्तुजालावलम्बाः. P. इन्दुपादैर्निशीथे,. W. G1. G2. K1. N. M. प्रेरिताश्चन्द्रपादैः, M. चोदिताश्चन्द्रपादैः, M. प्रेरितैश्चन्द्रपादैः, M. चोदितैश्चन्द्रपादैः, M. द्योतितैश्चन्द्रपादैः, K2. M. द्योतिताश्चन्द्रपादैः, M. च्योतिताश्चन्द्रपादैः for चन्द्रपादैर्निशीथे. M. स्फुटनवजलस्पंदिनः, G2. K1. K2. N. R. M. स्फुटजललवस्पंदिनः, for स्फुटजललवस्यन्दिनः.

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥१०॥

१०. अक्षय्येति ॥ यत्रालकायाम् । क्षेतुं शक्याः क्षय्याः ॥ "क्षय्यजय्यौ शक्यार्थे" इति निपातः । ततो नञ्समासः ॥ भवनानामन्तरन्तर्भवनम् ॥ "अव्ययं विभक्ति—" इत्यादिनाव्ययीभावः ॥ अक्षय्या अन्तर्भवनं अन्तर्भवने निधयो येषां ते तथोक्ताः ॥ यथेच्छभोगसंभावनार्थमिदं विशेषणम् ॥ विबुधवनिता अप्सरसस्ता एव वारमुख्या वेश्यास्ता एव सहाया येषां ते तथोक्ताः॥ "वारस्त्री गणिका वेश्या रूपाजीवाथ साजनैः । सत्कृता वारमुख्या स्यात्" इत्यमरः ॥ बद्धालापाः संभावितसंलापाः कामिनः कामुकाः प्रत्यहमहन्यहनि ॥ "अव्ययं विभक्ति—" इत्यादिना समासः ॥ "अनश्च—" इति समासान्तष्टच् "अह्नष्टखोरेव—" इति टिलोपः ॥ रक्तो मधुरः कण्ठः कण्ठध्वनिर्येषां तैः सुन्दरकण्ठध्वनिभिर्धनपतियशः कुबेरकीर्तिमुद्गायद्भिरुच्चैर्गायनशीलैः । देवगायनस्य गान्धारग्रामत्वात्तारतरं गायद्भिरित्यर्थः ॥ किंनरैः सार्धं सह । विभ्राजस्येदं वैभ्राजम् । वैभ्राजमित्याख्या यस्य तद्वैभ्राजाख्यम् ॥ "विभ्राजेन गणेन्द्रेण जातं वैभ्राजमाख्यया" इति शंभुरहस्ये ॥ चैत्ररथस्य नामान्तरमेतत् । बहिरुपवनं बाह्योद्यानं निर्विशन्त्यनुभवन्ति ॥

---

10. Where the lovers possessed of inexhaustible treasures in their houses, accompanied by the celestial damsels (as) the best of harlots and engaged in conversation, enjoy every day the outer garden called *Vaibhrája*, along with the sweet-voiced *Kinnaras* singing aloud the glory of the God of wealth (*Kubera*).

---

10. G1. G2. K1. K2. R. N. M. अक्षीण° for अक्षय्य°. G1. G2. K1. K2. M. °भुवन° for °भवन°. M. बद्धालापाः, G1. G2. K1. K2. R. N. M. बद्धापानं for बद्धालापाः.

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ११ ॥

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम्।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ १२ ॥

११. गतीति ॥ यत्रालकायां कामिनीनामभिसारिकाणाम्। निशि भवो नैशो मार्गः सवितुरुदये सति गत्या गमनेनोत्कम्पश्चलनं तस्माद्धेतोरलकेभ्यः पतितैर्मन्दारपुष्पैः सुरतरुकुसुमैः। तथा पत्राणां पत्रलतानां छेदैः खण्डैः। पतितैरिति शेषः। तथा कर्णेभ्यो विभ्रश्यन्तीति कर्णविभ्रंशीनि तैः कनकस्य कमलैः॥ षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहेऽध्याहारदोषः। एवमन्यत्राप्यनुसंधेयम्॥ तथा मुक्ताजालैर्मौक्तिकसरैः। शिरोनिहितैरित्यर्थः। तथा स्तनयोः परिसरः प्रदेशस्तत्र छिन्नानि सूत्राणि येषां तैर्हारैश्च सूच्यते ज्ञाप्यते। मार्गपतितमन्दारकुसुमादिलिङ्गैरयमभिसारिकाणां पन्था इत्यनुमीयत इत्यर्थः॥

१२. मत्वेति ॥ यत्रालकायां मन्मथः कामः। धनपतेः कुबेरस्य सखेति

---

11. Where, at sunrise, the path of women (taken) at night, is indicated, by *Mandâr* flowers fallen from (their) hair owing to the shaking caused by walk, by pieces of leaves, and golden lotuses dropping from (their) ears, by strings of pearls, and necklaces, the threads of which are broken on the regions of their breasts.

12. Where *Cupid*, knowing the God (*Siva*) friend of the God of

---

11. B. C1. M. गत्योत्कंपात् for गत्युत्कंपात्. W. M. क्लृप्तच्छेदैः, G1. G2. K1. K2. R. N. M. पत्रच्छेद्यैः for पत्रच्छेदैः. W. M. °नलिनैः for °कमलैः.; G1. G2. K1. K2. R. N. M. °विस्रंसिभिः for विभ्रंशिभिः. M. मुक्तालग्नैः, G1. मुक्तालग्न° for मुक्ताजालैः. P. स्तनपरिचितच्छिन्न°, G1. लग्नस्तनपरिमलैश्छिन्न°, G2. M. °लग्नस्तनपरिसरच्छिन्न°, M. °जालस्तनपरिमलच्छिन्न°, K2. M. °लग्नस्तनपरिमलच्छिन्न°, K1. °जालस्तनपरिचयाच्छिन्न° for स्तनपरिसरच्छिन्न°.

12. P. G2. K1. K2. R. N. M. सभ्रूभंगं for सभ्रूभंग°. K2. M. कामलक्षेषु for कामिलक्ष्येषु. K2. M. अवन्ध्यैः for अमोघैः. W. M. चटुल° for चतुर°.

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥ १३ ॥

धनपतिसखः ॥ " राजाहःसखिभ्यष्टच् " ॥ तं देवं महादेवं साक्षाद्वसन्तं सखिस्नेहान्निजरूपेण वर्तमानं मत्वा ज्ञात्वा भयाद्धालेक्षणभयात्षट्पदा एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्येण न वहति न बिभर्ति ॥ कथं तर्हि तस्य कार्यसिद्धिरत आह—सभ्रूभङ्गेति ॥ तस्य मन्मथस्यारम्भः कामिजनविजयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैस्तथोक्तैः कामिन एव लक्ष्याणि तेष्वमोघैः । सफलप्रयोगैरित्यर्थः ॥ मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः ॥ चतुराश्च ता वनिताश्च तासां विभ्रमैर्विलासैरेव सिद्धो निष्पन्नः यदनर्थकरं। पाक्षिकफलं च तत्प्रयोगाद्वरं निश्चितसाधनप्रयोग इति भावः॥

" कचधार्यं देहधार्यं परिधेयं विलेपनम् । चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकम् " इति रसाकरे । तदेवैतदाह—

१३. वास इति ॥ यस्यामलकायां चित्रं नानावर्णं वासो वसनम् । परिधेयमण्डनमेतत् नयनयोर्विभ्रमाणामादेश उपदेशे दक्षम् । अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसंधेयम् तच्च मण्डनादिवद्देहधार्येऽन्तर्भाव्यम् । मधु मद्यम् । किसलयैः पल्लवैः सह पुष्पोद्भेदम् । उभयं चेत्यर्थः ॥ इदं तु कचधार्यम् । भूषणानां विकल्पान्विशेषान् । देहधार्यमेतत् । तथा चरणकमलयोर्न्यासस्य समर्पणस्य योग्यम् । रज्यतेऽनेनेति रागो रञ्जकद्रव्यम् । लाक्षैव रागस्तं लाक्षारागं

wealth (to be) living (there) in person does not, through fear, wield his bow with its string of bees (since) his purpose is accomplished by the very graceful movements of clever women,—never ineffectual, against lovers as their mark, (and) in which eyes are cast frowningly.

13. In which (*Alaka*) the *Kalpa* tree alone creates every decoration of women, (viz.) the many-coloured garment, the wine skilled in teaching graceful movements to the eyes, the opening of flowers with sprouts, various kinds of ornaments, and the lac-dye fit for application to the lotus-like feet.

13. M. °देशलक्षं for °देशदक्षं. G2. K2. R. M. किशलयैः for किसलयैः. P. विकल्पं, M. विशेषान् for विकल्पान्. P. यस्मिन् for यस्याम्.

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ १४ ॥

इदं चाङ्गरागादिविलेपनमण्डनोपलक्षणं ॥ सकलं सर्वम् । चतुर्विधमपीत्यर्थः । अबलामण्डनं योषित्प्रसाधनजातमेकः कल्पवृक्ष एव सूते जनयति । न तु नानासाधनसंपादनप्रयास इत्यर्थः ॥

इत्थमलकां वर्णयित्वा तत्र स्वभवनस्याभिज्ञानमाह—

१४. तत्रेति ॥ तत्रालकायां धनपतिगृहात् कुबेरगृहादुत्तरेणोत्तरस्मिन्नदूरदेशे । " एनबन्यतरस्यामदूरेऽपञ्चम्याः " इत्येनप्प्रत्ययः । " एनपा द्वितीया " इति द्वितीया ॥ " गृहाः पुंसि च भूम्न्येव " इत्यमरः ॥ धनपतिगृहादिति पाठे " उत्तरेण " इति नैनप्प्रत्ययान्तं किंतु " तोरणेन " इत्यस्य विशेषणं तृतीयान्तम् ॥ धनपतिगृहादुत्तरस्यां दिशि यत्तोरणं बहिर्द्वारं तेन लक्षितमित्यर्थः ॥ अस्माकमिदमस्मदीयम् ॥ " वृद्धाच्छः " इति छप्रत्ययः ॥ अगारं गृहम् । सुरपतिधनुश्चारुणा मणिमयत्वादभ्रंकषत्वाच्चेन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूराल्लक्ष्यं दृश्यम् । अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः ॥ अभिज्ञानान्तरमाह—यस्यागारस्योपान्ते प्राकारान्तःपार्श्वदेशे मे मम कान्तया वर्धितः पोषितः कृतकतनयः कृत्रिमसुतः ॥ पुत्रत्वेनाभिमन्यमान इत्यर्थः ॥ हस्तेन प्राप्यैर्हस्तावचेयैः स्तबकैर्गुच्छैर्नमितः ॥ " स्याद्गुच्छकस्तु स्तबकः " इत्यमरः ॥ बालो मन्दारवृक्षः कल्पवृक्षोऽस्तीति शेषः ॥

इतः परं पञ्चभिः श्लोकैरभिज्ञानान्तरमाह—

---

14. There to the north of *Kubêra's* building, (stands) my house visible from afar, by the arched-door-way as beautiful as the rain-bow;—close to which (house) is a young *Mandâra* tree bent down by the clusters of flowers, within reach of hand and reared by my wife as an adopted son.

---

14. W. M. अत्र for तत्र. P. W. G1. G2. K1. R. N. M. °गृहात् for °गृहात्. P. त्वदमरधनुः° K1. M. तदमरधनुः° for सुरपतिधनुः°. P. W. G1. G2. K1. R. K2. N. M. उद्याने for उपान्ते. P. M. वर्धितः कान्तया for कान्तया वर्धितः. M. °विनतः for °नमितः.

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः॥१५॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि॥ १६ ॥

१५. वापीति ॥ अस्मिन्मदीयागारे मरकतशिलाभिर्बद्धः सोपानमार्गो यस्याः सा तथोक्ता । विदूरे भवा वैदूर्याः ॥ " विदूराञ्ञ्यः " इति ञ्यप्रत्ययः ॥ वैदूर्याणां विकारा वैदूर्याणि ॥ विकारार्थेऽण्प्रत्ययः ॥ स्निग्धानि वैदूर्याणि नालानि येषां तैर्हैमैः सौवर्णैर्विकचकमलैश्छन्ना वापी च । अस्तीति शेषः ॥ यस्या वाप्यास्तोये कृतवसतयः कृतनिवासा हंसास्त्वां मेघं प्रेक्ष्यापि व्यपगतशुचो वर्षाकालेऽपि व्यपगतकलुषजलत्वाद्गतदुःखाः सन्तः संनिकृष्टं संनिहितम् । सुगममपीत्यर्थः । मानसं मानससरो नाध्यास्यन्ति नोत्कण्ठिष्यन्ति ॥ " आध्यानमुत्कण्ठास्मरणम् " इति काशिकायाम् ॥

१६. तस्या इति ॥ तस्या वाप्यास्तीरे पेशलैश्चारुभिः ॥ " चारौ दक्षे च पेशलः " इत्यमरः ॥ इन्द्रनीलै रचितशिखरः । इन्द्रनीलमणिमयशिखर इ-

15. And in it, there is a pool the way to which is a flight of steps made of emerald stones, and which is covered with blown golden lotuses with stalks (consisting) of glossy *Vaiduryas*; the swans residing in whose waters freed from sorrow, no longer long for the *Mânasa* (lake) which is near, even though they see thee.

16. On its bank stands a mountain of sport, the top of which is

15. P. स्फीता, K2. M. स्यूता for छन्ना. M. विकचकुसुमैः M. कनककमलैः, W. M. कमलमुकुलैः for विकचकमलैः. P. M. °दीर्घवैडूर्य°, G2. K1. K2. R. N. M. °स्निग्धवैडूर्य° for °स्निग्धवैदूर्य°. P. W. G1. G2. K1. K2. R. N. M. न ध्यास्यन्ति, M. न ध्यायन्ति for नाध्यास्यन्ति. P. प्राप्य for प्रेक्ष्य.

16. W. K2. M. यस्याः for तस्याः. P. विहित°, K2. M. निचित° for रचित°. W. K1. M. °कदलीवेष्टनः, R. N. M. °कदलावेष्टित° for °कदलीवेष्टन°. P. °स्फुटिततटितं for स्फुरिततडितं.

रक्ताशोकश्चलकिसलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥१७॥

त्यर्थः । कनककदलीनां वेष्टनेन परिधिना प्रेक्षणीयो दर्शनीयः क्रीडाशैलः अस्तीति शेषः ॥ हे सखे । उपान्तेषु प्रान्तेषु स्फुरितास्तडितो यस्य तं तथोक्तम् ॥ इदं विशेषणं कदलीसाम्यार्थमुक्तम् ॥ इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकमित्यनेन सूच्यते ॥ त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतोः । तस्य शैलस्य मद्गृहिणीप्रियत्वाद्धेतोरित्यर्थः ॥ कातरेण भीतेन चेतसा ॥ भयं चात्र सानन्दमेव । " वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात् । श्रवणात्कीर्तनाद्वापि सानन्दा भीर्यथा भवेत् " इति रसाकरे दर्शनात् ॥ तमेव क्रीडाशैलमेव स्मरामि ॥ एवकारो विषयान्तरव्यवच्छेदार्थः ॥ सदृशवस्त्वनुभवादिष्टार्थस्मृतिर्जायत इत्यर्थः । अत एवात्र स्मरणाख्योऽलंकारः । तदुक्तम्—" सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते" इति ॥ निरुक्तकारस्तु " त्वां तमेव स्मरामि" इति योजयित्वा मेघे शैलत्वारोपमाचष्टे। तदसंगतम्। अनार्जवात्। अद्याकारारोपस्य पुरोवर्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगायोगात् ॥ शैलत्वभावनास्मृतिरित्यपि नोपपद्यते। भावनायाः स्मृतित्वे प्रमाणाभावादनुभवायोगात्सादृश्योपन्यासवैयर्थ्याच्च । विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति ॥

१७. रक्तेति ॥ अत्र क्रीडाशैले कुरबका एव वृतिरावरणं यस्य तस्य । मधौ वसन्ते भवा माधव्यस्तासां मण्डपस्तस्यातिमुक्तलतागृहस्य ॥ " अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता " इत्यमरः ॥ प्रत्यासन्नौ संनिकृष्टौ

---

composed of beautiful sapphires and which is fine-looking on account of the enclosure of golden plantain trees; on seeing thee, O friend, with lightnings flashing about (thee), I recollect with a trembling heart, the self-same mountain as being dear to my wife.

17. Hereon are the red *Ashoka* with its waving sprouts, and the beautiful *Bakula* (tree), in the vicinity of the bower of the *Madhavi* (creepers) hedged in by *Kurabaka* plants; the former longs

---

17. W. G1. G2. K1. K2. R. N. M. °किशलयः for °किसलयः. W. M. तत्र for चात्र. W. M. प्रत्यासन्नः, M. प्रत्यासन्ने for प्रत्यासन्नौ. W. G2. K1. R. N. M. कुरुबक° for कुरबक°. K1. N. K2. M. वांछत्यन्यः for कांक्षत्यन्यः. P. वदनमादिराः for वदनमदिराम्. P. दौहद° for दोहद°.

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥१८॥

चलकिसलयश्चञ्चलपल्लवः । अनेन वृक्षस्य पादताडनाय प्राञ्जलित्वं व्यज्यते । रक्ताशोकः । रक्तविशेषणं तस्य स्मरोद्दीपकत्वादुक्तम् । " प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा । बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्धनः " इत्यशोककल्पे दर्शनात् ॥ कान्तः कमनीयः केसरो बकुलश्च ॥ " अथ केसरे । बकुलो वञ्जुलः " इत्यमरः ॥ स्त इति शेषः ॥ एकस्तयोरन्यतरः । प्राथमिकत्वादशोक इत्यर्थः । मया सह तव सख्याः । स्वप्रियाया इत्यर्थः ॥ वामपादाभिलाषी । दोहदच्छद्मनेत्यत्रापि संबन्धनीयम् ॥ स चाहं च अभिलाषिणाविित्यर्थः ॥ अन्यः केसरः । दोहदो वृक्षादीनां प्रसवकारणं संस्कारद्रव्यम् ॥ " तरुगुल्मलतादीनामकाले कुशलैः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदः स्यात्तु तत्क्रिया " इति शब्दार्णवे ॥ तस्य छद्मना व्याजेन ॥ " कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे " इत्यमरः । अस्यास्तव सख्या वदनमदिरां गण्डूषमद्यं कांक्षति ॥ मया सहेत्यत्रापि संबन्धनीयम् ॥ अशोकबकुलयोः स्त्रीपादताडनं गण्डूषमदिरा च दोहद इति प्रसिद्धिः ॥ " स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलः सीधुगण्डूषसेकात्पादाघातादशोकस्तिलककुरबकौ वीक्षणालिङ्गनाभ्याम् । मन्दारो नर्मवाक्यात्पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः " ॥

१८. तन्मध्य इति ॥ किं चेति चार्थः ॥ तन्मध्ये तयोर्वृक्षयोर्मध्येऽनति-

---

with me for thy friend's (i. e. my wife's) beautiful foot and the latter desires (with me) the wine from her mouth, under the pretext that it is an operation essential in causing their blossoming.

18. And between them, is a golden perch having a crystal slab and built at the bottom with jewels (emeralds) as shining as young bamboos; on which, at the close of day, sits thy blue-necked friend

---

18. M. तत्तन्मध्ये for तन्मध्ये च. G1. G2. K1. K2. R. N. M. स्फुटिकफलिका for स्फटिकफलका. M. नद्धा for बद्धा. P. M. सिञ्जद्वलय°, W. G2. K1. K2. R. N. M. शिञ्जद्वलय° for शिञ्जावलय°. G2. M. सभ्रूभंगे करतललयैर्नर्तितः, K1. सभ्रूभंगं करतललयैर्नर्तितः for तालैः शिञ्जावलयसुभगैर्नर्तितः. P. K1. W. M. कान्तया नर्तितः, M. नर्तितैः कान्तया for नर्तितः कान्तया.

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्॥१९॥

प्रौढानामनतिकठोराणां वंशानां प्रकाश इव प्रकाशो येषां तैस्तरुणवेणुसच्छायैर्मणिभिर्मरकतशिलाभिर्मूले बद्धा कृतवेदिकेत्यर्थः ॥ स्फटिकं स्फटिकमयं फलकं पीठ यस्याः सा । काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिर्निवासदण्डः । अस्तीति शेषः ॥ शिञ्जा भूषणध्वनिः ॥ " भूषणानां तु शिञ्जितम् " इत्यमरः॥ भिदादित्वादङ् ॥ शिञ्जिधातुरयं तालव्यादिर्न तु दन्त्यादिः ॥ शिञ्जाप्रधानानि वलयानि तैः सुभगा रम्यास्तैस्तालैः करतलवादनैर्मे मम कान्तया नर्तितो वो युष्माकं सुहृत्सखा नीलकण्ठो मयूरः ॥ " मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् " इत्यमरः ॥ दिवसविगमे सायंकाले यां यष्टिकामध्यास्ते । यष्ट्यामास्त इत्यर्थः ॥ " अधिशीङ्स्थासां कर्म " इति कर्मत्वाद्द्वितीया ॥ " तत्रागारम् " इत्यारभ्य पञ्चसु श्लोकेषु समृद्धवस्तुवर्णनादुदात्तालंकारः । तदुक्तम्—" तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते " इति ॥ न चैष स्वभावोक्तिर्भाविकं वा तत्र यथास्थितवस्तुवर्णनात् । अत्र तु " कविप्रतिभोत्थापितसंभाव्यमानैश्वर्यशालिवस्तुवर्णनादारोपितविषयत्वमिति ताभ्यामस्य भेदः " इत्यलंकारसर्वस्वकारः ॥

१९. एभिरिति॥ हे साधो निपुण॥ "साधुः समर्थो निपुणो वा " इति काशिकायाम् । हृदयनिहितैः । अविस्मृतैरित्यर्थः ॥ एभिः पूर्वोक्तैर्लक्षणैस्तोरणादिभिरभिज्ञानैर्द्वारोपान्ते ॥ एकवचनमविवक्षितम् ॥ द्वारपार्श्वयोरित्यर्थः ॥ लिखिते वपुषी आकृती ययोस्तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ ॥

(a peacock) made to dance by my wife with the clappings of the hands (rendered) charming by her jingling bracelets.

19. By means of these marks, treasured up in thy heart and on seeing *Sankha* & *Padma* (two of Kubera's treasures) whose figures are drawn on both the sides of the door, thou wilt, O clever one, recognise (my) house, now indeed with its lustre diminished by my absence; (for) at sunset, the lotus does not, forsooth, retain its beauty.

---

19. K1. K2. N. M. मनसि for हृदय° K2. M. लक्षणीयं for लक्षयेथाः. W. M. मन्द° for क्षाम°. M. K1. G1. N. R. अभिक्षां for अभिख्याम्.

गत्वा सद्यः कलभतनुतां शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
line खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ २० ॥

" निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेः " इत्यमरः ॥ दृष्ट्वा च नूनं सत्य-मधुनेदानीम् ॥ " अधुना " इति निपाः ॥ मद्वियोगेन मम प्रवासेन क्षाम-च्छायं मन्दच्छायमुत्सवापरमात्क्षीणकान्ति भवनं मद्गृहं लक्षयेथा निश्चिनुयाः । तथा हि । सूर्यापाये सति कमलं पद्मं स्वामात्मीयामभिख्यां शोभाम् ॥ " अ-भिख्या नामशोभयोः " इत्यमरः ॥ न पुष्यति नोपचिनोति खलु । सूर्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभत इत्यर्थः ।

निजगृहनिश्चयानन्तरं कृत्यमाह—

२०. गत्वेति ॥ हे मेघ । शीघ्रसंपात एव हेतुस्तस्य । शीघ्रप्रवेशार्थमि-त्यर्थः ॥ " षष्ठी हेतुप्रयोगे " इति षष्ठी ॥ " संपातः पतने योगे प्रवेशे वेदसं-विदोः" इति शब्दार्णवे ॥ सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावस्तामल्पशरीरतां गत्वा प्राप्य प्रथमकथिते " तस्यास्तीरे " इत्या दिना पूर्वोद्दिष्टे रम्यसानौ । निषदनयोग्य इत्यर्थः । क्रीडाशैले निषण्ण उपविष्टः सन् । अल्पाल्पा अल्पप्रकारा भाः प्रकाशो यस्यास्ताम् । " प्रकारे गुणवचनस्य " इति द्विरुक्तिः ॥ खद्योतानामाली तस्या विलसितेन स्फुरितेन निभां समानां वि-द्युदुन्मेषो विद्युत्प्रकाशः स एव दृष्टिस्तां भवनस्यान्तरन्तर्भवनं तत्र पतितां प्र-विष्टां कर्तुमर्हसि । यथा कश्चित्किंचिदन्विष्यन्क्वचिदुन्नते स्थित्वा शनैः शनै-स्तितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः ॥

संप्रति दृष्टिपातफलस्याभिज्ञानं श्लोकद्वयेनाह—

---

20. After assuming forthwith the size of a young elephant, for the purpose of quick entrance, thou, seated on the aforesaid beautiful-topped mountain of sport, shouldst be pleased to cast, inside the house, a glance in the form of a flash of lightning, of a very slight brilliancy and resembling the twinklings of a line of fireflies.

---

20. W. M. तत्परित्राण° for शीघ्रसंपात°. G2. M. °भासां for भासं. G2. M. °विलसन° for °विलसित°.

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥ २१॥

२१. तन्वीति ॥ तन्वी कृशाङ्गी । न तु पीवरी ॥ "श्लक्ष्णं दभ्रं कृशं तनु" इत्यमरः ॥ "वोतो गुणवचनात्" इति ङीष् ॥ श्यामा युवतिः ॥ "श्यामा यौवनमध्यस्था" इत्युत्पलमालायाम् ॥ शिखराण्येषां सन्तीति शिखरिणः कोटिमन्तः ॥ "शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु" इति विश्वः॥ शिखरिणो दशना दन्ता यस्याः सा । एतेनास्या भाग्यवत्त्वं पत्यायुष्करत्वं च सूच्यते । तदुक्तं सामुद्रिके—"स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वम् ॥ ताम्बूलरसरक्तेऽपि स्फुटभासः समोदयाः । दन्ताः शिखरिणो यस्याश्चिरं जीवति तत्पतिः" इति ॥ पक्वं परिणतं बिम्बं बिम्बिकाफलमिवाधरोष्ठो यस्याः सा पक्वबिम्बाधरोष्ठी ॥ शाकपार्थिवादित्वान्मध्यमपदलोपी समासः" इति वामनः ॥ "नासिकोदरोष्ठ—" इत्यादिना ङीष् ॥ मध्ये क्षामा । कृशोदरीत्यर्थः । चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता ॥ एतेनास्याः पद्मिनीत्वं व्यज्यते । तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे—"चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे" इति ॥ निम्ननाभिर्गम्भीरनाभिः ॥ अनेन नारीणां नाभिगाम्भीर्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते । श्रोणीभारादलसगमना मन्दगामिनी । न तु जघनदोषात् ॥ स्तनाभ्यां स्तोकनम्रेषदवनता । न तु वपुर्दोषात् ॥ युवतय एव विषयस्तस्मिन्युवतिविषये। युवतीरधिकृत्येत्यर्थः । धातुर्ब्रह्मण आद्या सृष्टिः प्रथमशिल्पमिव स्थितेत्युत्प्रेक्षा ॥ प्रथमनिर्मिता युवतिरियमेवेत्यर्थः ॥ प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्याद्यवि-

---

21. Slender, youthful, possessed of pointed teeth, and of lips like ripe *Bimba* (fruit), thin-waisted, possessed of eyes like those of a timid fawn, of deep navel, moving slowly on account of the weight of the hips, slightly bent down by the (two) breasts, (and) the first work, as it were, of the creator in the department of women;—who may be (of such a description) there.

---

21. G2. W. K1. R· N.M. शिखरदशना, G1.M. अशिखरिदशना for शिखरिदशना. M. अधरौष्ठी for अधरोष्ठी. M. क्षीणा for क्षामा. B. आस्ते for स्यात्. P. युवतिविषया for युवतिविषये. W. K1, M. आद्यैव for आद्येव.

तां जानीथाः परिमित ां शीघ्र ीवितं मे द्वितीयं
दूरीभूते मयि सह थते र ्वाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दि ु गच्छत्सु बालां
जातां मन्ये शिशिरम कर्तुं पद्मिनीं वान्यरूपाम् ॥२२॥

ां वि

शेषणम् । तथा चास्मिन्प्रपञ्चे न कु वेधरामणीयकं रमणीरत्नमस्तीति भावः । तदेवंभूता या स्त्री तत्रान्तर्भवने: याव । तत्र निवसेदित्यर्थः । तामित्युत्तरश्लोकेन संबन्धः ॥

२२. तामिति ॥ सहचरे सहचारिणि । अनेन वियोगासहिष्णुत्वं व्यज्यते । मयि दूरीभूते दूरस्थिते सति । सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव ॥ "जातेरस्त्रीविषयादयोपधात्" इति ङीष् ॥ परिमितकथां परिमितवाचम् । एकामेकाकिनीं स्थितां तामन्तर्भवनगतां मे द्वितीयं जीवितं जानीथाः ॥ जीविततुल्यां मत्प्रेयसीमवगच्छेरित्यर्थः । "तन्वी" इत्यादिपूर्वलक्षणैरिति शेषः ॥ लक्षणानामन्यथाभावभ्रममाशङ्क्याह—गाढेति ॥ गाढोत्कण्ठां प्रबलविरहवेदनाम् । "रागे त्वलब्धविषये वेदना महती तु या । संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः" इत्यभिधानात् ॥ बालां गुरुषु विरहमहत्त्वेषु वर्तमानेषु दिवसेषु गच्छत्सु सत्सु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव ॥ "इववद्वायथाशब्दौ" इति दण्डी ॥ अन्यरूपां पूर्वविपरीताकारां जातां मन्ये । हिमहतपद्मिनीव विरहेणान्यादृशी जातेति तर्कयामीत्यर्थः । एतावता नेयमन्येति भ्रमितव्यमिति भावः ॥

---

22. Thou canst know her, (who is) taciturn, (and) in the absence of me, her companion, solitary like a *Chakravâki*, to be my second life (i. e. my wife); I imagine (that) young woman (filled) with ardent longing, to have become changed in appearance like a lotus-plant-blighted by winter, during these heavy days that are (now) passing.

---

22. P. R. W. K1. K2. G1. G2. N. M. जानीया: for जानीथाः. P. गाढोत्कण्ठा for गाढोत्कण्ठाम्. P. बाला जाता for बालाम् जाताम्. P. °मथिता पद्मिनीवान्यरूपा for °मथितां पद्मिनीं वान्यरूपां. K1. G1. N. M. K2. तुहिन° for शिशिर°.

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमस[illegible]क्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनु[illegible]कान्तेर्बिभर्ति ॥ २३ ॥

२३. नूनमिति ॥ प्रबलरुदितेन [illegible] स्तब्धे स्थगुटितपुटे नेत्रे यस्य तत् ॥ उच्छूनेति श्वयतेः कर्तरि क्तः ॥ "अ[illegible]तश्च" इति निष्ठा नत्वम् । "वचिस्वपि–" इत्यादिना संप्रसारणम् । "संप्रसारणाच्च" इति पूर्वरूपत्वम् । "हलः" इति दीर्घः ॥ "च्छ्वोः शूडनुनासिके च" इति ऊठ् आदेशे कृते रूपसिद्धिरिति वर्तमानसामीप्यप्रक्रिया प्रामादिकीत्युत्प्रेक्षा । तथा सति धातोरिकारस्य गत्यभावादूडादेशे छ्वोरन्त्यत्वेन विशेषणाच्चेति ॥ एतेन विषादो व्यज्यते । निःश्वासानामशिशिरतयान्तस्तापोष्णत्वेन भिन्नवर्णो विच्छायोऽधरोष्ठो यस्य तत् । हस्ते न्यस्तं हस्तन्यस्तम् । एतेन चिन्ता व्यज्यते ॥ लम्बालकत्वात्संस्काराभावाल्लम्बमानकुन्तलत्वादसकलव्यक्त्यसंपूर्णाभिव्यक्ति तस्याः प्रियाया मुखं त्वदनुसरणेन त्वदुपरोधेन । मेघानुसरणेनेति यावत् । क्लिष्टकान्तेः क्षीणकान्तेरिन्दोर्दैन्यं शोच्यतां बिभर्ति । नूनमिति वितर्के ॥ "नूनं तर्केऽर्थनिश्चये" इत्यमरः ॥ पूर्ववत्तथापि न भ्रमितव्यमिति भावः ॥

सर्वविरहिणीसाधारणानि लक्षणानि संभावनयोत्प्रेक्ष्याणीत्याह "आलोके" इत्यादिभिस्त्रिभिः—

---

23. Possibly that loved one's fan resting on her hand, with eyes swollen on account of excessive weeping, with lips deprived of their colour on account of the heat of the sighs, and partly visible owing to the hair hanging (loosely over it) wears the wretched appearance of the moon whose beauty has been impaired by thy persecution.

---

23. G1. G2. N. M. °उत्सून° for °उच्छून°. P. M. बहूनां for प्रियायाः. W. M. हस्ते न्यस्तम् for हस्तन्यस्तम्. M. G2, त्वदुपसरण° for त्वदनुसरण°. M. बिभर्तु for बिभर्ति.

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ २४॥

२४. आलोकेति ॥ हे मेघ । सा मत्प्रिया । बलिषु नित्येषु प्रोषितागमनार्थेषु च देवताराधनेषु व्याकुला व्यापृता वा । विरहेण तनु कृशं भावगम्यम् । तत्काश्यर्यस्यादृष्टचरत्वात्संप्रति संभावनयोत्प्रेक्ष्यमित्यर्थः । मत्सादृश्यं मदाकारसाम्यम् । मत्प्रतिकृतिमित्यर्थः । यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाकारसाम्यं तथापि प्रतिकृतित्वेन विवक्षितमितरथालेख्यत्वासंभवात् । अक्षय्यकोशे " आलेख्येऽपि च सादृश्यम् " इत्यभिधानात् ॥ लिखन्ती कचित्फलकादौ विन्यस्यन्ती वा चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः ॥ एतच्च कामशास्त्रसंवादेन सम्यग्विवेचितमस्माभी रघुवंशसंजीविन्याम् " सादृश्यप्रतिकृतिदर्शनैः प्रियायाः " इत्यत्र । मधुरवचनां मंजुभाषिणीम् । अतएव पञ्जरस्थाम् । हिंस्रेभ्यः कृतसंरक्षणामित्यर्थः । सारिकां स्त्रीपक्षिविशेषम् । हे रसिक भर्तुः स्वामिनः स्मरसि कच्चित् ॥ " कच्चित्कामप्रवेदने " इत्यमरः ॥ भर्तारं स्मरसि किमित्यर्थः ॥ " अधीगर्थदयेशां कर्मणि " इति कर्मणि षष्ठी ॥ स्मरणे कारणमाह । हि यस्मात्कारणात्त्वं तस्य भर्तुः । प्रीणातीति प्रिया ॥ " इगुपधज्ञाप्रीकिरः कः " इति कप्रत्ययः ॥ अतः प्रेमास्पदत्वात्स्मर्तुमर्हसीति भावः । इत्येवं पृच्छन्ती वा ॥ वाशब्दो विकल्पे ॥ " उपमायां विकल्पे वा" इत्यमरः ॥ ते तवालोके दृष्टिपथे पुरा निपतति । सद्यो निपतिष्यतीत्यर्थः ॥ " स्यात्प्रबन्धे पुरातीते निकटागामिके पुरा " इत्यमरः ॥ " यावत्पुरानिपातयोर्लट् " इति लट् ॥

---

24. She will (just) come under thy notice, engaged in worship, or drawing my likeness emaciated by separation (and) conceivable in (her) imagination, or asking the sweet-voiced *Sarika* confined in the cage, " Do you, O sweet one remember your master, (i. e. my husband), for you were his pet. "

---

24. W. M. पुरे for पुरा. W. M. विरहतनुता° for विरहतनु वा P. M, मधुरवचनं for मधुरवचनां. W. M, K2. निभृते for रसिके.

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥२५॥

२५. उत्सङ्गेति ॥ हे सौम्य साधो । मलिनवसने । "प्रोषिते मलिना कृशा" इति शास्त्रादित्यर्थः ॥ उत्सङ्ग ऊरौ वीणां निक्षिप्य । मम गोत्रं नामाङ्कश्चिह्नं यस्मिंस्तन्मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा ॥ "गोत्रं नाम्नि कुलेऽपि च" इत्यमरः ॥ विरचितानि पदानि यस्य तत्तथोक्तं गेयं गानार्हं प्रबन्धादि ॥ "गीतम्" इति पाठे स एवार्थः ॥ उद्गातुमुच्चैर्गातुं कामो यस्याः सा ॥ "तुं काममनसोरपि" इति मकारलोपः ॥ देवयोनित्वाद्गान्धारग्रामेण गातुकामेत्यर्थः । तदुक्तम्— "षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं स लभ्यो देवयोनिभिः" इति ॥ तथा नयनसलिलैः प्रियतमस्मृतिजनितैरश्रुभिरार्द्रां तन्त्रीं कथंचित्कृच्छ्रेण सारयित्वा । आर्द्रत्वापहरणाय करेण प्रमृज्यान्यथा क्वणनासंभवादिति भावः । भूयो भूयः पुनः पुनः स्वयमात्मना कृतामपि । विस्मरणानर्हामपीत्यर्थः । मूर्च्छनां स्वरारोहावरोहक्रमम् । "स्वराणां स्थापनाः सान्ता मूर्च्छनाः सप्त सप्त हि" इति संगीतरत्नाकरे ॥ विस्मरन्ती वा । "आलोके ते निपतति" इति पूर्वेणान्वयः ॥ विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव ॥ तथा च रसरत्नाकरे— "वियोगायोगयोरिष्टगुणानां कीर्तनात्स्मृतेः । साक्षात्कारोऽथवा मूर्च्छा दशधा जायते तथा" इति ॥ मत्सादृश्यमित्यादिना मनःसङ्गानुवृत्तिः सूचिता ॥

---

25. Or having placed, O good one, the lute on her lap with a dirty garment, or desirous of singing a song in which words are arranged so as to have my name as their characteristic, (and) having somehow wiped the string wet with tears, forgetting often, and often, the air although made by herself.

---

25. G2. M. गीतं for गेयम्. P. W. M. तंत्रीरार्द्राः for तंत्रीमार्द्राम्. P. M. अधिकृताम् for अपि कृताम्.

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
संभोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ २६ ॥

२६. शेषानिति ॥ अथवा विरहस्य दिवसस्तस्मात्स्थापितस्य तत आरभ्य निश्चितस्यावधेरन्तस्य शेषान्गतावशिष्टान्मासान्देहलीदत्तपुष्पैः ॥ देहली द्वारस्याधारदारु ॥ "गृहावग्रहणी देहली" इत्यमरः ॥ तत्र दत्तानि राशित्वेन निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादिसंख्यानेन भुवि भूतले विन्यस्यन्ती वा । पुष्पविन्यासैर्मासान्गणयन्ती वेत्यर्थः ॥ यद्वा हृदये निहितो मनसि संकल्पित आरम्भ उपक्रमो यस्य तम् । अथवा हृदयनिहिता आरम्भाश्चुम्बनादयो व्यापारा यस्मिंस्तं संभोगं रतिमास्वादयन्ती वा । "आलोके ते निपतति" इति पूर्वेण संबन्धः ॥ ननु कथमयं निश्चय इत्याशङ्क्य अर्थान्तरन्यासेन परिहरति । प्रायेण बाहुल्येनाङ्गनानां रमणविरहेष्वेते पूर्वोक्ता विनोदाः कालयापनोपायाः । एतेन संकल्पावस्थोक्ता । तदुक्तम्—"संकल्पो नाथविषयमनोरथ उदाहृतः" इति ॥

---

26. Or counting on the floor with flowers placed at the threshold, the remaining months of the period settled (commencing) from the day of separation, or experiencing the pleasure of sexual intercourse (with me) the actions whereof are laid in the mind; these are generally the pastimes of women during separation from their husbands.

---

26. W. G1. G2. K1. K2. R. N. M. B. गमन,° M. मनसि for विरह°. K1. R. M. °दिवसे for दिवस°. M. °प्रस्थितस्य for °स्थापितस्य. P. G1. W. G2. K1. K2. R. N. M. °मुक्तपुष्पैः for °दत्तपुष्पैः. P. R. W. N. G1. G2. M. संयोगं वा, K1. K2. M. मत्संयोगं, M. संयोगे मे, B. M. मत्संभोगं, C1. C2. M. मत्संगं वा for संभोगं वा. P. M. °रचिता°, M. °विहिता° for °निहिता°. K1. W. R. G1. G2. N. M. आसादयन्ती for आस्वादयन्ती. W. M. °विरहे हि for °विरहेषु.

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ॥ २७ ॥

२७. सव्यापारामिति ॥ हे सखे । अहनि दिवसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं तं सखीं स्वप्रियां विप्रयोगो मद्विरहस्तथा तेन प्रकारेण ॥ " प्रकारवचने थाल् " इति थाल्प्रत्ययः ॥ न पीडयेत् । यथा रात्राविति शेषः ॥ किं तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुग्यस्यास्तां गुरुतरशुचमतिदुर्भरदुःखां शङ्के तर्कयामि ॥ " शङ्का वितर्कभययोः " इति शब्दार्णवे ॥ अतो निशीथेऽर्धरात्र उन्निद्रामुत्सृष्टनिद्राम् । अवनिरेव शयनं शय्या यस्यास्ताम् ॥ नियमार्थं स्थण्डिलशायिनीम् ॥ साध्वीं पतिव्रताम् ॥ " साध्वी पतिव्रता " इत्यमरः ॥ अतो नान्यथा शङ्कितव्यमिति भावः । तां त्वत्सखीं मत्संदेशैर्मद्वार्ताभिरलं पर्याप्तं सुखयितुमानन्दयितुं सौधवातायनस्थः सन्पश्य ॥ " सखा धात्री च पितरौ मित्रदूतशुकादयः । सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीम् " इति रसरत्नाकरे ॥ दूतश्चायं मेघ इति भावः ॥ अनेन जागरावस्थोक्ता ॥

पुनस्तामेव विशिनष्टि " आधिक्षामाम् " इत्यादिभिश्चतुर्भिः—

---

27. I fear that separation (from me) will not so afflict thy friend during the day-time when (she is) employed as (it will) during the night when (she is) without amusement (and therefore) in excessive grief; in order to cheer her up completely with messages from me, thou, standing at midnight, at the window of the mansion, shouldst behold the chaste one sleepless and having the ground for her bed.

---

27. K2. M. खेदयेत for पीडयेत. W. C1. C2. G1. N. R. G2. K1. M. K2. मद्वियोगः for विप्रयोगः. P. M. अतः for अलम्. W. M. °शयनां सन्नवातायनस्थः, P. B. K1. K2. M. °शयनां सद्मवातायनस्थः, G1. G2. R. N. M. °शयनासन्नवातायनस्थः for °शयनां सौधवातायनस्थः.

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २८ ॥

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥२९॥

२८. आधिक्षामामिति ॥ आधिना मनोव्यथया क्षामां कृशाम् ॥ "पुंस्याधिर्मानसी व्यथा" इत्यमरः ॥ क्षायतेः कर्तरि क्तः ॥ "क्षायो मः" इति निष्ठातकारस्य मकारः ॥ विरहे शयनं तस्मिन्विरहशयने । पल्लवादिरचित इत्यर्थः । संनिषण्णमेकं पार्श्वं यस्यास्ताम् । अत एव प्राच्याः पूर्वस्या दिशो मूले । उदयप्रान्त इत्यर्थः ॥ प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम् । कलामात्रं कलैव शेषो यस्यास्तां हिमांशोस्तनुं मूर्तिमिव स्थिताम् । तथा या रात्रिर्मया सार्धमिच्छया कृतानि रतानि तैः ॥ शाकपार्थिवादित्वान्मध्यमपदलोपी समासः ॥ क्षण इव नीता यापिता तां तज्जातीयामेव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमानामुष्णैरश्रुभिर्यापयन्तीम् ॥ यातेर्ण्यन्ताच्छतृप्रत्ययः ॥ "अर्तिह्री—" इत्यादिना पुगागमः ॥ स एव कालः सुखिनामल्पः प्रतीयते । दुःखिनां तु विपरीत इति भावः । एतेन कार्श्यावस्थोक्ता ॥

२९. पादानिति ॥ जालमार्गप्रविष्टान्गवाक्षविवरगतानमृतशिशिरानि

---

28. Worn out by mental agony, lying on one side on her bed of separation, resembling the disk of the moon which has only its sixteenth part remaining on the Eastern horizon, and passing in hot tears that very night made long by solitude, (yet) which was spent like a moment with me in unrestrained (indulgence of) pleasures.

29. Covering with the eyelashes heavy by tears of sorrow, the eye

---

28. W. M. सन्निकीर्णैक°, M. विप्रकीर्णैक° for सन्निषण्णैक°. P. K1. W. K2. G1. G2. R. N. M. क्षणमिव for क्षण इव. W. G1. G2. K1. N. M. °जनितैः, M. R. K2. °पतितैः for °महतीम्.

29. R. N. M. K1. K2. अभिमुखगतं for गतमभिमुखम्. P. G2. M. K1. K2. N. R. खेदाच्चक्षुः for चक्षुःखेदात्. M. सजल° for सलिल°. M. छादयित्वा for छादयन्तीम्.

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बम् ।
मत्संभोगः कथमुपनमेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥३०॥

न्दोः पादान्रश्मीन्पूर्वप्रीत्या पूर्वस्नेहेन । पूर्ववदानन्दकरा भविष्यन्तीति बुद्ध्येति भावः । अभिमुखं यथा तथा गतं तथैव संनिवृत्तं यथा गतं तथैव प्रतिनिवृत्तम् । तदा तेषामतीव दुःसहत्वादिति भावः । चक्षुर्दृष्टिं खेदात्सलिलगुरुभिरश्रुदुर्भरैः पक्ष्मभिश्छादयन्तीम् । अत एव साभ्रे दुर्दिनेऽह्नि दिवसे न प्रबुद्धां मेघावरणाद्विकसितां न सुप्तामहरित्यमुकुलिताम् ॥ उभयत्रापि नञर्थस्य नशब्दस्य सुप्सुपेति समासः ॥ स्थलकमलिनीमिव स्थिताम् । एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता ॥

३०. निःश्वासेति ॥ शुद्धस्नानात्तैलादिरहितस्नानात्परुषं कठिनस्पर्शं नूनं निश्चयेनागण्डलम्बम् ॥ सुप्सुपेति समासः ॥ अलकं चूर्णकुन्तलान् ॥ जातावेकवचनम् ॥ अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन । उष्णेनेत्यर्थः ॥ क्लिश्यतेर्ण्यन्तात्क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः ॥ निःश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि । साक्षात्संभोगासंभवादिति भावः । मत्संभोगः कथं केन प्रकारेणोपनमेदागच्छेत् । इ-

---

which, out of previous friendship, turns towards the moon's rays cold as nectar, (and) entering through the apertures of the lattices, and immediately turns away, (and so) resembling the *Sthala-Kamalinī* (plant) on a cloudy day, when it is neither open nor shut.

30. Throwing aside with a sigh afflicting (by its heat) her shoot-like lip, the hair, rough owing to their being merely washed and actually hanging down (loosely) over her cheeks, and longing for sleep, opportunity for which is prevented by the gushing forth of tears, thinking how enjoyment with me, even in a dream could be had.

---

30. M. विश्वासेन for निःश्वासेन. G1. G2. R. N. M. K1. K2. आगण्डलम्बि for आगण्डलम्बम्. P. W. R. G1. G2. K1. K2. N. M. मत्संयोगः for मत्संभोगः. C1. P. C2. M. B. कथमुपनयेत्, R. G1. G2. K1. M. N. K2. सुखमुपनयेत्, M. कथमपि भवेत्, W. M. क्षणमपि भवेत्. for कथमुपनमेत्. P. C1. C2. B. G1. G2. K1. K2. R. N. M. उपनयेत् for उपनमेत्. M. स्वप्नगोष्ठीविनिद्रां for स्वप्नजोऽपीति निद्रां M. °रुद्धाश्रुवृत्त्या for °रुद्धावकाशाम्.

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ३१ ॥

त्याशयेनेति शेषः ॥ इतिनैवोक्तार्थत्वादप्रयोगपौनरुक्त्यादित्याशंकानिरासः । प्रार्थनायां लिङ् ॥ नयनसलिलोत्पीडेनाश्रुप्रवृत्त्या रुद्धावकाशामाक्रान्तस्थानाम् । दुर्लभामित्यर्थः । निद्रामाकाङ्क्षन्तीम् । स्नेहातुरत्वादिति भावः ॥ अत्राश्रुविसर्जनेन लज्जात्यागो व्यज्यते ॥

३१. आद्य इति ॥ आद्ये विरहदिवसे दाम मालां हित्वा त्यक्त्वा या शिखा बद्धा ग्रथिता शापस्यान्ते विगलितशुचा वीतशोकेन मयोद्वेष्टनीयां मोचनीयाम् स्पर्शक्लिष्टां स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः । कठिना च सा विषमा निम्नोन्नता च ताम् ॥ खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया " विशेषणं विशेष्येण बहुलम् " इति समासः ॥ एकवेणीमेकीभूतवेणीम् ॥ " पूर्वकाल—" इत्यादिना तत्पुरुषः॥ तथाभूतां तां शिखाम् । अयमिता अकर्तितापान्ता नखा यस्य तेन करेण गण्डाभोगात्कपोलविस्तारादसकृन्मुहुर्मुहुः सारयन्तीमपसारयन्तीम् । " तां पश्य " इति पूर्वेण संबन्धः । असकृत्सारणाच्चित्तविभ्रमदशा सूचिता ॥

---

31. Pushing aside often and often from the region of her cheeks, with her hand with nails unpared, that single-braided, hard and rough knot of hair painful to the touch, which was tied up on the first day of separation after the garland being laid aside, and which is to be untwisted by me freed from sorrow at the termination of (the period of) curse.

---

31. W. M. G1. या, G2. K1. K2. R. N. M. सा for ताम्. K1. W. R. G1. G2. M. N. मयोद्वेष्टनीया, M. K2. मयोन्मोचनीया for मयोद्वेष्टनीयाम्. M. G1. अपमित for अयमित°. G1. G2. K1. R. N. M. सारयन्ती for सारयन्तीं M. गल्लाभोगात् for गण्डाभोगात्. K2. M. कलुषविषमां for कठिनविषमां. M. G2. °विषमात् for °विषमाम्.

सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ३२ ॥

३२. सेति ॥ अबला दुर्बला संन्यस्ताभरणं कृशत्वात्परित्यक्ताभरणमसकृदनेकशो दुःखदुःखेन दुःखप्रकारेण ॥ " प्रकारे गुणवचनस्य " इति द्विर्भावः ॥ शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती ॥ अनेनात्यन्ताशक्तया मूर्च्छावस्था सूच्यते ॥ सा त्वत्सखी त्वामपि नवजलमयं नवाम्बुरूपमस्रं बाष्पमवश्यं सर्वथा मोचयिष्यति ॥ " द्विकर्मसु पचादीनामुपसंख्यानम् " इति मुचेः पचादित्वाद्द्विकर्मकत्वम् ॥ तथा हि । प्रायः प्रायेणार्द्रान्तरात्मा मृदुहृदयः । मेघस्तु द्रवान्तःशरीरः । सर्वः करुणा करुणामयी वृत्तिरन्तःकरणवृत्तिर्यस्य स करुणावृत्तिर्भवति । अस्मिन्नवसरे सर्वथा त्वया शीघ्रं गन्तव्यमनन्तरदशापरिहारायेति संदर्भाभिप्रायः ॥ ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्यावस्थान्तराण्येव तत्रभवान्कविरादृतवान् । उच्यते—" संभोगो विप्रलम्भश्च द्विधा शृङ्गार उच्यते । संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ॥ पूर्वानुरागमानाख्यप्रवासकरुणात्मना । विप्रलम्भश्चतुर्धात्र प्रवासस्तत्र च त्रिधा ॥ कार्यतः संभ्रमाच्छापादस्मिन्काव्ये तु शापजः । प्रागसंगतयोर्यूनोः सति पूर्वानुरञ्जने ॥ चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा ॥ दृङ्मनःसङ्गसंकल्पा जागरः कृशता रतिः । ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश ॥ पूर्वसंगतयोरेव प्रवास इति कारणात् । न तत्र पूर्ववच्चक्षुःप्रीतिरुत्पत्तिमर्हति ॥ हृत्सङ्गस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते । अन्याश्च पूर्ववद्ग्राह्या इति तावद्व्यवस्थितिः ॥ वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा । हृत्सङ्गादिरिहाचष्ट कविरष्टाविति स्थितिः ॥ मत्सादृश्यं लिखन्तीति पद्येऽस्मिन्प्रतिपादिता । चक्षुःप्रीतिरिति प्रोक्तं निरुत्तरकृताननम् ॥ चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात् । यथा मालविकारूपमग्निमित्रस्य पश्यतः ॥ प्रोषितानां च भर्तॄणां क

32. That woman bearing a body delicate, void of ornaments, and placed again and again with intense distress in the middle of the bed, will assuredly cause even thee to drop a tear of fresh water; for, every tender-hearted person is as a rule of a compassionate disposition.

32. P. M. पेलवं, W. K1. N. M. कोमलं for पेशलं. N. W. R. M. अश्रु, G1. G2. K1. K2. M. अश्रं for अस्रं. W. M. जललव°, M. K1. जलकण° for नवजल°.

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥३३॥

दृष्टादृष्टपूर्वता अथ तत्रापि संदेहे सकलत्राणि पृच्छतु ॥ किं भर्तृप्रत्यभिज्ञा स्यात्किं वैदेशिकभावना । प्रवासादागते स्वस्मिन्नित्यलं कलहैर्वृथा " इति ॥

नन्वीदृशीं दशामापन्नेति कथं त्वया निश्चितमत आह—

३३. जान इति ॥ हे मेघ । तव सख्या मनो मयि संभृतस्नेहं संचितानुरागं जाने । अस्मात्स्नेहज्ञानकारणात्प्रथमविरहे । प्रथमग्रहणं दुःखातिशयद्योतनार्थं । तां त्वत्सखीमित्थंभूतां पूर्वोक्तावस्थामापन्नामहं तर्कयामि ॥ ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह—वाचालमिति ॥ सुभगमात्मानं मन्यत इति सुभगंमन्यः ॥ " आत्ममाने खश्च " इति खश्प्रत्ययः । " अरुर्द्विषद्–" इत्यादिना मुमागमः ॥ तस्य भावः सुभगंमन्यभावः । सुभगमानित्वं मां वाचालं बहुभाषिणं न करोति खलु । सौन्दर्याभिमानान्न प्रलपामीत्यर्थः ॥ " स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् " इत्यमरः ॥ "आलजाटचौ बहुभाषिणि" इत्यालच्प्रत्ययः ॥ किंतु हे भ्रातः । मयोक्तं यत् " आधिक्षामाम् " इत्यादि तन्निखिलं सर्वमचिराच्छीघ्रमेव ते तव प्रत्यक्षम् । भविष्यतीति शेषः ॥

---

33. I know that thy friend's heart is full of affection for me, I therefore conclude her to have so become during this separation for the first time. It is not a high opinion of my amiability that makes (so) boastful; all that I have said will ere long be before thine eyes, O brother.

---

33. G1. G2. M. सुभगं मन्यमानः, M. G1. सुभगं मन्युभावं, M. G2. सुभगं मत्प्रभावः for सुभगं मन्यभावः. M. G2. त्वत्सखीं for तामहं. M. तव, M. यत् for ते. M. ते, M. तत् for यत्. B. G1. M. G2. सकलं for निखिलं.

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ३४ ॥
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या।
संभोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥३५॥

३४. रुद्धेति ॥ अलकै रुद्धा अपाङ्गयोः प्रसरा यस्य तत्तथोक्तं । अंजनेन स्नेहः स्नैग्ध्यं तेन शून्यम्। अपिच किंच मधुनो मद्यस्य प्रत्यादेशान्निराकरणात्। परित्यागादित्यर्थः ॥ "प्रत्यादेशो निराकृतिः" इत्यमरः ॥ विस्मृतो भ्रूविलासो भ्रूभङ्गो येन तत् । नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः। त्वय्यासन्ने सति । स्वकुशलवार्ताशंसिनीति शेषः । उपर्यूर्ध्वभागे स्पन्दते स्फुरती-त्युपरिस्पन्दि । तथा च निमित्तनिदाने—"स्पन्दान्मूर्ध्नि च्छत्रलाभं ललाटे पट्टमंशुकम् । इष्टप्राप्तिं दृशोरूर्ध्वमपाङ्गे हानिमादिशेत्" इति ॥ मृगाक्ष्या-स्त्वत्सख्या नयनम् । वाममिति शेषः । "वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दाने देवादिपूजायां स्पन्देऽलंकरणेऽपि च" इति स्त्रीणां वामभाग-प्राशस्त्यात् ॥ मीनक्षोभान्मीनचलनाच्चलस्य कुवलयस्य श्रियाः शोभायास्तुलां सादृश्यमेष्यतीति शङ्के तर्कयामि ॥ "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्या-म्"—इत्यत्र सदृशपर्यायस्य तुलाशब्दस्य प्रतिषेधादत्र च सादृश्यवाचित्वा-त्तद्योगेऽपि तृतीया ॥

३५. वाम इति ॥ मदीयैः कररुहपदैर्नखपदैः ॥ "पुनर्भवः कररुहो नखो-

34. I think that the eye of the deer-eyed one, with the movements of its outer-corners obstructed by the hair, devoid of the moisture of collyrium, forgetful of the sportings of the eyebrows, owing to the rejection of wine and throbbing in its upper part at thy approach, will bear comparison to the beauty of a lotus trembling on account of the motion of fish.

35. And her left thigh, abandoned by the marks of my nails, made

34. M. K1. अपरि° for उपरि°. B. G1. M. G2. °स्यन्दि for °स्पन्दि. W. G1. M. G2. °क्षोभाकुल° for °क्षोभाच्चल°.

35. K2. M. G2. वा for च. W. M. G1. चिरविरचितं, M. नवपरिचितं. for चिरपरिचितं. M. G2. °संवाहनस्य for °संवाह-नानाम्. W. M. K2. कनक°, M. सरल° for सरस°. P. M. G2. °गर्भगौरः for °स्तम्भगौरः.

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथंचि-
त्सद्यःकण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३६ ॥

ऽस्त्री नखरोऽस्त्रियाम् " इत्यमरः ॥ मुच्यमानः परिहीयमाणः । नखाङ्करहित इत्यर्थः । ऊर्वोर्नखपदास्पदत्वं तु रतिरहस्ये—"कण्ठकुक्षिकुचपार्श्वभुजोरःश्रोणिसक्थिषु नखास्पदमाहुः " इति ॥ चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः । संप्रति नखपदोष्माभावेन शीतोपचारस्य तस्य वैयर्थ्यादिति भावः ॥ त्यजतेर्ण्यन्तात्कर्मणि क्तः । " द्विकर्मसु पचादीनां चोपसंख्यानमिष्यते " इति पचादित्वाद्द्विकर्मकत्वम् ॥ संभोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम् ॥ "संवाहनं मर्दनं स्यात्" इत्यमरः ॥ समुचितो योग्यः ॥ सरसो द्रवभावः परिपक्वो न शुष्कश्च विवक्षितः । तत्रैव पाण्डिमसंभवात् । स चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः ॥ " गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि च " इति मालतीमालायाम्॥ अस्याः प्रियाया वाम ऊरुश्चलत्वं स्पन्दनं यास्यति प्राप्स्यति ॥ " ऊरोः स्पन्दाद्रतिं विद्यादूर्वोः प्राप्तिं सुवाससः" इति निमित्तनिदाने ॥

३६. तस्मिन्निति ॥ हे जलद । तस्मिन्काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया तादृशी स्याद्यदि स्याच्चेत् । एनां निद्राणामन्वास्य । पश्चादासित्वेत्यर्थः ॥ उपसर्गवशात्सकर्मकत्वम् । स्तनितविमुखो गर्जितपराङ्मुखो निःशब्दः सन् । अन्यथा निद्राभङ्गः स्यादिति भावः । याममात्रं प्रहरमात्रम् ॥ " द्वौ यामप्रहरौ समौ " इत्यमरः ॥ सहस्व प्रतीक्षस्व ॥ प्रार्थनायां लोट् ॥ शक्तयोरेकवारसुरतस्य यामावधिकत्वात्स्वप्नेऽपि तथा भवितव्यमित्यभिप्रायः । तथा

by the force of fate, to give up the long-worn pearl-string, accustomed to be shampooed by my hands after enjoyment and fair as the juicy stem of a plantain tree, will have palpitations in it.

36. If at that time (i. e. the time of thy approach), O cloud, she should be enjoying sleep, wait for three hours by sitting near her without making a noise; (for) when she has with difficulty found me her husband in a dream, let not her close embrace be one with the knot of her creeper- like arms dropping suddenly from the neck.

36. W. G1. G2. R. N. M. K1. K2. तत्रासीनः, M. अन्वासीनः for अन्वास्यैनाम्. W. M. सहेथाः, M. क्षमस्व for सहस्व. P. M. G2. जने for मयि.

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३७ ॥

च रतिसर्वस्वे—" एकवारावधिर्यामो रतस्य परमो मतः । चण्डशक्तिमतोर्यूनोरुद्भटक्रमवर्तिनोः " इति ॥ यामसहनस्य प्रयोजनमाह—मा भूदिति ॥ अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथंचित्कृच्छ्रेण स्वप्नलब्धे सति गाढोपगूढं गाढालिङ्गनम् ॥ नपुंसके भावे क्तः॥ सद्यस्तत्क्षणं कण्ठाच्च्युतः स्रस्तो भुजलतयोर्ग्रन्थिर्बन्धो यस्य तन्मा भून्मास्तु । कथंचिल्लब्धस्यालिङ्गनस्य विघातो मा भूदित्यर्थः । न चात्र निद्रोक्तिः " तामुन्निद्राम् " इति पूर्वोक्तेन निद्राच्छेदेन विरुध्यते पुनः सप्तम्याद्यवस्थासु पाक्षिकनिद्रासंभवात् ॥ तथा च रसरत्नाकरे—" अशक्ती रोदनं निद्रा निर्लज्जानर्थवाग्भ्रमः ॥ सप्तमादिषु जायन्ते दशाभेदेषु वासुके " इति ॥

३७. तामिति ॥ तां प्रियां स्वस्य जलकणिकाभिर्जलबिन्दुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य । एतेन तस्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते । यथाह भोजराजः—" मृदुभिर्मर्दनैः पादे शीतलैर्व्यजनैः स्तनौ । श्रुतौ च मधुरैर्गीतैर्निद्रातो बोधयेत्प्रभुम् " इति ॥ अभिनवैर्नूतनैर्मालतीनां जालकैः समं जातीकुड्मलैः सह ॥ "सुमना मालती जातिः" इति । " साकं सत्रा समं सह" इति । " क्षारको जालकं क्लीबे कलिका कोरकः पुमान् " इति चामरः ॥ प्रत्याश्वस्तां सुस्थिताम् । शिशिरानिलसंपर्कात्पुनरुज्जीवितामित्यर्थः ॥ श्वसेः

37. Having roused that proud one by means of a breeze cooled by drops of thy water, thou with (thy) lightning hidden (in thee) and becoming steady, shouldst begin to address her refreshed along with the fresh buds of the *Málati* (creepers) and with her eyes rivetted on the window occupied by thee, with words of thunder.

37. P. M. प्रोत्थाप्यैनां for तामुत्थाप्य. M. स्वजल° for स्वजल°. R. M. प्रत्यस्वस्थां for प्रत्याश्वस्तां. K2. M. मालतीनां रजोभिः for जालकैर्मालतीनां. P. विद्युद्गर्भे स्तिमितनयनां, W. M. विद्युत्कंपस्तिमितनयनां, M. विद्युन्नेत्रस्तिमितनयनां, G2. M. K1. K2. विद्युद्गर्भे स्तिमितनयनां, M. विद्युद्गर्भे स्तनितनयनां, M. विद्युद्गर्भो निहितनयनां for विद्युद्गर्भः स्तिमितनयनां, P. M. धीरस्तनितवचनः, G1. W. G2. M. K1. K2. N. R. धीर स्तनितवचनैः, M. धीर ध्वनितवचनैः for धीरः स्तनितवचनैः.

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्संदेशैर्हृदयनिहितैरागतं त्वत्समीपम् ॥
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥३८॥

कर्तरि क्तः । " आदितश्च " इति चकारादिट्प्रतिषेधः ॥ एतेनास्याः कुसुमसौकुमार्यं गम्यते ॥ त्वत्सनाथे त्वत्सहिते ॥ "सनाथं प्रभुमित्याहुः सहिते चित्ततापिनि " इति शब्दार्णवे ॥ गवाक्षे स्तिमितनयनां कोऽसाविति विस्मयान्निश्चलनेत्रां मानिनीं मनस्विनीम् । अनौचित्यासहिष्णुमित्यर्थः । विद्युद्गर्भोऽन्तःस्था यस्य स विद्युद्गर्भः । अन्तर्लीनविद्युत्क इत्यर्थः ॥ " गर्भोऽपवरकेऽन्तःस्थे गर्भोऽग्नौ कुक्षिगेऽर्भके " इति शब्दार्णवे । दृष्टिप्रतिघातेन वक्तुर्मुखावलोकनप्रतिबन्धकत्वान्न द्योतितव्यमिति भावः । धीरो दृढः सन् । अन्यथाशीलत्वादिनैतद्नाश्वासनप्रसंगादिति भावः । स्तनितवचनैः स्तनितान्येव वचनानि तैर्वक्तुं प्रक्रमेथा उपक्रमस्व ॥ विध्यर्थे लिङ् ॥ " प्रोपाभ्यां समर्थाभ्याम् " इत्यात्मनेपदम् ॥

संप्रति दूतस्य श्रोतृजनाभिमुखीकरणचातुरीमुपदिशति—

३८. भर्तुरिति ॥ विधवा गतभर्तृका न भवतीत्यविधवे सभर्तृके । अनेन भर्तृजीवनसूचनादनिष्टागमशङ्कां निरस्यति । मां भर्तुस्तव पत्युः प्रियं मित्रं प्रियसुहृदम् । तत्रापि हृदयनिहितैर्मनसि स्थापितैस्तत्संदेशैस्तस्य भर्तुः संदेशैस्त्वत्समीपमागतम् । भर्तृसंदेशकथनार्थमागतमित्यर्थः । अम्बुवाहं मेघं विद्धि जानीहि ॥ न केवलमहं वार्ताहरः किंतु घटकोऽपीत्याशयेनाह ॥ योऽम्बुवाहो मेघः । अबलानां स्त्रीणां वेणयस्तासां मोक्षे मोचन उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनाम् । पान्थानामित्यर्थः । वृन्दानि संघान् मन्द्रैर्गम्भीरैरत एवस्निग्धैर्मधुरैर्ध्वनिभिर्गर्जितैः । करणैः । त्वरयति । पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः ॥

भर्तृसख्यादिज्ञापनस्य फलमाह—

---

38. Oh thou, whose husband is living, know me (to be) thy husband's dear friend come to thee with his messages stored up in my mind,—a cloud which, by its deep and pleasant thunders urges, on the way, the crowds of wearied travellers, eager to loosen their wives, braids of hair.

---

38. P. M. अभिदये for अविधवे. W. M. तत्संदेशान्मनसि निहितात्, M. त्वत्संदेशान्मनसि निहितात्, M. तत्संदेशाद्हृदयनिहितात्. P. G2. K2. R. N. M. G1. तत्संदेशैर्मनसि निहितै for तत्संदेशैर्हृदयनिहितैः. M. सान्द्र°, M. मन्त्र° for मन्द्र° M. मन्द्रस्निग्धध्वानिभिः for मन्द्रस्निग्धैर्ध्वनिभिः.

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव ।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः संगमात्किंचिदूनः ॥३९॥

३९. इतीति ॥ इत्येवमाख्याते सति पवनतनयं हनूमन्तं मैथिलीव सीतेव सा मत्प्रिया । उन्मुख्युत्कण्ठयौत्सुक्येनोच्छ्वसितहृदया विकसितचित्ता सती त्वां वीक्ष्य संभाव्य सत्कृत्य च । अस्माद्भर्तृमैत्रीज्ञानात्परं सर्वं श्रोतव्यम् । अवहितामत्ता सती श्रोष्यत्येव ॥ अत्रसीताहनूमदुपमानादस्याः पातिव्रत्यं मेघस्य दूतगुणसंपतिश्च व्यज्यते । तद्गुणास्तु रत्नाकरे—"ब्रह्मचारी बली धीरो मायावी मानवर्जितः । धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेत्" इति ॥ ननु वार्तामात्रश्रवणादस्याः को लाभ इत्याशङ्क्यार्थान्तरं न्यस्यति । हे सौम्य साधो । सीमन्तिनीनां वधूनाम् ॥ "नारी सीमन्तिनी वधूः" इत्यमरः ॥ सुहृदा सुहृन्मुखेनोपगतः प्राप्तः सन् । सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम् । कान्तस्योदन्तो वार्ता कान्तोदन्तः ॥ "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः ॥ संगमात्कान्तसंपर्कात्किंचिदून ईषदूनस्तद्वदेवानन्दकारीत्यर्थः ॥

संप्रति संदिशति—

---

39. When so much has been said, she, with her face uplifted and her heart thrilled by eagerness will look at and honour thee, as *Maithili* (Sîtá) did the son of wind (Hanumân); and after this will of course listen to thee attentively; (for) to women, O gentle one, news about (their) husbands received from friends, falls very little short of an actual meeting.

---

39. M. G2. °तनये for °तनयम्. W. G1. G2. K1. K2. N. M. संभाष्य चैवं for संभाव्य चैव. P. परमवहितं K2. M. परमपि हितं for परमवहिता. P. कान्तोपान्तात्सुहृदुपगमः for कान्तोदन्तः सुहृदुपगतः. M. °उपनतः, G1. G2. K1. N. M. K2. °उपहृतः for उपगतः.

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ ४० ॥

४०. हे आयुष्मन् ॥ प्रशंसायां मतुप् ॥ परोपकारश्लाघ्यजीवितेत्यर्थः । मम वचनं प्रार्थनावचनं तस्माच्चात्मनः स्वस्योपकर्तुं च । परोपकारेणात्मानं कृतार्थयितुमित्यर्थः ॥ उपकारक्रियां प्रति कर्मत्वेऽपि तस्यानुकरोतीत्यादिवत्संबन्धमात्रविवक्षायामात्मन इति षष्ठी न विरुध्यते । यथाह भारविः—" सा लक्ष्मीरुपकुरुते यया परेषाम् " इति । तथा श्रीहर्षश्च—" साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् । न कुतूहलिकस्य मनश्चरितं च महात्मनां श्रोतुम्" इति । तथा च " क्वचित्क्वचिद्द्वितीयादर्शनात्सर्वस्य तथा " इति नाथवचनमनाथवचनमेव ॥ तां प्रियामेवं ब्रूयाः । किमित्याह । हे अबले । तव सहचरो भर्ता रामगिरेश्चित्रकूटस्याश्रमेषु तिष्ठतीति रामगिर्याश्रमस्थः सन्नव्यापन्नः । न मृत इत्यर्थः । वियुक्तो वियोगं प्राप्तो दुःखी संस्त्वां कुशलं पृच्छति ॥ दुह्यादित्वात्पृच्छतेर्द्विकर्मकत्वम् ॥ तथाहि । सुलभविपदामयत्नसिद्धविपत्तीनां प्राणिनामेतदेव कुशलमेव पूर्वाभाष्यमेतदेव प्रथममवश्यं प्रष्टव्यम् ॥ " कृत्याश्च " इत्यावश्यकार्थे ण्यत्प्रत्ययः ॥

---

40. O long-lived one, in accordance with my request, and in order also to benefit thyself, thou shouldst address her as follows:— " Thy consort, O lady, (is) alive and dwelling amongst the hermitages of *Rámagiri*, (and) being separated (from thee) enquires of thee about thy welfare; (for) in the case of creatures easily subjected to misfortunes, this necessarily ought to be the first subject of inquiry.

---

40. K2. M. आयुष्मान् for आयुष्मन्. G1.G2. K1. M.N. आत्मना for आत्मनः P. R. G1. G2. K1. K2. N.M. ब्रूयादेवं, M. ब्रूयादेकं, M. ब्रूया ह्येवं for ब्रूया एवम्. W. M. वियुक्तां, P. M. नियुक्तः for वियुक्तः. P. M. K2. पूर्वाशास्यं सुलभविपदां प्राणिनामेतदेव, W. M. भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत्, M. भूतानां हि सुलभविपदां पूर्वमाभाष्यमेतत्, M. पूर्वं भाष्यं सुलभविपदां प्राणिनामेतदेव, M. पूर्वाश्वास्यं सुलभविपदां प्राणिनामेतदेव for पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव.

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥४१॥

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ४२ ॥

४१. अङ्गेनेति ॥ किं च । दूरवर्ती दूरस्थः । न चागन्तुं शक्यत इत्याह । वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः । तनुना कृशेन गाढतप्तेनात्यन्तसंतप्तेन सास्रेण साश्रुणा । उत्कण्ठा वेदनास्य जातोत्कण्ठितं तेनोत्कण्ठितेन ॥ " तदस्य संजातम्–" इत्यादिनेतच्प्रत्ययः । उत्कण्ठतेर्वा कर्तरि क्तः ॥ समधिकतरं अतिप्रबलं उच्छ्वसितीति समधिकतरोच्छ्वासि तेन । दीर्घनिःश्वासिनेत्यर्थः ॥ ताच्छील्ये णिनिः ॥ अङ्गेन स्वशरीरेण प्रतनु कृशं तप्तं वियोगदुःखेन क्लिष्टमश्रुद्रुतमश्रुक्लिन्नम् ॥ " अश्रु नेत्राम्बु । रोदनं चास्रमस्रु च " इत्यमरः ॥ अविरतोत्कण्ठमविच्छिन्नवेदनमुष्णोच्छ्वासं तीव्रनिःश्वासम् ॥ " तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं पटु स्मृतम् " इति हलायुधः ॥ अङ्गं त्वदीयं शरीरं तैः स्वसंवेद्यैः संकल्पैर्मनोरथैर्विशति । एकीभवतीत्यर्थः ॥ अत्र समानुरागित्वद्योतनाय नायकेन नायिकायाः स्वसमानावस्थात्वमुक्तम् ॥

४२. शब्दाख्येयमिति ॥ हे अबले । यस्ते प्रियः सखीनां पुरस्तादग्रे

41. Living at a distance, and having his way obstructed by adverse fate, with his body thin, greatly scorched, full of tears, anxious and sighing very heavily, he enters (i. e. unites himself to) thy body, very thin, scorched (by pain), wet with tears, unceasingly anxious, and sighing hotly, with those (various) desires (i. e. which are known to himself alone).

42. He, who from a desire to touch (kiss) thy face, used indeed

41. P. M. तनु च, W. M. सुतनु for प्रतनु. P. N. M. K2. G1. K1. अस्रद्रवं, R. M. G2. अश्रुद्रवं, C1. C2. अस्रद्रुतं for अश्रुद्रुतं. W. M. दीर्घोच्छ्वासं for उष्णोच्छ्वासं. W. M. ते for तैः.

42. M. तत् for ते. M. तव for यः. M. अगात् for अभूत्. M. लोचनानां for लोचनाभ्यां. P. M. G1. अदृष्टः, K2. M. अगम्यः for अदृश्यः. M. °विरहित° for °विरचित°. M. संमुखेन for मन्मुखेन.

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासा-
न्हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति॥४३॥

आननस्पर्शे त्वन्मुखसंपर्के लोभाद्गाध्न्यात् । अधरपानलोभादित्यर्थः । शब्दाख्येयं शब्देन रवेणाख्येयमुच्चैर्वाच्यमपि यत् । तद्वचनमपीति शेषः । कर्णे कथयितुं लोलो लालसोऽभूत्किल ॥ " लोलुपो लोलुभो लोलो लालसो लम्पटोऽपि च " इति यादवः ॥ श्रवणविषयं कर्णपथमतिक्रान्तः । तथा लोचनाभ्यामदृश्यः । अतिदूरत्वाद्द्रष्टुं श्रोतुं च न शक्य इति भावः । स ते प्रियः । त्वामुत्कण्ठया विरचितानि पदानि सुप्तिङन्तशब्दा वाक्यानि वा यस्य तत्तथोक्तम् ॥ " पदं शब्दे च वाक्ये च " इति विश्वः ॥ इदं वक्ष्यमाणं " श्यामास्वङ्गम् " इत्यादिकं मन्मुखेनाह । मद्व्यवधानेन स एव ब्रूत इत्यर्थः ॥

सदृशप्रतिकृतिस्वप्नदर्शनतदङ्गस्पृष्टस्पर्शाख्यानि चत्वारि विरहिणां विनोदस्थानानि । तथा चोक्तं पताकायाम्— " वियोगे चायोगे प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपनतवतां स्पर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदितः " इति ॥ तत्र सदृशवस्तुदर्शनमाह—

४३. श्यामास्विति ॥ श्यामासु प्रियङ्गुलतासु ॥ " श्यामा तु महिलाह्वया । लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली " इत्यमरः ॥ अङ्गं शरीरमुत्पश्यामि । सौकुमार्यादिसाम्यादङ्गमिति तर्कयामीत्यर्थः । तथा चकितहरिणीनां प्रेक्षणे ते दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिम् । तथा शिखिनां

---

to become solicitous to whisper, in thy ear in the presence of thy friends (something) which might have been as well uttered in words (i. e. aloud), being (now) out of the reach of thy ear and invisible to thy eyes, addresses to thee, by my mouth this (message), the words of which have been arranged (dictated) by sorrow.

43. In the Priyangu creepers I see (in my imagination) thy body, in the glance of the timid deer thy glance in the moon the beauty of thy face, in the tufts of the peacocks' feathers thy hair, in the

---

43. P. K1. R. W. G1. G2. N. M. °प्रेक्षिते for °प्रेक्षणे. W. G1. G2. K1. K2. R. N. M. दृष्टिपातान् for दृष्टिपातं M. वक्त्रच्छायं, W. M. गण्डच्छायं, M. गण्डच्छायां for वक्त्रच्छायां. K1. N. M. भ्रूपताकाः for भ्रूविलासान्. P. W. G1. K1. K2. R. G2. M. एकस्थं for एकस्मिन्. G1. G2. M R. B. K1. K2. भीरु for चण्डि.

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ ४४ ॥

बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् । प्रतनुषु स्वल्पासु नदीनां वीचिषु ॥ अत्र वीचीनां विशेषणोपादाने नानुक्तगुणग्रहदोषः । भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात्तस्येति । तदुक्तं रसरत्नाकरे—" ध्वन्युत्पादे गुणोत्कर्षे भावोक्तौ दोषवारणे । विशेषणाद्विशेष्यस्य नास्त्यनुक्तगुणग्रहः" इति गुणविशेषणे गुणग्रहणात् ॥ भ्रूविलासान् ॥ " भ्रूपताकाः" इति पाठे भ्रुवः पताका इवेत्युपमितसमासः ॥ उत्पश्यामीति सर्वत्र संबध्यते ॥ तथापि नास्ति मनोनिर्वृतिरित्याशयेनाह—हन्तेति ॥ हन्त विषादे ॥ "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः" इत्यमरः॥ हे चण्डि कोपने ॥ " चण्डस्त्वत्यन्तकोपने " इत्यमरः ॥ गौरादित्वात् ङीष् ॥ उपमानकथनमात्रेण न कोपितव्यमिति भावः । क्वचिदपि कस्मिन्नप्येकस्मिन्वस्तुनि ते तव सादृश्यं नास्ति । अतो न निर्वृणोमीत्यर्थः । अनेनास्याः सौन्दर्यमनुपममिति व्यज्यते ॥

संप्रति प्रतिकृतिदर्शनमाह—

४४. त्वामिति ॥ हे प्रिये । प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां त्वाम् । त्वत्प्रतिकृतिमित्यर्थः । धातवो गैरिकादयः ॥ "धातुर्वातादिशब्दादिगैरिकादिष्वजादिषु " इति यादवः ॥ त एव रागा रञ्जकद्रव्याणि ॥ " चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः । सारङ्गादौ च रागः स्यादारुण्ये रञ्जने पुमान् " इति शब्दार्णवे ॥ तैर्धातुरागैः । शिलायां शिलापट्ट आलिख्य निर्माय आत्मानं माम् । मत्प्रतिकृतिमित्यर्थः । ते तव । चित्रगताया इत्यर्थः चरणपतितं कर्तुं तथा लेखितुं यावदिच्छामि तावदिच्छासमकालं मुहुरुपचितैः प्रवृद्धैरस्रैरश्रुभिः । कर्तृभिः ॥ " अस्रमश्रुणि शोणिते " इति विश्वः ॥ मे दृष्टिरालुप्यते । आव्रियत इत्यर्थः । ततो दृष्टिप्रतिबन्धनाल्लेखनं प्रतिबध्यत इति भावः । क्रूरो घातुकः ॥ " नृशंसो घातुकः क्रूरः " इत्यमरः ॥ कृतान्तो दैवम् ॥ " कृ-

small ripples of the rivers, the sportings of thy eyebrows, (and yet) alas! not even in any of these is there, O angry one, a likeness to thee.

44. After portraying thee full of love-anger, on a stone with mineral dyes, when I wish to draw myself (lying) prostrate at thy feet, my sight is obscured by constantly gathering tears: cruel fate does not brook our union even in that (picture).

44. M. सहति for सहते.

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥४५॥

तान्तो यमसिद्धान्तदैवाकुशलकर्मसु' 'इत्यमरः ॥ तस्मिन्नपि चित्रेऽपि ॥ नावा-वयोः ॥ "युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ" इति नावादेशः ॥ संगमं सहवासं न सहते । संगमलेखनमप्यावयोरसहमानं दैवमावयोः सङ्गं न सहत इति किमु वक्तव्यमित्यपिशब्दार्थः ॥

अधुना स्वप्नदर्शनमाह—

४५. मामिति ॥ सुप्तस्य विज्ञानं स्वप्नः ॥ "स्वप्नः सुप्तस्य विज्ञानम्" इति विश्वः ॥ संदर्शनं संवित् ॥ "दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षिण संविदि" इति शब्दार्णवे ॥ स्वप्ना इति संदर्शनानि स्वप्नज्ञानानि ॥ चूतवृक्षादिवत्सामान्यविशेषभावेन सहप्रयोगः ॥ तेषु मया कथमपि महता प्रयत्नेन लब्धाया गृहीतायाः । दृष्टाया इति यावत् ॥ ते तव निर्दयाश्लेषो गाढालिङ्गनं स एव हेतुस्तस्य । निर्दयाश्लेषार्थमित्यर्थः ॥ "षष्ठी हेतुप्रयोगे" इति षष्ठी ॥ आकाशे निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यन्तीनां स्थलीदेवतानां मुक्ता मौक्तिकानीव स्थूला अश्रुलेशा बाष्पबिन्दवस्तरुकिसलयेषु । अनेन वेलाश्वलनाश्रुधारणसमाधिर्ध्वन्यते। बहुशो न पतन्तीति न किंतु पतन्त्येवेत्यर्थः ॥ निश्चये नञ्द्वयप्रयोगः । तथा चाधिकारसूत्रम्—"स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोगः" इति । "महात्मगुरुदेवानामश्रुपातः क्षितौ यदि । देशभंगो महादुःखं मरणं च भवेद्ध्रुवम्" इति क्षितौ देवताश्रुपातनिषेधदर्शनाद्यक्षस्य मरणभावसूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम् ॥

इदानीं तदङ्गस्पृष्टवस्तुदर्शनमाह—

---

45. Upon the shoots of trees fall in abundance, tear-drops as big as pearls, of the local Deities beholding me throwing out my arms into space, for the sake of closely embracing thee found with great difficulty, by me, in the visions of dreams.

---

45. M. G. निशि for मया. Kl. M. अश्रुपाताः for अश्रुलेशाः.

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४६ ॥
संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥४७॥

४६. भित्त्वेति ॥ देवदारुद्रुमाणां किसलयपुटान्पल्लवपुटान्सद्यो भित्त्वा । तत्क्षीरस्रुतिसुरभयस्तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः । तुषाराद्रिजातत्वे लिङ्गमिदम् । ये वाता दक्षिणेन दक्षिणमार्गेण ॥ तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात्तृतीया समेन यातीतिवत् । तत्रापि करणत्वस्य प्रतीयमानत्वात् । "कर्तृकरणयोरेव तृतीया" इति भाष्यकारः ॥ प्रवृत्ताश्चलिताः । हे गुणवति सौशील्यसौकुमार्यादिगुणसंपन्ने । ते तुषाराद्रिवाताः पूर्वं प्रागेभिर्वातैस्तवाङ्गं स्पृष्टं भवेद्यदि । किलेति संभावितमेतदिति बुद्ध्येत्यर्थः ॥ "वार्तासंभाव्ययोः किल" इत्यमरः ॥ मयालिङ्ग्यन्त आश्लिष्यन्ते ॥ अत्र वायूनां स्पृश्यत्वेऽप्यमूर्तत्वेनालिङ्गनायोगादालिङ्ग्यन्त इत्यभिधानम् । यक्षस्योन्मत्तत्वात्प्रलपितमित्यदोष इति वदन्निरुक्तकारः स्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः ॥

४७. संक्षिप्येतेति ॥ दीर्घा यामाः प्रहरा यस्यां सा दीर्घयामा । विरहवेदनया

46. Those *Himalyan* breezes, Oh accomplished one, which, suddenly breaking open the folded shoots of the *Devadaru* trees, blow in a southernly direction, rendered fragrant by the flow of their sap, are embraced by me thinking that perhaps they might have already touched thy body.

47. "How would the long-watched night be compressed into

46. B. M. एतत्° for ये तत्°.

47. M. G1. G2. K1. N. R. संक्षिप्यन्ते, M. संक्षिप्येव, M. संक्षिप्यैवम्, K2. M. संक्षिप्येरन् for संक्षिप्येत. P. W. K2. G1. R. N. M. G2. K1. क्षणमिव for क्षण इव. B. M. मया for कथं. G1. G2. M. N. K1. K2. दीर्घयामास्त्रियामाः for दीर्घयामा त्रियामा. K2. M. अहरपि च मे for अहरपि कथं. W. K1. M. G2. गाढोष्णाभिः for गाढोष्माभिः. C1. M. तद्वियोग° for त्वद्वियोग°.

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ४८ ॥

तथा प्रतीयमानेत्यर्थः। त्रियामा रात्रिः ॥ "आद्यन्तयोरर्धयामयोर्दिनव्यवहारात्त्रियामा" इति क्षीरस्वामी ।। क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत। अहरपि सर्वावस्थासु । सर्वकालेष्वित्यर्थः । मन्दमन्दो मन्दप्रकारः ॥ "प्रकारे गुणवचनस्य" इति द्विरुक्तिः । "कर्मधारयवदुत्तरेषु" इति कर्मधारयवद्भावात्सुपो लुक् ॥ मन्दमन्दातपमत्यल्पसंतापं कथं स्यात् । न स्यादेव । हे चटुलनयने चञ्चलाक्षि । इत्थमनेन प्रकारेण दुर्लभप्रार्थनमप्राप्यमनोरथं मे मम चेतो गाढोष्माभिरतितीव्राभिस्त्वद्वियोगव्यथाभिरशरणमनाथं कृतम् ॥

न च मदीयदुर्दशाश्रवणाद्भेतव्यमित्याह—

४८. नन्विति नन्विति एकं वाक्यं।तु शब्दो भेदकः।किं तु न भेतव्यमित्यर्थः।।अथवा नन्विति पाठः ॥ नन्वित्यामन्त्रणे।। "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः ।। ननु प्रिये बहु विगणयञ्शापान्ते सत्येवमेवं करिष्यामीत्यावर्तयन्नात्मानमात्मनैव स्वेनैव ।। "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया ॥ अवलम्बे धारयामि । यथाकथंचिज्जीवामीत्यर्थः । तत्तस्मात्कारणात् । हे कल्याणि सुभगे । त्वत्सौभाग्येनैव जीवामीति भावः ॥ "बह्वादिभ्यश्च" इति ङीष् ॥ त्वमपि नितरामत्यंतं

(i. e. so as to be like) a moment, how would the day also be of a very reduced heat in all its parts;" thus my heart, O trembling-eyed one, full of unattainable desires is rendered helpless by the very severe pangs of separation from thee.

48. But no (i. e. be not afraid). I building hopes (about the future in my mind) support myself by my own self; therefore thou also, O fortunate one, shouldst not harbour very great fear (about me). Whom does happiness invariably attend or misery invariably befall? (Man's) condition goes up and down with the course of the circumference of a wheel.

48. C1. C2. W. P. G1. M. ननु, M. N. G2. K1. K2. R. इति for न तु. W. G1. M. आत्मना नावलम्बे for आत्मनैवावलम्बे. C1. C2. W. B. G1. G2. N. M. K1. K2. R. सुतरां for नितरां. C1. C2. B. K1. K2. N. R. W. G1. G2. M. कस्यात्यन्तं for कस्यैकान्तं. W. G1. K2. M. उपगतं for उपनतं.

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ४९ ॥

कातरत्वं भीरुत्वं मा गमः मा गच्छ॥ "गमेर्माङि लुङ्" "न माङ्योगे" इत्यडागमाभावः ॥ तादृक्सुखिनोरावयोरीदृशि दुःखे कथं न बिभेमीत्याशङ्क्याह—कस्येति ॥ कस्य जनस्यैकान्तं नियतं सुखमुपनतं प्राप्तमेकान्ततो नियमेन दुःखं वोपनतम् । किं तु दशावस्था चक्रस्य रथाङ्गस्य नेमिस्तदन्तः ॥ "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्" इत्यमरः ॥ तस्याः क्रमणे परिपाट्या ॥ "क्रमः शक्तौ परीपाट्याम्" इति विश्वः ॥ नीचैरध उपरि च गच्छति प्रवर्तते । एवं जन्तोः सुखदुःखे पर्यावर्तेते इत्यर्थः ॥

न च निरवधिकमेतद्दुःखमित्याह—

४९. शापान्त इति ॥ शार्ङ्गं नाम धनुः पाणौ स्थितं यस्य स तस्मिञ्शार्ङ्गपाणौ विष्णौ ॥ "सप्तमीविशेषणे—" इत्यादिना बहुव्रीहिः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति वक्तव्यात्पाणिशब्दस्योत्तरनिपातः ॥ भुजगः शेष एव शयनं तस्मादुत्थिते सति मे शापान्तः शापावसानम् । भविष्यतीति शेषः । शेषानवशिष्टांश्चतुरो मासान् । मेघदर्शनप्रभृति हरिबोधनादिनान्तमित्यर्थः । दशदिवसाधिक्यं त्वत्र न विवक्षितमित्युक्तमेव । लोचने मीलयित्वा निमील्य गमय । धैर्येणातिवाहयेत्यर्थः । पश्चादनन्तरं त्वं चाहं चावाम् ॥ "त्यदादीनि सर्वैर्नित्यम्" इत्येकशेषः ॥ "त्यदादीनां मिथो द्वन्द्वे यत्परं तच्छिष्यते" इत्यस्मदः शेषः ॥ विरहे गणितमेवमेवं करिष्यामीति मनस्यावर्तितम् । तं तम् ॥ वीप्सायां द्विरुक्तिः ॥ आत्मनोरावयोरभिलाषं मनोरथम् । परिणताः शरच्चन्द्रिका यासां तासु क्षपासु रात्रिषु ॥ निर्वेक्ष्यावो भोक्ष्यावहे ॥ विशतेर्लृट् ॥ "निर्वेशो भृतिभोगयोः" इत्यमरः ॥ अत्र कैश्चित् "नभोनभस्ययोरेव वा-

49. When the bearer of Shârnga (Vishnu) rises from his serpent bed, my curse will have its termination; pass the remaining four months by closing (thy) eyes (i. e. with fortitude). After that, we both will enjoy, during nights having the full autumnal moonlight, the manifold desires revolved (in mind) during separation.

49. P. M. मासानन्यान्, W. M. मासानेतान् for शेषान्मासान्. P. W. R. G1. G2. M. K1. K2. °गुणितं, M. N. °जनितं for °गणितं. P. M. एवाभिलाषं for आत्माभिलाषं.

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत्पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि त्वं मयेति ॥५०॥

र्षिकत्वात्कथमाषाढादिचतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वतुर्त्रयपक्षाश्रयणादविरोधः " इति पर्यहारि तत्सर्वमसंगतम् । अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना न तु ते वार्षिका इति । तस्मादनुक्तोपालम्भ एव । यच्च नाथेनोक्तम् " कथमाषाढादिचतुष्टयात्परं शरत्कालः " इति तत्राप्याकार्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकास्वित्युक्तम् । न तु तदैव शरत्प्रादुर्भाव उक्त इत्यविरोध एव ॥

संप्रति तस्या मेघे वञ्चकत्वशङ्कानिरासायातिगूढमभिज्ञानमुपदिशति—

५०. भूय इति ॥ हे अबले । भूयः पुनरप्याह । त्वद्भर्ता मन्मुखेनेति शेषः । मेघवचनमेतत् । किमित्यत आह—पुरा पूर्वम् । पुराशब्दश्चिरातीते ॥ "स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा " इत्यमरः ॥ शयने मे कण्ठलग्नापि त्वम् । गले बद्धस्य कथमपि गमनं न संभवेदिति भावः । निद्रां गत्वा किमपि । केन वा निमित्तेनेत्यर्थः । सस्वरं सशब्दम् । उच्चैरित्यर्थः । रुदती सती विप्रबुद्धा । आसीरिति शेषः । असकृद्बहुशः पृच्छतः । रोदनहेतुमिति शेषः । मे मम । हे कितव । त्वं कामपि रमयन्मया स्वप्ने दृष्ट इति त्वया सान्तर्हासं समन्दहासं यथातथा कथितं चेति । त्वद्भर्ता भूयश्चाहेति योजना ॥

---

50. And he says moreover " once thou, though attached to my neck on the bed, after falling asleep, didst awake crying aloud for some (unknown) reason; and with a suppressed laugh saidst to me, asking (thee for the reason) again and again, as follows:—"Thou rogue, I saw thee, in my dream, enjoying some other woman".

---

50. W. M. चापि, M. K1. K2. चासि, G2. R. M. चाहं for चाह. P. W. M. त्वमसि for त्वमपि. W. N. R. G1. G2. M. K1. सत्वरं, M. सस्वनं for सस्वरम्. P. पृच्छतोऽसि for पृच्छतश्च. K1. K2. M. कामिनीं कामपि त्वं for कामपि त्वं मयेति.

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ५१ ॥

५१. एतस्मादिति ॥ एतस्मात्पूर्वोक्तात् । अभिज्ञायतेऽनेनेत्यभिज्ञानं लक्षणं तस्य दानात्प्रापणान्मां कुशलिनं क्षेमवन्तं विदित्वा ज्ञात्वा । हे असितनयने । कुले जनसमूहे भवात्कौलीनाल्लोकप्रवादात् । एतावता कालेन परासुर्नो चेदागच्छतीति जनप्रवादादित्यर्थः । " स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् " इत्यमरः ॥ मयि विषयेऽविश्वासिनी मरणशङ्किनी मा भून्न भव ॥ भवतेर्लुङ् । " न माङ्योगे " इत्यडागमप्रतिषेधः ॥ न च दीर्घकालविप्रकर्षात्पूर्वस्नेहनिवृत्तिराशङ्क्येत्याह—स्नेहानिति ॥ किमपि । किंचिन्निमित्तं न विद्यत इति शेषः । स्नेहान्प्रीतीर्विरहे सत्यन्योन्यविप्रकर्षे सति ध्वंसिनो विनश्वरानाहुः । तत्तथा न भवतीत्यभिप्रायः । किंतु ते स्नेहा अभोगाद्विरहे भोगाभावाद्धेतोः ॥ "प्रसज्य प्रतिषेधेऽपि" नञ्समास इष्यते । इष्टे वस्तुनि विषये । उपचितो रसः स्वादो येषु त उपचितरसाः सन्तः । प्रवृद्धतृष्णा इत्यर्थः ॥ "रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः" इति विश्वः ॥ प्रेमराशीभवन्ति । वियोगासहिष्णुत्वमापद्यन्त इत्यर्थः ॥ स्नेहप्रेम्णोरवस्थाभेदाद्भेदः । तदुक्तम्— " आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा ॥ रतिशृङ्गारौ योगे वियोगतो विप्रलम्भश्च " इति । तदेव स्फुटीकृतं रसाकरे—" प्रेमा दिदृक्षा रम्येषु तच्चिन्ता त्वभिलाषकः ॥ रागस्तत्सङ्गबुद्धिः स्यात्स्नेहस्तत्प्रणयक्रिया ॥ तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनम् ॥ शृङ्गारस्तत्समः क्रीडा संयोगः सप्तधा क्रमात् " इति ॥

इत्थं कुशलं संदिश्य तत्कुशलसंदेशानयनमिदानीं याचते—

51. Knowing me to be well from the giving of this token, do not, O dark-eyed one, be distrustful of me (i. e. of my existence) from an evil report; they say, (but) without any ground, that the affections die away during separation; but (the fact is that) they with their ardour intensified towards the desired object through non-attainment, become (i. e. develop into) a heap of love.

51. G1. M. चकित° for असित°. P. M. विरहे ह्रासिनस्तेऽप्यभोगात्, K2. M. विरहध्वंसिनस्ते ह्यभोग्याः, W. M. विरहव्यापदस्ते ह्यभोग्याः, M. विरहव्यापिनस्ते त्वभोगाः, M. विरहह्रासिनस्ते त्वभोगाः, M. N. G2. K1. K2. R. विरहे ध्वंसिनस्ते ह्यभोगात्, M. विरहध्वंसिनस्तेऽप्यभोगाः for विरहे ध्वंसिनस्ते त्वभोगात्. W. M. K2. दृष्टे for इष्टे.

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ५२ ॥

५२. आश्वास्येति ॥ प्रथमविरहेणोदग्रशोकां तीव्रदुःखां ते सखीमेवं पूर्वोक्तरीत्याश्वास्योपजीव्य त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेणोत्खाता अवदारिताः कूटाः शिखराणि यस्य तस्मात् ॥ " कूटोऽस्त्री शिखरं शृङ्गम् " इत्यमरः॥ शैलात्कैलासादाशु निवृत्तः सन्प्रत्यावृत्तः सन्साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेषितं कुशलं येषु तैस्तस्यास्त्वत्सख्या वचोभिर्ममापि प्रातःकुन्दप्रसवमिव शिथिलं दुर्बलं जीवितं धारयेथाः स्थापय ॥ प्रार्थनायां लिङ् ॥

संप्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कल्पयति—

---

52. After thus consoling thy friend (i. e. my wife) full of intense grief on account of separation (from me) for the first time, thou, returning from the mount (*Kailâsa*) with its summits dug up by the bull of the three-eyed God (*Siva*), should support my life also frail as the morning *Kunda* flower, with her words conveying (tidings of) her welfare together with a token.

---

52. P. W. M. एनां for एवं. P. M. प्रथमविरहे शोकदष्टां, W. N. M. K2. प्रथमविरहादुग्रशोकां, M. प्रथमविरहेणार्द्रशोकां for प्रथमविरहोदग्रशोकाम्. W. M. मे, M. स्वां G2. K1. R. M. तां for ते. P. तस्मादद्रेः, W. M. शैलादस्मात् for शैलादाशु. P. M. साभिज्ञानं for साभिज्ञान°. P. प्रहितवचनैस्तत्प्रयुक्तैः, M. प्रहितकुशलैस्त्वद्वचोभिः' M. अभिहितकुशलैस्तद्वचोभिः for प्रहितकुशलैस्तद्वचोभिः. W. M. त्रिणयन° for त्रिनयन°. M. °प्रसविसलिलं, G2. M. प्रसविशिथिलं for °प्रसवशिथिलं. P. धारयेदं for धारयेथाः.

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ५३ ॥

५३. कच्चिदिति ॥ हे सौम्य साधो । इदं मे बन्धुकृत्यं बन्धुकार्यम् ॥ देवदत्तस्य गुरुकुलमितिवत्प्रयोगः ॥ व्यवसितं कच्चित्करिष्यामीति निश्चितं किम् ॥ "कच्चित्कामप्रवेदने" इत्यमरः ॥ अभिप्रायज्ञापनं कामप्रवेदनम् ॥ न च ते तूष्णींभावादङ्गीकारं शङ्के यतस्ते स एवोचित इत्याह—प्रत्यादेशात्करिष्यामि इति प्रतिवचनात् ॥ " उक्तिराभाषणं वाक्यमादेशो वचनं वचः " इति शब्दार्णवे ॥ भवतस्तव धीरतां गम्भीरत्वं न कल्पयामि न समर्थये खलु । तर्हि कथमङ्गीकारज्ञानं तत्राह—याचितः सन्निःशब्दोऽपि निर्गर्जितोऽपि । अप्रतिजानानोऽपीत्यन्यत्र । चातकेभ्यो जलं प्रदिशसि ददासि । युक्तं चैतदित्याह—हि यस्मात्सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषय ईप्सितार्थक्रियैवापेक्षितार्थसंपादनमेव प्रत्युक्तं प्रतिवचनम् । क्रिया केवलमुत्तरमित्यर्थः ॥ " गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः ॥ नीचो वदति न कुरुते न वदति सुजनः करोत्येव " इति भावः ॥

संप्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यंकरणं प्रार्थयमानो मेघं विसृजति—

---

53. I hope, O gentle one, that thou hast undertaken this business of me thy friend; I, by no means, infer thy gravity from an affirmative answer (to my suit). Though silent, thou, when asked for, suppliest water to the *Châtaka* birds; for, the performance of the desired object, on the part of the noble, is of itself an answer to the supplicants.

---

53. M. प्रत्याख्यानात्, M. प्रत्याख्यानम्, M. K1. R. प्रत्याख्यातुम्, M. प्रत्यादिष्टे, M. प्रत्यादेशम्, K2. M. प्रत्यादेष्टुं for प्रत्यादेशात्. K1. R. M. अधीरतां for धीरतां. W. B. C1. C2. N. M. G2. K2. तर्कयामि for कल्पयामि. M. याचितं for याचितः.

एतत्कृत्वा प्रियमनुचितं प्रार्थनादात्मनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान्देशाञ्जलद विचर प्रावृषा संभृतश्री-
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ५४ ॥

५४. एतदिति ॥ हे जलद । सौहार्दात्सुहृद्भावाद्वा ॥ "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युभयपदवृद्धिः ॥ विधुरो वियुक्त इति हेतोः ॥ "विधुरं तु प्रविश्लेषे" इत्यमरः ॥ मयि विषयेऽनुक्रोशबुद्ध्या करुणाबुद्ध्या वा । आत्मनस्तव अनुचितं अननुरूपमपि मे प्रियं मम प्रियं मेतत्संदेशहरणं प्रार्थनात् कृत्वा प्रावृषा वर्षाभिः॥ "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः" इत्यमरः॥ संभृतश्रीरुपचितशोभः सन् । इष्टान्स्वाभिलषितान्देशान्विचर । यथेष्टदेशेषु विहरेत्यर्थः॥ "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" इति वचनात्कर्मत्वम् ॥ एवं मद्वत्क्षणमपि स्वल्पकालमपि ते तव विद्युता । कलत्रेणेति शेषः । विप्रयोगो विरहो मा भून्मास्तु ॥ माङित्याशिषि लुङ् ॥ "अन्ते काव्यस्य नित्यत्वात्कुर्यादाशिषमुत्तमाम् ॥ सर्वत्र व्याप्यते विप्रान्नायकेच्छानुरूपिणीम्" इति सारस्वतालंकारे दर्शनात्काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसंधेयम् ॥

इति श्रीमहामहोपाध्यायमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासविरचिते मेघदूते काव्ये उत्तरमेघः समाप्तः ॥

---

54. Having, either for friendship's sake or out of a feeling of compassion for me because I am separated, done this good unworthy of (being done by) thee, because of my solicitation, roam about, O cloud, through (whatever) regions thou choosest with thy beauty heightened by the rainy season; and let there be no separation of this kind of thee from lightning (thy spouse) even for a moment.

---

54. W. M. प्रियसमुचितं प्रार्थनं चेतसः, C1. C2. K1. M. प्रियमनुचितप्रार्थनावार्तिनः, G2. M. R. K2. प्रियमनुचितप्रार्थनावर्त्मनः, M. प्रियसमुचितं प्रार्थनादात्मनः, M. प्रियमनुचितं प्रार्थना वर्त्मनः, M. प्रियसमुचितं प्रार्थितं चेतसः, M. प्रियसमुचितं प्रार्थना चेतसः for प्रियमनुचितं प्रार्थनादात्मनः. R. P. G2. M. K1. K2. विचर जलद for जलद विचर. P. क्षणमपि सखे, W. M, क्वचिदपि न ते, M. क्वचिदपि च ते for क्षणमपि च ते.

NOTES.

(I.) The first verse as Prof. Tilak observes like the one in *Kumârasambhava* introduces the subject of the poem at once (*i.e.*, without any benedictory stanza or preface) and it is certainly pedantic to refer for this to a *Sastra* which is surely based upon such examples as the present.

कश्चित् = अनिर्दिष्टनामा. *Sumativijayá* here notices an objection raised by some commentators on the ground that the omission of the name of the hero renders the poem faulty; and refutes the objection by quoting the following authority :—" भर्तुराज्ञां न कुर्वन्ति ये च विश्वासघातकाः । तेषां नामापि न ग्राह्यं शास्त्रस्यादौ विशेषतः ॥" On this we remark that the objection is trivial, since यक्ष is a sufficiently distinctive name and a further particularization of it will not, in our opinion, materially enhance the merits of the poem; and therefore does not deserve such an elaborate refutation as the one given above.

स्वाधिकारात् &c. The duty assigned to the *Yaksha* by *Kubera* was, according to *Sâroddhárinî, Vallabha, Sumativijaya* and other Jaina commentators, " that he should every day in the morning fetch fresh flowers from the lake *Mânasa* for his lord when he was to attend on *Siva*. But, unwilling to leave the embraces of his wife early in the morning, he one day, fetched the lotus-buds required for the next-day's worship during the night. When *Kubera* next morning began to worship *Siva* with those flowers he found one of his fingers severely bitten by a bee hidden in the folds of one of the buds. Enraged at this, *Kubera* cursed him for neglect of his duty." According to *Bharata, Sanátana, Râmanátha, Haragovinda,* and *Kalyânamalla* :—" he was Warder of the gate of *Kubera's* garden, and, quitting his post for a season, allowed *Indra's* elephant to commit a trespass, and trample down the flower-beds."

वर्षभोग्येण &c. This compound admits of another solution as :—वर्षेण भुज्यते वर्षभोग्यः " terminating at the end of the

year." It also admits of another interpretation, *viz.*, वर्षे 'तिर्यग्लोकवर्ति भारतं क्षेत्रं' तत्र भाग्य:="to be enjoyed at a sacred spot belonging to the *Bhârata* which is one of the nine divisions (वर्ष) of the then known world." *Sâro.*

यक्ष: &c. *Kshîrasvâmin* in his commentary on *Amara* derives the word as follows :—**यक्ष्यंते पूज्यन्ते इति यक्षा:। इ: कामदेवस्तस्येवाक्षिणी अस्येति यक्ष इत्यन्ये।** They form a class of certain demi-gods attendant on *Kubera*, the god of wealth. The word is derived from **यक्ष्** 'to worship'; either because they minister to *Kubera*, are reverenced themselves by men, or are beloved by the *Apasaras*, the courtezans of *Indra's* heaven. Wilson. *Bhagîratha*, cited and censured by a commentator on the *Amara*, derives the name from **जक्ष्** 'to eat' because he says they devour children :—**जक्षति खादन्ति शिशून् इति जक्षा:।**

जनकतनया &c. Allusion is here made to the ablutions performed by *Sitâ*, daughter of *Janaka*, during her stay on the mountain with her husband *Râma* and his brother *Lakshmana*. A peculiar sacredness, says *Sâro.*, is imparted to the waters of *Râmagiri* by their coming in contact with the body of *Sitâ*—a woman celebrated for her highest chastity.

स्निग्धच्छायातरुषु &c. *Sârodahârinî* explains this as follows:—छाया आतपाभावस्तया उपलक्षितास्तरवो वृक्षा येषु तथोक्तेषु। अथ वा। छाया शोभा तया उपलक्षितास्तरव:। यद्वा। छाया पंक्तिस्तस्यां तरव:। यद्वा। छाया दीनप्रतिपालनं तथाविधास्तरव:। अथ वा। स्निग्धा: अरुक्षा: सरसपल्लवोल्लासिनश्छायातरवो निश्चला: पादपा येषु तथोक्तेषु। अथ वा। पूर्वापरदिग्भागेऽपि सवितरि येषां छाया न परिवर्तते ते छायातरव उच्यन्ते। The last interpretation appears to be better than that of *Mallinâtha*, since it is more natural to understand **छायातरु** in the sense of shady trees in general than to restrict the word to a particular class of trees called **नमेरु**.

रामगिर्याश्रमेषु—रामगिरि lit. means 'the mountain of *Râma*', and may be applied to any one of those hills on which *Râma* resided during his banishment. *Mallinâtha* applies

this term to चित्रकूट, a mountain in Bundelakhand. It is true that this was the first mountain whereon *Râma* resided for some days during his journey to the South, and this fact might probably have led *Mallinâtha* and other expositors to fix this place as the locality of रामगिरि. Modern researches, however, determine the situation of the scene of the present poem to be in the vicinity of Nâgpoor. A glance at the route subsequently assigned by the *Yaksha* to the cloud will clearly show that *Râmagiri*, the starting point of the cloud's journey, must be below all the other places to be traversed during the journey. This requires that रामगिरि should be the modern रामटेक which is as mentioned above a hill situate near Nâgpoor. Its current name is रामटेंकडी, which, in the Marâthi language, has the same import as रामगिरि, the hill of *Râma*. This hill as Wilson says is covered with buildings consecrated to *Râma* and his associates, which receive the periodical visits of numerous and devout, pilgrims. *Sâro.* says :— रामगिरिर्दण्डकारण्ये प्रसिद्धः । And this appears to be correct though no definite place is given.

आश्रमेषु &c. The plural according to *Malli.* indicates the unsteady state of mind of the love-smitten *Yaksha* and hence the successive changes of hermitages. *Cf. Sâro.*

" वने रतिर्विरक्तस्याविरक्तस्य जने रतिः । अनवस्थितचित्तस्य न जने न वने रतिः ॥ "

(II) कनकवलयभ्रंश &c. *Sâro.* explains this as follows :— कामित्वादलंकरणधारित्वं । उक्तञ्च । " नाविदग्धः प्रियं ब्रूयान्नाकामी मण्डनप्रियः । निस्पृहो नाधिकारी स्यात्स्फुटवक्ता न वञ्चकः" *Cf.* " मणिबन्धनात्कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते." *S'â.* III.

वप्रक्रीडा &c. The simile is very happy and is due to the fact that clouds often assume various fantastic forms like those of buffaloes, bulls, elephants, &c., when engaged in वप्रक्रीडा 'butting at a bank.' Thus, in *Purana Sarvasva*, clouds are described as:—महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः 'Shaped like buffaloes, boars, and wild elephants.' *Cf.* शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयां" *Ib.* I. 56. "शैलादाशु त्रिनयनवृ-

षोत्खातकूटान्निवृत:" *Ib.*II. 52. "निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु" *R.* V. 44. On वप्रक्रीडा &c. *Sâro.* has the following remark "इति मेघस्य सामर्थ्यं व्यज्यते। सौहार्दशालिना सामर्थ्येन च कार्यं सिध्यत इति भाव:"।

प्रथमदिवसे &c. Some commentators including *Vallabha* and others propose to read प्रशमदिवसे for प्रथमदिवसे. The argument they advance in support of their reading is that as the next verse mentions the proximity of श्रावण, and as प्रशमदिवसे is more in harmony with this proximity than प्रथमदिवसे, (the last day of आषाढ being obviously nearer to श्रावण, than the first day), the former should be preferred to the latter. *Mallinâtha*, however, rejects their new reading, as unnecessary and unreasonable. What is mentioned in the next verse is, he says, simple proximity, which can be had in the case of his reading too. For, is not the general proximity, he asks, between आषाढ and श्रावण an universally admitted fact? If it is so, it follows, he argues, that there must also be a general proximity between the first day of आषाढ and the month of श्रावण, since a part is included in the whole. Close proximity, being perfectly useless, is not at all required by the next verse. "But", says *Malli.*, "granting that the verse demands close proximity; the want of it cannot be urged as an objection against my reading particularly since it is common to your reading also. Does प्रशमदिवसे possess this close proximity? No; in order to bring it out, you must stretch the meaning of प्रशमदिवस to प्रशमदिवसान्तिमक्षण which you cannot do unless you have some special warrant for this arbitrary extension. And even supposing that you have such a warrant, your position is in no way improved, but on the contrary you incur the danger of running into an absurdity in as much as you are going to expect the appearance of a cloud in the sky exactly at the last second of the last day of आषाढ which no man would do, since there is no certainty that a cloud would make its appearance exactly at the time —nay—the second required by him."

प्रशमदिवस being thus shown to be without any reason *Mallinâtha* proceeds to vindicate his own reading by an argument which is not possible, he says, in the case of his opponent. The *Yaksha* seeing the approach of the rainy season—a season which is particularly hard for women in separation to bear—and anticipating her certain death in case no word of assurance and hope were sent to her without delay, fixes upon the first cloud that makes its appearance for his messenger. But this reasoning, being applicable to प्रथमदिवस only, fully vindicates the superiority of प्रथमदिवस over its rival.

The opponents of *Mallinâtha* here raise an objection against his reasoning, which is thus :—the anticipation of his wife's death on the part of the *Yaksha* and his consequent adoption of immediate measures for the prevention of the catastrophe at the earliest time possible imply an exercise of cool reasoning of which the *Yaksha*, intoxicated with love as he is, is wholly incapable. *Mallinâtha* flatters their argument by acquiescence and tries to sink them yet deeper in absurdity."By continuing your chain of reasoning," he says, "it would follow that the *Yaksha* being maddened by love was not in a condition even to think of adopting any measure at all, whether early or late, in anticipation of the impending evil and thus not in a condition to send the cloud as a messenger to his wife. This reasoning, displaying as it does a great critical acumen, explodes the very foundation upon which the fabric of the poem is constructed and renders the poet a fool, and therefore deserves condemnation and not approbation. What can be said of men who are so ignorant as not to know that the duty of a commentator is to explain, not to stultify his author ?"

Being foiled in this manner the commentators raise another objection against his reading by charging it with the fault of inconsistency. In उत्तरमेघ the *Yaksha* happens to say in the 49th verse that the period of his curse is to terminate on the 11th of कार्तिक when god *Vishnu* is to wake from his sleep and calculates that there are only four

months remaining to the completion of that period.But if we count,say they,the days from प्रथमदिवस to the 11th of *Kârtika* we get10days in addition to the period of4months calculated by the *Yaksha* in that verse. Thus the reading [illegible] is found to be inconsistent with the calculation made by *Yaksha* in that verse. *Mallinâtha* admits the inconsistency but retorts that this inconsistency instead of being lessened or removed is greatly magnified in the case of his opponents in so far as 20 days are found to be wanting to the completion of the period of 4 months even if be accepted प्रशमदिवस and calculation begin therefrom. *Mallinâtha,* however, attempts to palliate the charge of inconsistency by remarking that the difference of 10 days is a trifling difference and that मासचतुष्टय should not be understood in such a strict sense as to preclude the inclusion of 10 additional days within the period it denotes. Thus प्रथम is shown to be decidedly better than प्रशम. We have at the risk of being tautologous reproduced this whole discussion although it is given in *Mallinâth's* commentary, with a view to draw the attention of the student to the passage and to enable him to understand it as being a fair specimen of the style generally employed in Sanskrit polemics. *Mahimasinhagani, Sumativijaya* and other expositors also give प्रथमदिवसे but interpret it as follows :—प्रथं—जगद्विख्यातं विस्तीर्णं वा—अः कृष्णो विष्णुर्वा तस्य दिवसे कार्तिक्येकादश्यामित्यर्थः।The reason they give for this interpretation is that it obviates the objection of inconsistency which *Mallinâtha* could only palliate but could not remove. We admire the ingenuity of the commentators here, but discard their interpretation as quite artificial. The interpretation of *Mallinâtha* is natural and one which suggests itself at the very first sight. Besides we do not remember to have ever met with the use of obscure monosyllabic words made by *Kálidása* in any of his well-known works.

(III) कौतुकाधान &c. *Sâroddhárini, Vallabha, Sumativijaya, Lakshminivâsa, Bharata, Sanâtana, Râmanâtha, Haragovinda, Kalyânamalla, Wilson* and other eight Jaina

expositors read केतकाधान &c. and explain it as:—केतकाधान-हेतोः केतकगर्भारोपणकारणस्य (अथ वा केतकीकुसुमोत्पादननिदानस्य) केतकपुष्पगन्धो हि विरहिणामत्यन्तदुःसह इति प्रियाप्राणबाधाचिन्ताहेतुः। 'the cause of the birth of *Ketaka* flowers which excites longing.' We reject this reading, however, for the following reason :—*Kâlidâsa* wants to describe the effect produced by the appearance of the cloud upon the mind of the *Yaksha* as is evident from the last two lines of the verse; now the epithet कौतुकाधान &c. expresses this effect more directly than केतकाधान &c. and therefore is to be preferred.

अन्तर्बाष्प &c. *Sâro.* has the following remark on this—"एतेन पुरुषत्वाद्धैर्यं प्रतिपाद्यते."

मेघालोके &c. The commencement of the rainy season being peculiarly delightful in India, from the contrast it affords to the sultry weather immediately preceding, it, and the refreshing sensations it excites, becomes, to the lover and the poet, the source of love and tenderness. *Cf.* "एतेन पुनर्निर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेनानर्थाधीनो भविष्यति." *Vi.* IV.

किंपुनर्दूरसंस्थे &c. For the effect of the rain-cloud and its friends the peacock, the *Kadamba*-flower, thunder, and the plantain flower on lovers separated from their wives, compare :—"एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम्। नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम्॥ पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम्। गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि॥ आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः। विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः"॥ *R.* XIII.

(IV) प्रत्यासन्ने नभसि &c. *Cf.* The *Subhâshita*, as given by *Sâro.* "शिखिनि कूजति गर्जति तोयदे। स्फुरति जातिलता कुसुमाकरे॥ अहह! पांथ! न जीवति ते प्रिया। नभसि मासि न यासि गृहं यदि"॥

नभसि &c. The reading मनसि for नभसि of *Nâtha*, noticed and refuted by *Mallinâtha*, is also open to another fault

that it renders the epithet प्रीतः in the fourth line superfluous.

जीवितालंबनार्थी &c. The motive of the act of sending tidings is more directly expressed by the reading जीवितालंवनार्थम्—an adverbial compound—than the adjectival compound जीवितालंबनार्थां or जीवितालंबनार्थी. *Bharata* has the following comments on "जीवितालंबनार्थां":—दयितायाः प्रियायाः जीवितस्य प्राणधारणस्य आलम्बनमवष्टम्भः स्थैर्यमर्थः प्रयोजनं यस्यास्तादृशीम् । कदाचित् श्रावणस्य प्रबलविरहपीडादायित्वात् प्राणांस्त्यक्ष्यतीत्याशंक्य विरहिण्याः कान्तवार्ताश्रवणस्य प्राणधारकत्वात् स्ववार्ता प्रस्थाप्यत इति भावः ।

कल्पितार्घाय &c. The *Argha* generally comprises the following eight articles:—"आपः क्षीरं कुशाग्राणि दधि सर्पिश्च तण्डुलाः । यवाः सिद्धार्थकं चैव अष्टाङ्गार्घ्यं प्रकीर्तितम्"॥ In the आचारदर्श of *Sridatta*, in a passage quoted from the देवीपुराण, they are stated somewhat differently as, "रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः । सामान्यः सर्वदेवानामर्घोऽयं परिकीर्तितः"। If any of these be not procurable they may be supplied by the imagination:—"अभावे दधिदूर्वादेर्मानसं वा प्रकल्पयेत्," and thus in the present case a few flowers only have been offered to the cloud.

कुटजकुसुमैः &c. *Cf.* 'कुसुमितकुटजेषु काननेषु' *Ghatakarpara*. 13.

प्रत्यग्रैः &c. On this *Sâro.* says 'आर्तवत्वान्मनोहरैः । आर्तवैर्हि कुसुमैर्देवतातिथिपूजनं कर्तव्यमिति'।

(V) सलिलमरुतां &c. मरुत् (from मृ) is said by some to be from an obsolete root मर् 'to shine'; fanciful etymologies are given by Sanskrit authors; मा रुदः 'do not cry' according to the legend told in *Rámáyana* I. 46. 20, *Harivansa* 249; according to the *Nirukta* XI. 13 the *Maruts* are so called because they are मितराविणो महद्द्रवन्तीति वा. सलिलं—the older form सरिरं—from सल् connected with root सृ 1 *conj.P.* 'to go, to move rapidly.'

क—क &c. This is an example of विषमालंकार, as noticed by *Mallinâtha* which consists in a statement of incongruity

between two facts. *Cf.* 'क रुजा हृदयप्रमाथिनी क च ते विश्वसनीयमायुधं' *Mal.* III. 'क बत हरिणकानां जीवितं चातिलोलं। क च निशितनिपाता वज्रसाराः शरास्ते' ॥ *Sa.* I. 'क सूर्यप्रभवो वंशः क चाल्पविषया मतिः' *R.* I. 2.

पटुकरणैः &c. *Vallabha* explains this as follows:—चतुरेन्द्रियैर्मानवैर्न तु निर्बुद्धिभिः &c. which seems better. पटुकरणैः 'with able limbs'—limbs that work intelligently.— with प्राणिभिः means intelligent beings. *Cf.* "तस्मिन्नुद्यन्नवजलधरध्वानमाकर्ण्य भूयः। कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या ययाचे। प्रज्ञाहीनं वचनरहितं निश्चलं श्रोत्रहीनं। दौत्यं कर्तुं मुरहरपदो लक्ष्मणं पक्ष्मलाक्षी" *Padánka-Duta.* 3.

गुह्यकः &c. *Kshirasvámin* explains this word as follows:— गुह्यकाः निधिपाला मणिभद्रादयः गूहन्तीति.' *Rayamukuta* derives this word as:— "गुह्यं कुत्सितं कायति। कै गै रै शब्दे आतोऽनुपसर्गे इति कः। गुह्यको मणिभद्रादिः। एते च निधिरक्षका यक्षभेदाः। तथा च "निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः' इति व्याडिः"। *Sáro.* and others say:— "गुह्यं कायति जल्पति गुह्यकः" and add that it is साभिप्राय. But it is surely far-fetched.

ययाचे &c. *Cf.* "न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती." *Hansadutta.* 8.

प्रकृतिकृपणा. &c.This expression and *Mallinatha's* commentary thereon admits of another interpretation, viz. "naturally disposed to lament," which equally suits the context. *Sumati.* comments on this as follows:—" प्रकृत्या स्वभावेन कृपणाः विकलाः चेतनाचेतनस्वभावपरिज्ञानविकलाः भवन्तीत्यर्थः." The reading प्रकृति &c. is certainly better than प्रणयकृपणाः &c. On this the *Sáro.* has the following remark:— "नैव पश्यति जात्यन्धः कामान्धो नैव पश्यति। न पश्यति मदोन्मत्तस्त्वर्थी दोषो न पश्यति। दश धर्मं न जानन्ति धृतराष्ट्र निबोधनात्। मत्तः प्रमत्त उन्मत्तो जातिक्रुद्धो बुभुक्षितः। त्वरमाणश्च भीरुश्च लुब्धः कामी च याचकः" ॥

(VI) पुष्करावर्तकानां &c. 'Of diluvian clouds' which are thus described in the ब्रह्मांडपुराण and the पुराणसर्वस्व :—"पुष्करा नाम ते मेघा बृहन्तस्तोयमत्सराः। पुष्करावर्तकास्तेन कारणेनेह विश्रुताः॥ नानारूपधरास्ते तु महाधीरस्वनास्तथा। कल्पांतवृष्टिकर्तारः संवर्ताग्नेर्नियामकाः"॥ *Cf.*— "दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का वाता वाता दिशि दिशि न वा सप्तधा सप्तभिन्नाः। छन्नं मेघैर्न गगनतलं पुष्करावर्त्तकाद्यैः पापं पापाः कथयत कथं शौर्यराशेः पितुर्मे" *Ve.* III. *Saro.* and others derive it as follows :— पुष्करं पानीयं आवर्तयन्ति. From what is said above पुष्करावर्त्तक appears to be one name while *Malli* takes the word as two distinct names of the cloud-race.

प्रकृतिपुरुषं मघोनः &c. *Indra* is in mythology known as the god of rain, and as clouds distribute rain to every part of the world they are rightly called here "the chief officers of *Indra* or the right hand of *Indra*." The appellative मघवत्, used in the original, is considered, by Etymologists, as irregularly derived from the passive form of मह्, 'to adore,' 'to worship.' Thus *Ráyamukáta* says :—मह्यते मह् पूजायां। श्वन्नुक्षन् पूषन्—इत्यादिना कनिनि मघवन्निति निपातितः. see *Pa.* VI. 4. 128.

This verse is an example of प्रेयोलंकार, a figure, when one pays a compliment to another in order to serve one's object. The object here is to induce the cloud to take the message to *Alaká*.

याच्ञामोघा &c. :—This is a sentiment of rather an original strain, and indicates considerable elevation of mind. Wilson. *Cf* " इत्याश्वासादभिमतविधौ कामये त्वां नियोक्तुं न्यस्तः साधीयासि सफलतामर्थभारो हि धत्ते" ॥ *Uddhavasandesa.* 4.

"अतोऽहं दुःखार्ता शरणमबला त्वां गतवती न भिक्षा सत्पक्षे व्रजति हि कदाचिद्विफलताम्". *Hansadúta.* 9.

(VII) अलका &c. *Kshirasvámin* derives this word as follows :—" अलत्यलका। अल भूषणे क्षिपकादित्वादित्वाभावः " *Ráyamukuta* derives it as अलति भूषयति अलका. It is the capital of the

Lord of the *Yakshas* and is situated on the mount *Kailása* a snowy peak of the *Himálaya.* It is also the residence of his dependent deities.

हराशिरश्चन्द्रिका &c. *Siva* represented as the friend of *Kubera* may occasionally visit *Alaká* and is therefore rightly said to reside in his outer-garden. The name of this garden is वैभ्राज. But according to *Sáro.* "कलौसोपवनं चैत्राख्यं." *Cf.* " वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया । बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति " ॥ *Ib.* II. 10 " नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः " ॥ *Ib.* II. 3.

यक्षेश्वराणां &c. *Sáro.* and others say:— "पूज्यत्वे बहुवचनम्".

(VIII) **उद्गृहीतालकान्ताः** &c. In connection with this the *Sáro.* quotes the following :—" **क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका** " ॥ This gives the reason why their hair were in a dishevelled state.

प्रत्ययादाश्वसत्यः &c. *Sáro.*, *Su.* and other commentators explain this as '**निश्चयात्स्थिरीभवंत्यः**' 'calmed by assurance,' which is also possible.

सन्नद्धे &c. *Sáro.* says :— "**प्रकाटितसुरधनुतडिल्लतागार्जितादिसामग्रीके,**" which conveys the sense of equipment previous to bestirment.

According to *Saro.* this verse is an example of **व्यतिरेकालंकार** which is thus defined :—"**उपमानाद्यदन्यस्य व्यतिरेकः स एव सः** " *Kávya.* X.

" पाशानिन्द्रो: &c." also taking these together as कुलक. From this it appears that *Sumativijaya* too connects these verses in the same manner as we have shown in the above note with a slight modification.

सन्निषण्णैकपार्श्वां &c. Here *Bha.*, *Ra'm.*, *Hara.* and Wilson read " सन्निकीर्णैकपार्श्वां and explain it as, संनिकीर्णं सम्यक् निक्षिप्तम् एकं पार्श्वं यया तादृशीं विस्मृतपार्श्वान्तरपरिवर्तनामित्यर्थः । *Bha.* &c.

प्राचीमूले &c. The मूल means the root, the lowest edge or extremity of the eastern direction, hence the eastern horizon.

In connection with सन्निषण्णैकपार्श्वाम् *Sa'ro.* and *Mahima.* have the following note:–" क्षामत्वात्परिवर्तितुमसमर्थेति भावः. "

क्षण इव &c. Here *Pa'rsvâ.*, *Sa'ro.*, *Meghalata'*, *Mahima.*, *Su.*, *Val.*, *Lakshmi.*, *Bha.*, *Ra'm.*, *Hara.*, Wilson and eight other MSS.; read, "क्षणमिव " and explain it as, "क्षणमिव मुहूर्तमिव" । *Sa'ro.*; " क्षणमिव क्षणमात्रमिव" । *Su.*; " क्षणमिव क्षणवादीति ।" *Val.*; क्षणमिति लोकोक्त्या अल्पकालोपलक्षणम् । यद्यप्यमरकोषादौ तास्तु त्रिंशत् क्षण इति क्षणशब्दस्य पुंस्त्वं दृष्टं तथापि । " क्षणमिव गमितो वासरो वासवेन " इति । " नीता रात्रिः क्षणमिव मया" इत्यादिप्रयोगदर्शनात् नपुंसकत्वमव्याहतम् "। *Bha.*; " क्षण इवेति युक्तः पाठः कालिदासप्रयोगान्नपुंसकलिंगोऽयमिति वा " । *Ra'm.* &c. *Cf.* " अथालापे कृते वृत्ते गांधर्वोद्वाहकर्मणि । अवर्धत तयोः प्रीतिर्दंपत्योर्न तु यामिनी " *Katha'sa.* III. 67 also " किमपि किमपि मन्दं मन्दमासत्तियोगाद् । अविरलितकपोलं जल्पतोरक्रमेण । अशिथिलपरिरंभव्यापृतैकैकदोष्णोः । अविदितगतयामा रात्रिरेव व्यरंसीत् " । *Uttara.* I. 26.

विरहमहतीम् &c. Here *Sa'ro.*, *Meghalata'*, *Mahima.*, *Lakshmi.*, *Bha.*, *Ra'm.*, *Hara.*, *Kalya'.*, Wilson and eight other MSS. read विरहजनितैः and explain it as, " वियोगोत्पन्नैः" *Sa'ro.*; "विप्रयोगसंभूतैः " *Mahima.* &c. But *Val.*, *Su.* and two other MSS. read विरहपतितैः and explain it as, " भर्तृविरहात्पतितैः " । *Su.* &c.

Vallabha reads this verse in the following manner:—"आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां । प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः। मत्संयोगः सुखमुपनयेत्स्वप्नजोऽपीति निद्राम् । आकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् " । and after this he reads:— "निश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं । शुद्धस्नानात्परुषमलकं नूनमागण्डलम्बि । नीता

रात्रिः क्षणमिव मया सार्द्धमिच्छारतैर्या । तामेवोष्णैर्विरहपतितैरश्रुभिर्यापयन्तीम् ” । and then, “ पादानिन्दोः &c.”

(XXIX). *Pa'rsva'bhyudaya*, Wilson and a few others read this after the 31st verse *i. e.* “ आद्ये बद्धा ” &c.

स्थलकमलिनी &c. A lotus growing on land. Yaksha's wife lying as she does on the ground is appropriately compared to स्थलकमलिनी. *Cf. Sa'ro.*:— “ भूमिशयनात्तस्याः स्थलकमलिन्यामुपमानमुपपन्नम् ” । also *Vallabha*, “अतश्च साभ्रेऽह्नि स्थलकमलिनीमिवेत्युपमा सा हि साभ्रत्वान्न प्रबुद्धा दिनवशाच्च न सुप्ता ” ।

One of the four Uria MSS. omits this stanza.

(XXX). मत्संभोगः &c. *Pa'rs'va'.*, *Sa'ro.*, *Meghalatâ*, *Val.*, *Mahima.*, *Lakshmi.*, *Su.*, *Bha.*, *Ra'm.*, *Hara.*, *Kalya'.*, Wilson and ten other MSS. read मत्संयोगः here. This reading is better. *Cf.* “ हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा । कथमुपलभे निद्रां स्वप्ने समागमकारिणीं । न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां । मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति ” । *Vi.* II. 10. Prof. Isvarachandra also prefers this reading and says :–“ अयमेव पाठः साधीयान्. ”

कथम् &c. This word is explained as, “केन प्रकारेण—how?” in the text of *Mallina'tha's* commentary as given by the manuscripts in our possession which we have adopted; but taking this interpretation we cannot satisfactorily make out the meaning of the line. The text of the commentary as found in the printed copies explains it as, “ केनापि प्रकारेण–” ‘somehow,’ which makes the line intelligible; but this sense is unwarranted.

इति &c. *Mallinâtha* explains it as, ‘ आशयेन–intending’ ; and refutes a supposed objection why आशयेन is not added by saying that the addition is redundant because इति serves the purpose. Again there is here a difference between the texts of the commentary as given by manuscripts and by Bhatavadekar. The latter runs thus:—“इति मत्वेति शेषः। इतिनैवोक्तार्थत्वादप्रयोगः। प्रयोगे वा पौनरुक्त्यमित्यलंकारिकाः ” But both the meanings conveyed by both are identical.

निद्राम् &c. *Cf.* “प्रजागरात् खिलीभूतस्तस्याः स्वप्नसमागमः ” *Sâ.* II. also, “ अस्त्रं प्रस्वापनमपि मया लब्धमुन्निद्रकेण । यस्मिन्नेतन्निहितमथ ते स्वप्नसन्दर्शनाय । जाग्रद्भावे भवति भवती भावनीयैव धिङ्मे तेनाशेषस्फुरणशमनो हन्त जाता सुषुप्तिः”। *Uddhavaduta.* 129.

"नायं स्वप्नो निशि निशि भवेद्यत्तया संगतिर्मे । पश्यामीदं विधुमुखि निराबाधमास्वादयामि । किं तु ज्ञातं त्वयि विजयते काचिदाकृष्टिविद्या । यां संसन्ती हरसि तरसा मामदूराद्यदूनाम्"। *Uddhavasandesa.* 124.

(XXXI). हित्वा &c. *Cf.* "तत्र नित्यविहितोपहूतिषु । प्रोषितेषु पतिषु द्युयोषिताम् । गुंफिताः शिरसि वेणयोऽभवन् । न प्रफुल्लसुरपादपस्रजः"। *Si.* XIV. 30.

मयोद्वेष्टनीयाम् &c. In connection with this *Sâro.* has the following remark:-"इति अस्याः महासतीत्वं प्रतिपादितं."

(XXXII). आर्द्रान्तरात्मा &c. In connection with this *Sâro.* and *Mahima.* have the following explanation:-"अथवा आर्द्रः अकर्कश अन्तरात्मा ययोः इति"। *Mahima. &c.*

नवजलमयम् &c. Here *Sana'.*, *Hara.*, *Kalya'.*, and Wilson read "जललवमयम्" । Prof. Isvarachandra Vidyásàgara prefers this reading and says:—"अयमेव पाठः साधीयान् । नवजलमयमिति पाठे नवेति विशेषणस्यानुपयोगात्."

(XXXIII). सुभगंमन्यभावः &c. 'The state of supposing ourselves to be handsome (according to *Mallinatha*) or beloved.'

(XXXIV). मीनक्षोभाच्चलकुवलयश्रीतुलाम् &c. Here *Bha.*, *Ra'm.*, *Hara.*, Wilson and three other MSS. read मीनक्षोभाकुलकुवलयश्रीतुलाम् and explain it as:—"मीनस्य मत्स्यस्य क्षोभेण संघट्टनेन आकुलं चंचलं यत्कुवलयं नीलोत्पलं तस्य या श्रीः शोभा तस्यास्तुलां सादृश्यम्"। *Bha.* &c. Prof. Is'varachandra prefers this reading, saying,—"अयमेव पाठः साधीयान्."

(XXXV). वामश्चास्याः &c. Here *Val.* and two other MSS. read वामो वास्याः and explain it as, "वा शब्दो नयनस्पन्दापेक्षया वैकल्प्ये।" *Val.* &c.

त्याजितौ दैवगत्या &c. *Mahima.* explains it as, दैवगत्या दैवबलेन त्याजितौ मोचितौ यतो दैवगतिर्बलीयसी। उक्तञ्च। "विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया"। "भ्रमन्वनान्ते नवमंजरीणां [॰रीषु] न षट्पदो गन्धफलीमजिघ्रत् । सा किं न रम्या स च किं न रन्ता गरीयसी [बलीयसी] केवलमीश्वरेच्छा"।

यास्यत्यूरुः &c. *Cf.* "नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः। लब्ध्वापि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः"। *Ku.* I. 36.

सरसकदलीस्तंभगौरः &c. Here *Pârsvâ.* and two other MSS. read सरसकदलीगर्भगौरः which appears better, as in point of whiteness the interior of a plantain-tree surpasses its exterior. *Vallabha, Sana'tana, Haragovinda,* Wilson and two other MSS. read कनककदलीस्तंभगौरः. Prof. Isvarachandra prefers this reading and gives reasons for his preference. He says,—"अयमेव पाठः साधीयान् "कनककदलीवेष्टनप्रेक्षणीयः" इत्यत्र अलकायां कनककदलीनां वाहुल्यदर्शनादुपमिति काले तासामेव बुद्धिस्थत्वात्" ।

(XXXVI). याममात्रं &c. In connection with this *Mahima.* has the following note. He says , — " उत्तमस्त्रियो हि प्रहरमात्रं प्रहरमेव निद्रां कुर्वन्तीति पद्मिनीत्वं प्रकाशितं भवति । यतः । " पद्मिनी यामनिद्रा च । द्विप्रहरा च चित्रिणी । हस्तिनी यामत्रितया । घोरनिद्रा च शंखिनी" । इति वचनात् । याम is a प्रहर or three hours.

The termination मात्र is added in the sense of एव 'Just, only, nearly about.' *Cf.* "महीतलस्पर्शनमात्रभिन्नम्" | *R.* II. 50.

अन्वास्यैनां &c. In connection with this *Val.* has the following annotation:—"अन्वासनं सेवनं यथा । अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजं"। *R.* I. 56. " गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम् । अन्वास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः"। *Ku.* III. 17.

एनाम् &c. As to the use of *Acc. Cf.* " तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः" । *R.* II. 24.

सहस्व &c. Here *Bha., Hara., Kalyâ.,* Wilson and one Uria MS. read सहेथाः. Prof. Isvarachandra prefers this reading and says,—— "अयमेव पाठः साधीयान्".

(XXXVII). विद्युद्गर्भः स्तिमितनयनाम् &c. Here *Bha., Ra'm., Hara.,* and Wilson read विद्युत्कम्पास्तिमितनयनां and explain it as, "विद्युतः कंपेन चलनेन स्तिमिते निश्चले नयने लोचने यस्यास्तादृशीम् "। *Bha.;* "विद्युता सह कंपते इति विद्युत्कंपो मेघः तस्य संबोधनं हे विद्युत्कंप इति" । *Ra'm.;* "विद्युत्कंपेन तडित्प्रकाशेन स्तिमितनयनां आकस्मिकप्रकाशात् स्थिरीकृतलोचनाम्." *Hara.* And *Mahima., Val., Kalya'., Sa'ro., Su.,* and seven other MSS. read विद्युद्गर्भ स्तिमितनयनां and explain it as,——"कथं भूतस्त्वं विद्युद्गर्भः विद्युत् गर्भे मध्ये यस्य सः स्त्रीद्वितीयः । परनारीसंभाषणमेकाकिनो नोचितं । अथ हे विद्युद्गर्भ। अन्तर्गूढविद्युता भवता भाव्यं अन्यथा भीरुत्वात्सा भेष्यतीति । किं भूतां तां स्तिमितनयनां निर्मेषनेत्रां इति "। *Saro.;*"हे वि-

घद्गर्भ विद्युद्गर्भे यस्य सः । तथा संबोधनद्वारेणोपदेशं ददाति। भवता अन्तर्गतविद्युता तत्र भवितव्यामिति भावः। अन्यथा भीरुस्वभावत्वाद्वनितानां। सा भेष्यतीति "।*Kalya'*.; " विद्युद्गर्भ विद्युत्सौदामिनी गर्भे मध्ये यस्यासौ विद्युद्गर्भः। तस्य संबोधनं हे विद्युद्गर्भ। इति संबोधनद्वारेणोपदेशं ददाति। हे मेघ सौदामिनी गर्भे एव स्थाप्य बहिर्न प्रकाश्यं कथं विद्युद्दामचमत्कारचेष्टितैः सा भेष्यति अत एव भीरुतया अबलात्वेन तस्या धैर्य कुतः(?)"। *Mahima.*, "भो-विद्युद्गर्भ विद्युत् तडित् गर्भे मध्ये यस्य सः भो मेघ. &c."*Su.* &c. *Sa'ro.* interpretes विद्युद्गर्भः as स्त्रीद्वितीयः because as it says, conversation by a man when alone with the wife of another is regarded as indecorous.

अभिनवैः &c. In connection with this *Sa'ro.* has the following note:—"सुमनसोऽपि प्रभाते शीतवातस्पर्शेन बाध्यन्ते" ।

धीरः स्तनितवचनैः &c. *Pârsvâ.* reads "धीरस्तनितवचनः" 'having deep words of thunder.' So does *Râmanâtha*; who says, "मन्दगर्जितवाक्यः सन् । धीरध्वनितवचनमिति पाठे क्रियाविशेषणम् । भो धीर सावधान इति वा सम्बोधनं" । *Su.* also says, "धीर इति संबोधनमपि मेघस्यापि भवति." But he does not read धीरस्तनितवचनः. *Bharata.* and one Uria MS. read धीरध्वनितवचनैः and explain it as,-"मन्दगर्जितरूपवाक्यैः । हे धीर सावधानेति संबोधनं वा । धीरस्तनितवचनैरिति क्वचित्पाठः । धीरध्वनितवचनः इति पाठे मन्दगर्जितवाक्यः सन् । धीरध्वनितवचनमिति पाठे क्रियाविशेषणम्" । But *Val.*, *Su.*, *Mahima.*, *Lakshmi.*, *Meghalata'*, Wilson and nine other MSS. read " धीरस्तनितवचनैः."

प्रक्रमेथाः &c. *Cf.* " दूत्यं स्वस्य प्रणयहृदयस्त्वं निवेद्यानवद्यं । धीमन् सद्यो मम कथयितुं वाचिकं प्रक्रमेथाः "। *Uddhavasandesa.* 120.

(XXXVIII). अविधवे &c. The word विधवा is an example of what is in grammar termed 'the deterioration' of words. The condition of widowhood being considered inauspicious, it has now got a tinge of contempt about it which, from the use of the word made by such a poet as *Ka'lida'sa*, it is inferred it did not possess the sense of contempt in former times. *Cf.* " नार्यश्चाविधवा नित्यं पतिशुश्रूषणे रताः" । *Ra'ma'y.* I. 92.

मित्रं प्रियम् &c. *Mahima.* explains it as, " प्रियं मित्रं इति याञ्चावचनमात्रेण मेघः सुहृज्जातः अहो मेघस्योत्तमत्वम् । यदुक्तं । मनसि वचसि

कायै पुण्यपीयूषपूर्णाः । त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः । परगुणपरमा- णून्पर्वतीकृत्य नित्यं । निजहृदि विकसन्तः सन्ति सन्तः कियन्तः" ।

हृदयनिहितैः &c. *Sa'ro.* explains this as:-"मनसि निहितैः (this appears to be its reading) चित्ते स्थापितैः स्तोकमपि अविस्मृतैः यत्तेन संदिष्टं तन्मनो मनागपि न विस्मृतं । न पुनरहं केवलं वार्तामात्रकथकः किं तु पतिवियुक्तकामिनीकामुकसंघट्टननिपुणः इति स्वशक्तिमावेदयन्नाह ।"

यस्त्वरयति &c. In connection with this *Val.* has the following remarks:— "यस्त्वरयत्यंबुवाहापेक्षया पुंस्त्वं प्रथमपुरुषनिर्देशश्च मित्रपदापेक्षया हि दुर्घटमेतद."

मन्द्रस्निग्धैः &c. With reference to this *Sa'ro.* has the following note:-" धीरमधुरैः । यतः " उदारमरूक्षं च दूतवचनं प्रशस्यते."

अबलावेणिमोक्षोत्सुकानि &c. *Sa'ro.* interpretes it as, " एतेन तासां पतिव्रतात्वकथनं । यतस्ताः स्वभर्तृषु आगतेषु तद्बन्धमोक्षं कुर्वन्ति नान्यथेति. "

(XXXIX). मैथिलीवोन्मुखी सा &c. *Maithili* is the name of *Sita*, daughter of *Janaka*, the king of *Mithilâ*, a city, the capital of Videha or North Behâr which corresponds to the medern Tirhut and Purniya between the Gandaki and Kosî or Kausiki rivers. It has given its name to one of the five northern nations of Brahmanas, and to a school of law. It was the country of king Janaka, and the name of his captial, Janakapura, still survives in "Janakapoor," on the northern frontier. Anandoram Boorooah says that on the north-east of वैशाली, lay the kingdom of विदेह with its capital मिथिला ("सुमराविदाह्मि मिाहिलं महानअरिम् । ...... दर्शय सीतायै जनकस्य राजधानीं" ॥ *Bâl. Râm.* X. In some lexicons, विदेह is given as a synonym of मिथिला. But I do not remember meeting it in this sense. The following passage from दशकुमार III. distinguishes the country from the town:- "अहमस्मि पर्यटन्नेकदा गतो विदेहेषु । मिथिलामप्रविश्यैव ......"). Janakapura in Nepal north of Madhuváni is still identified as मिथिला, the capital of जनक, with all its ancient associations. Sîtamâri (probably Sitâmâri " where Sîtà was furrowed out") claims the honour of giving birth to Sitá, daughter of Janaka (Râmáy. III. 4 ch.). सीताकुण्ड, 12 miles east of Matihari is still revered as the tank where Sitá bathed on her way to marriage. विदेह, therefore, must have comprised, besides a portion of Nepal, all these places or in other words the northern part of the old district of Trihut and the

north-western portion of the district of Cham'paran. The country is still known as मिथिला in learned quarters. Its Brahmanas are broadly distinguished from the Brahmanas of Bengal and it is still governed by the Mithilà school of law, most ably represented in the वीरमित्रोदय of Mitra Misra. The people of विदेह must have formerly traded a good deal, as वैदेहक or resident of विदेह is given by Amara as a synonym of merchant ("वैदेहकः सार्थवाहो नैगमो वणिजो वणिक्" II. 9. 7. 8). Tîrabhukti from which Tirhut is derived literally means "possessions on or along banks" and probably included the country along the Gandaka river. At one time, its kings were supreme in this part of India and I understand an era is still extant commemorative of the rise. According to the त्रिकाण्डशेष ("तीरभुक्तिस्तु निच्छविः। विदेहा ......" भूमिवर्ग 8) Tîrabhukti is a synonym of Videha. I do not think this is correct as I have not found in any old work तीरभुक्ति used as a synonym of Videha and am told by Maithila Brahmanas that the southern portion of Tirhut does not come within Videha. Videha was, however, very probably within the dominions of the Râjas of तीरभुक्ति, which might have led पुरुषोत्तम to group them together. निच्छवि is rarer than तीरभुक्ति, but General Cunningham says the kings of Thibet and Ladak trace their descent from the Nichchhavis (P. 451). The Newar kings of Nepal also belonged to this tribe. The Nichchhavis, therefore, appear to be the Newars, who are still found in Nepal. They must have dwelt further north probably about Lauria, near which there are extensive ruins. The above allusion relates to the discovery of her in Lanka by Ráma's envoy Hanûmân, the chief of the monkey legions. *Cf.* "दृष्टा विचिन्वता तेन लंकायां राक्षसीवृता। जानकी विषवल्लीभिः परीतेव महौषधिः। तस्यै भर्तुरभिज्ञानमंगुलीयं ददौ कपिः। प्रत्युद्गतमिवानुष्णैस्तदानन्दाश्रुबिन्दुभिः"। *R.* XII. 61-62. Here *Mahima.* has the following note, he says — 'हनूमानपि स्वामिभक्तः स्वामिकार्यकरणे बद्धकक्षः। एकेनापि चरणोल्लालेन लंकां प्राप्तो वनं स्थित्वा सीताया मुद्रिकां ददौ। सीताऽधोमुखी स्थितासीद्भूमौ मुद्रिकां दृष्ट्वा वदति। पूर्वं भगवती सीता रामविरहातुरा मुद्रिकामुपहासं कृतवती। यथा। प्रिया गेहे मयारण्ये त्वया चापदिसंस्थितः। रामस्त्यक्तो ह्यतः स्त्रीणां विश्वासं कः करिष्यति" । And further on he says,— " हनूमद्दृष्टांतेन तस्याः पतिव्रतात्वं प्रकाशितं भवति। स्त्रीणां हि पतिव्रताधर्म एव प्रशस्यते कठिनश्च तद्यतः। सुतं पतंतं प्रसमीक्ष्य पावके। न बोधयामास पतिं पतिव्रता। तदा ह्यसौ तद्व्रतशक्तिपीडितो। हुताशनश्चन्दनपङ्कशीतलः"।

संभाष्य &c. Here *Sa'ro. Meghalata'.; Mahima., Val., Lakshmi., Bha., Sana'., Ra'm., Hara.,* Wilson and eight other MSS. read संभाष्य and explain it as, "संभाष्य स्वागतं इत्यालप्य" *Sa'ro.;* "स्वागतं भवत इत्यादिना आलप्य." *Bha.* &c.

The reading सुहृदुपनतः and सुहृदुपहृतः are interpreted as 'स्वमित्रेणानीतः, मित्रानीतः सन्, मित्रेणानीतः" &c.।

Su. omits this verse.

(XL) पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव &c, Here *Pârsvâ.; Val.; Sana'.; Kalya'.* and two other MSS. read पूर्वाशास्यं &c. and explain it as,—"पूर्वाशास्यं प्रथमाकांक्षणीयं यत्स्वास्थ्यं नाम"। *Val.;* "पूर्वाशास्यं पूर्वं प्रथमं आशास्यं आशंसनीयामिति यावत्." *Sanâ.* and *Kalyâ.;* which means,—'The first thing to be wished for.' *Sâro.* calls it,—"पूर्वाशास्यमिति मूलपाठः"। *Bha., Ra'm., Hara.,* and Wilson read, "भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत्" and explain it as,—"हि यतः भूतानां प्राणिनां क्षयिषु नश्वरेषु करणेषु शरीरेषु एतत्कुशलमाद्यं प्रथममाश्वास्यमाश्वसनीयमवधानीयं । जीवने सति मंगलादिकं सर्वं भविष्यतीति भावः"। *Bha.* &c.

आत्मनश्चोपकर्तुम् &c. *Mahima.* explains it as,"यतः परोपकाररसिकत्वेन हे मेघ त्वं ख्यातः । यदुक्तं । विश्वं प्रार्थ्यो नैगद्वंद्यो जगन्माता जगत्पिता । सर्वेषु प्राणिनां मेघो जगदानंददायकः"।

वियुक्तः &c. *Mahima* interpretes it as, "एतादृशे वियोगे अहं एव प्राणान्धारयितुं समर्थो नान्यः कश्चित्पुरुषः । यदुक्तं । क्वचिद्वीणानादः क्वचिदपि च हाहेति रुदितं ।क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः । क्वचित्कंथाधारी क्वचिदपि च दिव्यांबरधरो । मनस्वी कार्यार्थी न गणयाति दुःखं न च सुखं"॥

अव्यापन्नः &c. *Mahim.* explains it as,—"विपदि धैर्यमेव प्राणधारणमेव पुरुषाणां धर्मो न कापुरुषाणां । यतः । विपदि धैर्यमथाभ्युदये क्षमा । सदासि वाक्पटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ । प्रकृतिसिद्धमिदं हि महात्मनाम् । संपदि यस्य न हर्षो विपदि विषादो रणेऽवधीरत्वम् । तं भुवनत्रयतिलकं जनयति जननी सुतं विरलं" ॥

कुशलम् &c. *Mahima* interpretes it as,——"सति कुशले सर्वं द्रष्टव्यं क्षणक्षयित्वाच्छरीरपंजरस्य ।यतः। इदं शरीरं परिणामदुर्बलं पतत्यवश्यं श्लथसंधिजर्जरं । किमौषधैः क्लिश्यसि मूढ दुर्मते निरामयं ब्रह्मरसायनं पिब" । And further on he says,—"अत एव शरीरकुशलमेव पूर्वं प्रश्नकरणं श्रेयस्करमि-

ति भावः । सर्वेषां प्राणिनां प्राणवल्लभामिलने समाचारलिखने च पूर्वं कुशलं परमेश्वरभजनं च द्वितीयं । संसारिणां मार्गद्वयदर्शनात् । यदुक्तं । धन्यास्ते वीतरागा गुरुवचनरतास्त्यक्तसंसारसंगाः । ब्रह्मध्याने विलीना गिरिवरगहने यौवनं ये नयन्ति । ये च प्रोत्तुंगपीनस्तनकमलभराक्रान्तदेहां दिनान्ते । कान्तामालिंग्य गूढं मृदुशयनतले शेरते तेऽपि धन्याः ॥ अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः । पृष्ठे कान्तावलयक्वणितं चामरग्राहिणीनाम् । यद्यस्त्येवं कुरु भवरसास्वादने लंपटत्वं । नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ" ॥

One of the four Uria MSS. omits this stanza.

(XLI) समधिकतरोच्छ्वासिना &c. *Sâro.* explains it as, "—अत्र मिथः समावस्थाकथनेन तयोः समदुःखितां प्रतिपादयति." ।

उष्णोच्छ्वासं &c. Here *Lakshmi.*, *Ra'm.*, *Hara.*, *Kalya'.*, Wilson and two other MSS. read,-"दीर्घोच्छ्वासम्." *Sa'ro.* also notices and explains this reading. It says,–"दीर्घोच्छ्वासमिति पाठे बहुनिश्वासम्." Prof. Isvara chandra prefers this reading and says,—" अयमेव पाठः समीचीनः । प्रतनु तनुना इत्यादावुभयोरेव पदयोः समानार्थप्रतिपादकतया उष्णोच्छ्वासं समधिकतरोच्छ्वासिनेत्यत्रापि तथात्वं युक्तं समधिकतरोच्छ्वासिनेत्यस्य दीर्घनिश्वासिनेत्यर्थः उष्णोच्छ्वासमित्यत्र दीर्घोच्छ्वासमिति पाठे उभयोः समानार्थप्रतिपादकता संभवति न त्वितरथा" ।

तैः &c. *Mallina'tha* explains this as,—"स्वसंवेद्यैः" 'known to himself'; because as *Sa'ro.* remarks "पूर्वानुभूतैः experienced by himself." *Sa'ro.* also interpretes it as,— "लोकप्रसिद्धैः those desires well known in the world," *Bha.*, *Ra'm.*, *Hara.*, *Kalya'.*, and Wilson read ते for तैः and Prof. Isvarachandra Vidya'sa'gar says,- " अयमेवपाठः साधीयान् तैरिति तच्छब्दस्यानुपयोगात् । युष्मच्छब्दप्रयोगाभावे त्वदीयमंगमित्यस्य बोधयितुमशक्यत्वाच्च. "

संकल्पैः &c. *Sa'ro.* and *Su.* explain this as, — " चुंबनदर्शनस्पर्शनादिव्यापारैः" &c.

वैरिणा &c. In connection with this *Mahima.* has the following note. He says,-"यः स्वप्रविज्ञानगतोऽप्यगोचरं चरंति नो यत्र गिरः कवेरपि । यत्रानुबध्नंति मनःप्रवृत्तयः सहेलयार्थः विधिनैव साध्यते । इति हेतुः कथं मम पुष्पानयनाधिकारे प्रमादः (See note on the first verse) कथं मम एतावान् विरहदुःखसंभवः । अत एवोक्तं हनुमन्नाटके । कुत्रायोध्या क्व रामो दशरथवचनाद्दण्डकारण्यमागात् । क्वासौ मारीचनामा कनकमयमृगः कुत्र सी-

तापहारः। सुग्रीवे रामसैत्री क्व जनकतनयान्वेषणे प्रेषितोऽहं। योऽर्थोऽसंभावनीयस्तमपि घटयते क्रूरकर्मा विधाता"।

One of the four Uria MSS. omits this verse.

(XLII) यदपि &c. तत् (वचनं) As *Mallina'tha* says is here understood. The sentence containing two relatives the corralative of one is expressed, that of the other is implied.

शब्दाख्येयं &c. *Sa'ro.* and *Mahima.* explain it as, —"प्रकटशब्दप्रतिपाद्यं न तु गोप्यं हस्तभ्रूसंज्ञादिवाच्यम्." *Mahim.*; शब्देन श्रोतृग्राह्येण आख्यायते कथ्यते यत्तत् प्रकटाख्यं न तु गोप्यं हस्तभ्रूसंज्ञादिवाच्यम्. *S'ro.*

मन्मुखेनेदमाह &c. *Mahim.* explains it as,—"आलिंगनं चुंबनं च महासुखरूपं भोगांगमुक्तम्। उक्तं च। न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये। स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः। नारीपीनपयोधरोरुयुगुलं स्वप्नेऽपि नालिंगितम्। मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम्। तथा चुंबनं। नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता। खड्गाग्रैः करिकुंभशत्रुदलनैर्नाकं न नीतं यशः। कान्ताकोमलपल्लवाधररसः पीतो न चंद्रोदये। तारुण्यं गतमेव निष्फलमहो शून्यालये दीपवत्"॥

किल ते यः &c. Prof. Isvarachandra Vidyáságara does not prefer the reading ते and gives the following reasons in support of his arguments. He says,—"अत्र ते इति पदस्य न कश्चिदुपयोगो लक्ष्यते। तदिति पदश्चाध्याहार्यम्। ईदृशश्चाध्याहारः कवेरशक्तिं द्योतयति। एकश्चोपयोगविरहितः प्रयोगः अपरश्चाशक्तिद्योतकोऽध्याहार इति दोषद्वयमापतति" । And suggests another reading for the same. He says,—"ते इत्यत्र तदिति पाठे तु दोषद्वयस्यैव परिहारः स्यात् तस्मात्। शब्दाख्येयं यदपि किल तद्यः सखीनां पुरस्तात्। इत्येवंरूप एव पाठः समीचीनतया प्रतिभाति."

Three MSS. in our possession actually read तत् for ते.

(XLIII) वक्त्रच्छायां शशिनि &c. In connection with this *Sa'ro.* has the following remarks,— "कान्तिमत्वादानन्दकत्वाच."

शिखिनां बर्हभारेषु केशान् &c. *Cf.* "अस्याः कचानां शिखिनश्च किं नु विधिं कलापौ विमतेरगाताम्। तेनायमेभिः किमपूजि पुष्पैरभर्त्सि दत्वा स किमर्धचन्द्रम्" । *Nai.* VII. 22.

"कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतं। पृषतीषु विलोलमीक्षितं

पवनाधूतलतासु विभ्रमाः ॥ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया । विरहे तव मे गुरुव्यथं हृदयं न त्ववलंबितुं क्षमाः । *R.* VIII. 59—60.

चण्डि &c. Here *Sa'ro., Val., Mahima., Lakshmi., Su., Bha.. Sana'., Kalya'.*, Wilson and six other MSS. read भीरु. *Val.*, has the following note on this.

He says,—"भीरु इत्यन्वर्थं नाम नारीणां संज्ञापूर्वको विधिरनित्य इति ह्रस्वगुणाभावः" ।

(XLIV). प्रणयकुपितां &c. *Cf.* "अपत्ये यत्तादृग्दुरितमभवत्तेन महता । विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता । पटुर्धारावाही नव इव चिरेणापि हि न मे । निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति" । *Uttara*—IV. 3. also *Cf.* "हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा । कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् । न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां । मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति" । *Vi.* II. 10.

न सहते &c. *Mahima.* explains it as,—"अहो आत्रयोर्दौर्भाग्यम् । शशिनि खलु कलंकः कंटकाः पद्मनाले । उदधिजलमपेयं पंडिते निर्धनत्वं । दयितजनवियोगो दुर्भगत्वं सुरूपे । धनवति कृपणत्वं रत्नदोषीकृतांगः" ।

कृतान्तः &c. In connection with this *Mahima.* has the following note. He says,—"अकरुणत्वमकारणविग्रहः । परधने परयोषिति च स्पृहा । सुजनबन्धुजनेष्वसहिष्णुता । प्रकृतिसिद्धमिदं हि दुरात्मनाम्" ।

(XLV). तरुकिसलयेषु &c. The tears shed by the local deities to express sympathy for Yaksha's helpless condition must really be the rain-drops falling on the shoots of trees. The reason why the tears are said to fall upon trees is, as *Mallina'tha* says, that their fall upon the ground is regarded a bad omen. The यक्ष awakens the sympathy of the sylvan deities or of the trees he haunts and makes them shed tears of compassion in the shape of gum or dew-drops, *Cf* "विलपन्निति कोसलाधिपः । करुणार्थग्रथितं प्रियां प्रति । अकरोत्पृथिवीरुहानपि । स्रुतशाखारसबाष्पदुर्दिनान्" । *R.* VIII. 69.

Mahima. also notices the reading अम्बुलेशाः ।

(XLVI). यदि किल &c. The word किल implies probability. यदि here denotes the same. By taking these words together

probability is intensified. *Cf.* " यदि किलेति पदद्वयमपि संभावनार्थं एकार्थपदद्वययोरुपादानं संभावनातिशयं ख्यापयति." *Sa'ro.*

गुणवति &c. *Mahima.* explains this as,–" नारीणां शीलानां गुणाः प्रशस्याः । यदुक्तं वरं । शृंगोत्तुंगाद्गुरुशिखरिणः क्वापि विषमे। पतित्वायं कायः कठिनदृशदन्तर्विदलितः । वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने । वरं वह्नौ पातस्तदपि न कृताः शीलविषमाः । वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्मेरुः स्वल्पशिलायते मृगपतेः संघः कुरङ्गायते । व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते यस्यांगेऽखिललोकवल्लभतरं शीलं समुन्मीलति" ।

किसलयपुटान &c. *Cf.*, "भिन्नपल्लवपुटो वनानिलः" । *R.* IX. 68.

तुषाराद्रिवाताः &c. *Mahima.* explains this as,—"हिमाचलस्य सुगन्धवातस्पर्शलोभात् । अहो दुःखभांडारसंसारविकारवारद्वारचेष्टाचरित्रं । यदुक्तं। आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं । व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते । दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते। पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्" ।

एभिस्तवेति &c. *Cf.* "वोढा कुरबकरजसां किसलयपुटभेदसीकरानुगतः । अनिमित्तामुत्कंठामपि जनयति मलयवातोऽयम्" । *Ma'lavi.* III. 9.

(XLVII). दुर्लभप्रार्थनं मे &c. *Cf.* "इदमसुलभवस्तुप्रार्थनादुर्निवारं । प्रथममपि मनो मे पंचबाणः क्षिणोति । किमुत मलयवातोन्मूलितापांडुपत्रैः । उपवनसहकारैर्दर्शितष्वंकुरेषु " । *Vi.* II. 6.

त्वद्वियोगेऽन्यथाभिः &c. *Mahima.* has the following note on this. He says, — संयोगविरहरहितानां च रात्रिः न सुखावहा नापि दुःखावहा भाति। यदुक्तं ।येषां वल्लभया सह क्षणमिव क्षिप्रं क्षपा क्षीयते । तेषां शीतकरः शशी विरहिणामुल्केव संतापकृत् । अस्माकं तु न वल्लभा न विरहस्तेनोभयाभावतो । राजा राजतु दर्पणाकृतिरसौ नोष्णो न वा शीतलः" ।

त्रियामा &c. The night, having three watches, *Praharās,* quarters. The last quarter of the night being reckoned as part of the next day or as क्षीरस्वामी states it in his commentary on Amara, which runs thus:—" आद्यन्तयोरर्धयोर्दिनव्यवहारात्"—त्रियामा. The first half of first quarter being reckoned a part of the last day, and the second half of the last quarter being reckoned as part of the next day. *Su.* also quotes the same with slight difference. He says,—"त्रियामा रात्रिः । आद्यन्तयोर्द्धयामयोर्दिनव्यवहारात्त्रियामेति क्षीरस्वामी".

(XLVIII). नत्वात्मानं &c. *Mallinátha* notices the reading नन्वात्मानं and takes it as a vocative particle. (O! auspicious one). *Sáro.* and *Mahima.* also notice this reading and say,—"नन्वात्मानमिति पाठे ननु अभिमुखीकरणे कोमलामंत्रणे वा.;" *Sáro.* "नन्वात्मानमित्यपि पाठः । ननु इति कोमलामंत्रणे." *Mahima.*

दुःखमेकान्ततो वा &c. *Cf.* "संयोगा विप्रयोगाश्च भवन्ति बहवो नृणाम्." *Kathá. X.* 5.

चक्रनेमिक्रमेण &c. Wilson cites a quotation from Plutarch containing a similar idea:—

"The wheel of Life is ever on the ground, While one side's up, the other's on the ground." *Cf.* "चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च." *Manu. Vallabha* cites the following here,—"सुखं च दुःखं च भयाभयं च लाभालाभौ मरणं जीवितं च । पर्यायशः सर्वमिदं स्पृशन्ति तस्माद्धीरो न प्रहृष्येन्न शोचेत्." *Mahima.* cites here the following:—"सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं सुखदुःखं मनुष्याणां चक्रवत्परिवर्तयेत्." And further on he says,—"इति हेतोस्त्वं कल्याणि कातरत्वं मा गच्छेः । वस्तुगत्या नीतिमार्गे सत्पुरुषाणां स्त्रीषु कापट्यमेव श्रेयस्करं पुरुषः स्त्रीवशो भवति इत्ययं कीतस्तुतौ (?) न्यायः । यदुक्तं । दाक्षिण्यं स्वजने दया परिजने शाठ्यं तथा दुर्जने । प्रीतिः साधुजने स्मयः खलजने विद्वज्जनेष्वार्जवं । शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता । ये चैवं पुरुषाः क्रियासु कुशलास्तेष्वेव लोकस्थितिः" ।

आत्मनैवावलम्बे &c. Here *Hara.*, Wilson and two other MSS. read आत्मना नावलंबे and explain it as,—"आत्मना स्वयमेव आत्मानं मनो नावलंबे । अपि तु धैर्यं प्रापयामि." *Hara.*

(XLIX). भुजगशयनादुत्थिते शार्ङ्गपाणौ &c. The day on which the period of curse is to terminate, is the eleventh of the first half of कार्तिक called प्रबोधिनी and periphrastically referred to here. Wilson says that the serpent couch is the great snake Ananta, upon which Vishnu (शेषे शेते शेषशायी), or, as he is here called, the Holder of the bow शार्ङ्ग, reclines, during four months, from the 11th of आषाढ to the 11th of कार्तिक, or from the 23rd of June to the 26th of October. The sleep of Vishnu, during the four months of the periodical rains in Hindusthan, seems to bear an emblematical relation to that season.' *Cf.* "अवश्यंभाविनो भावा भवन्ति महतामपि । नग्नत्वं नीलकण्ठस्य महाहि-

शयनं हरेः"। "जयति स भगवान् कृष्णः शेते यः शेषभोगशय्यायाम्। मध्येपयः पयोधेरपर इवांभोनिधिः कृष्णः"। *Veni.* I. 5.

लोचने मीलयित्वा &c. Lit. by shutting up the eyes; *i. e.* without succumbing to grief, hence with fortitude. *Mahima.* explains this as,—"कोऽर्थः यथा कश्चिन्निमीलितलोचनः सन् तिष्ठति तथा त्वमपि धैर्यमालंब्य सुखदुःखानुभावः शरीरेणैव भुज्येः। यदुक्तं। भवितव्यं यथा येन न तद्भवति चान्यथा। नीयते तेन मार्गेण स्वयं वा तत्र गच्छति। प्राप्तव्यमर्थं लभते मनुष्यः किं कारणं दैवमलंघनीयम्। तस्मान्न शोचामि न विस्मयो मे यदस्मदीयं न हि तत्परेषाम्"। "ना भवति यन्न भाव्यं। भवति च भाव्यं विनापि यत्नेन। करतलगतमपि नश्यति यस्य तु भवितव्यता नास्ति"। *Cf.* "कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ"। *Amarus'ataka.* 25.

विरहगणितं &c. Here *Pa'rsva'., Sa'ro., Val., Mahima., Lakshmi., Hara.,* Wilson and eight other MSS. read विरहगुणितं and explain it as,—"विरहेण गुणितं प्रवृद्धम्." *Su.*;"विरहगुणितं विरहेण वर्धितम्" *Hara.*; "विरहगुणितं वियोगाभ्यस्तं गुणकारेण संख्याविषयीकृतं। कोऽर्थः। अस्मिन्वर्षे यावत्संख्याकः स्वाभिलाषो नोपभुक्तोऽस्ति तमपि समस्तमेव एकदैवोपभोक्ष्यावहे." *Saro.*; "विरहे चित्ताभिप्रायविषयीकृतं तं तमिति अनेकप्रकारमात्मनो नोपभुक्तो विद्यते तत्सर्वमात्मनो भोगाभिलाषं एकदैवोपभोक्ष्यावहे." *Mahima.* But *Meghalata'., Kalya'.,* and two other MSS. read विरहजनितं and explain it as,—"विरहजनितं वियोगोपचितम्" &c. *Kalya'.* विरहगुणितं means '(desires) intensified by separation.' *Sa'ro.* notices this reading and says,—"विरहजनितमिति पाठे विरहे चित्ताभिप्रायेण विषयीकृतम्."

क्षपासु &c. *Mahima.* interpretes it as,—"अनेन दिने भोगो निषिद्धः। यदुक्तं। न टिट्टिभो गच्छति हंसलीलया। न वायसः कूजति कोकिलस्वरं। यवाः प्रकीर्णा न भवन्ति शालयः। तथैव नीचः प्रकृतिं न मुंचति"। And further on he says,—"अत एवाविचार्यकृत्यकरणादिदं फलं दुःखरूपं जातमेवास्ति। यतो महापुरुषैरुक्तम्। सगुणमपगुणं वा कुर्वता कार्यजातं। परिणतिरवधार्या यत्नतः पंडितेन। अतिरभसकृतानां कर्मणामाविपत्तेः। भवति हृदयदाही शैलतुल्यो विपाकः"।

(L). भूयश्चाह त्वमपि &c. Prof. Is'varachandra condemns the use of अपि in this reading in the following way. "अपिशब्दस्यात्र

न कश्चिदुपयोगो लक्ष्यते तस्मात् त्वमपि इत्यपिशब्दवान् पाठः प्रामादिक एव त्वमयि इति कवेरभिमतः पाठ इति प्रतिभाति । अयि इति यक्षस्य स्वपत्नीसंबोधनम्." *Pa'rsva.* reads "भूयश्चाह त्वमसि" &c. and *Bha.*, *Hara.*, Wilson and one MS. read "भूयश्चापि त्वमसि &c." and explain it as, "अपि एवं संभाव्यते पुनश्च शयने शय्यायां मम कंठलग्ना कंठासक्ता त्वं पुरा असि भविष्यसि पुराशब्दयोगे भविष्यति की । पूर्वं यथा त्वं मम कंठलग्ना आसीस्तथा पुनरपि कंठलग्ना भविष्यसि इत्यर्थः । आश्वासवचनमेतत् । पूर्ववृत्तं स्मारयन्नाह निद्रां गत्वेत्यादि." *Bha.*

(LI). अविश्वासिनी &c. Here Prof. Is'varachandra condemns the interpretation of *Mallina'tha* in the following way. He says,—"हे असितनयने कौलीनाल्लोकप्रवादादेतावता कालेन परासुर्नोचेदागच्छतीति जनप्रवादादित्यर्थः मयि विषये अविश्वासिनी मरणशंकिनी मा भूः। " *Malli.* "इयं व्याख्या न समीचीना प्रथमपादे अभिज्ञानदानात् कुशलिनं विदित्वेत्यनेनैव मरणशंकाया निवर्त्तनात् पुनर्द्वितीयपादे मरणशंकिनी मा भूरित्यभिधानमसंगतम् । तस्मात् —

हे असितनयने कौलीनात् असंशयमेतावता कालेन स्नेहविलोपो जातः नातःपरं स ते पतिस्त्वां स्मरिष्यसि इति लोकवादात् मयि अविश्वासिनी मा भूः अविश्वासं मा कार्षीः दीर्घकालविप्रकर्षान्मयि स्नेहनिवृत्तिशंका न कार्येत्यर्थः । इत्येवं व्याख्येयम्" ।

Bha., *Hara.*, and Wilson read, "विरहव्यापदस्ते ह्यभोग्या दृष्टे वस्तुनि &c," and explain it as,-"स्नेहान्प्रेमाणि किमपि अनिर्वचनीयस्वरूपात् आहुर्वदन्ति लोका इत्यर्थात्कीदृशान् स्नेहान् विरहे विच्छेदेऽपि विगता आपद् विपत्तिर्येषां तादृशान् सततं स्नेहपात्रस्य स्नेहानुस्मरणात् हि यस्मात् ते स्नेहाः अभोग्याः विरहे अभुज्यमानाः अत एव उपचितरसाः उपबृंहितरसाः सन्तः वस्तुनि पदार्थे स्नेहपात्रे दृष्टे सति प्रेमराशीभवन्ति स्नेहपुंजीभवन्ति प्रेमपात्रदर्शनेन तत्राधिक्यं व्रजन्तीत्यर्थः" । *Bha.*

स्नेहान् &c. स्नेह is defined in the commentary as the 'process of winning a person over;' but प्रेम is that which is 'incapable of enduring separation from the desired one'.

विरहे ध्वंसिनः &c. In connection with this *Sa'ro.* and *Mahima.* have the following remark,—"दुर्मन्त्रान्नृपतिर्विनश्यति यतिः संगात्सुतो लालनाद्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् । मैत्री चाप्रणयात्समृद्धिरनयात्स्नेहः प्रवासाश्रयात् स्त्री मद्यादनवेक्षणादपि कृषिस्त्यागात्प्रमादा-

द्धनम् " । and further on *Mahima.* and *Val.* say,—"अत्र स्नेहः प्रवासाश्रयादिति हृदयवल्लभविषये वियोगवशाद् गुणस्नेहः संपद्यत इत्यर्थः । उक्तं च । न हि भवति वियोगः स्नेहविच्छेदहेतुर्जगति गुणनिधीनां सज्जनानां कदाचित् । घनतिमिरनिरुद्धो दूरसंस्थोऽपि चन्द्रः किमु कुमुदवनानां प्रेमभंगं करोति । इत्येवं वियोगे स्नेहाधिक्यं पुनश्च । स्मर्तव्योऽहं त्वया मित्र न स्मरिष्याम्यहं तव । स्मरणं चेतसो धर्मस्तच्चेतो भवता हृतम् । इतिहेतोर्वियोगे वल्लभोऽत्यन्तरागस्थानं भवति संयोगे तु स्नेहकापट्यं न भवति । तव प्रेमसंभारो जनप्रसिद्धो भवति । यथा । इन्दुर्यत्र न निंद्यते न मधुरं दूतीवचः श्रूयते । नोच्छ्वासा हृदयं दहन्ति शिशिरा नापीति कार्श्यं वपुः । स्वाधीनामनुकूलिनीं निजवधूमालिंग्य यत्सुप्यते । तत्किं प्रेम गृहाश्रमव्रतमिदं कष्टं समाचर्यते."

(LII). त्रिनयनवृषोत्खातकूटात् &c. *Cf.* "वप्रक्रीडापरिणतगजप्रेक्षणीयं" । *Megh.* I. 2. also, "शोभांशुभ्रत्रिनयनवृषोत्खातपंकोपमेयाम्" । *Megh.* I. 56 alse, निःशेषविक्षालितधातुनापि । वप्रक्रियामृक्षवतस्तटेषु । नीलोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन " । *R. V.* 44.

(LIII). धीरतां &c. *Mallinâtha* takes this word to mean गंभीरत्वं which must mean 'nobility of heart,' but it may more naturally mean 'gravity as indicated by silence and hence silence itself.'

प्रत्यादेशान्न &c. The interpretation of प्रत्यादेश given by *Mallinâtha* is here rather laboured since the word is never found used in this sense anywhere else. The line may be interpreted by preserving the natural sense of प्रत्यादेश as follows:— I do not think your gravity (*i. e.* silence) to proceed from the rejection (of my suit).

On the reading "प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि," Prof. Isvarachandra Vidyáságara remarks:- " लिपिकरप्रमादवशादापतितं पाठवैकल्यमनुद्भाव्यश्लोकपादस्यास्य व्याख्यातत्वान्मल्लिनाथादीनां व्याख्यानादर्थग्रहस्तात्पर्यावगमो वा नोपपद्यते यथा"—

"प्रत्यादेशात्करिष्यामीति प्रतिवचनात् ।"उक्तिराभाषणं वाक्यमादेशो वचनं वचः"इति शब्दार्णवे । भवतस्तव धीरतां गंभीरत्वं न तर्कयामि न समर्थये खलु । *Malli.*

"न प्रत्यादेशादनिराकरणान्न करिष्यामीत्यकथनाद्धेतोर्भवतो धीरतामवाचालत्वं तर्कयामि" ।*Hara.*

"प्रत्यादेशान्निःशब्दोऽपीति वक्ष्यमाणत्वेन प्रत्युत्तरस्य निराकरणाद्भवतो धीरतां धैर्यं न खलु तर्कयामि उत्प्रेक्षे अपि तु तर्कयाम्येव खलु निषेधे । द्वौ निषेधौ प्रकृतमर्थमवगमयत इति वृद्धाः" ।*Bha:*

कल्याणमल्लस्तु (also *Sa'ro:, Mahima.*, *Su.*, and four other MSS: read प्रत्याख्यातुं and explain it as; –"प्रत्याख्यातुं निराकर्तुं न तर्कयामि न संभावयामि न विचारयामीति यावत्"&c.; *Val* reads प्रत्यादेष्टुं and explains it as ;प्रत्यादेष्टुं प्रत्याख्यातुं निराकर्तुमिति यावत्.) प्रत्यादेशान्नेति पाठमनादृत्य पाठान्तरं कल्पयित्वा व्याख्यातवान्। यथा।"प्रत्याख्यातुं न खलु भवतो धीरतां तर्कयामि ।" भवतो धीरतां धीरत्वं प्रत्याख्यातुं निराकर्तुं न तर्कयामि ।

एतदप्यकिंचित्करं तर्कणप्रत्याख्यानयोरेककर्तृकतापातस्य दुर्निवारत्वात् तर्कणं यक्षनिष्ठं प्रत्याख्यानं मेघनिष्ठमित्यस्यानपलपनीयत्वात् ।

सनातनरामनाथाभ्यां तु श्लोकोऽयं न व्याख्यातः ।

वस्तुतस्तु प्रत्यादेशान्न खल्वित्यत्र तालव्यशकारात्परमाकारापातः प्रामादिकः तत्परित्यागे तु सर्वमनाकुलं स्यात् । यथा—

"प्रत्यादेशन्न खलु भवतो धीरतां तर्कयामि" । भवतो धीरतां गंभीरत्वं तूष्णींभावमिति यावत् प्रत्यादेशं प्रत्याख्यानं न तर्कयामि न समर्थये खलु तवायं तूष्णींभावो न प्रत्यादेशद्योतकः इति भावः ।

Mahima., *Su:* and two other MSS: read अधीरतां and explain it as,– " अधीरतां असामर्थ्यम् &c:"

प्रत्युक्तम् &c: *Val.* explains this as, — " महतां अर्थिषु अभिमतार्थसंपादनमेव प्रत्युत्तरं महान्तो हि कर्मणा ब्रुवंति न वचसा. " *Su:* explains it as, — " यथा । नीची वेदाति न कुरुते । न वदति साधुः करोत्येव । इति भावः ।" Here *Mahimasinhagani* remarks,— प्रत्युत्तरं किं । मुखेन प्रत्युत्तरकरणेन इति सत्पुरुषाणां गोत्रव्रतं । यदुक्तं । किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत् । किं वा नास्ति परिश्रमो दिनपतेरास्ते न यो निश्चलः । किं चांगीकृतमुत्सृजन्न मनसा श्लाघ्यो जनो लज्जते। निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् । एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये। सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये । तेऽमी मानवराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये । ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे । केचिद् याचकयाच्यमानविभवाः कुर्वन्त्यधोवक्त्रतां । केचिन्नोक्तिपरास्तथा तदपरे दृष्ट्वापि यान्त्यन्यतः। त्वं केनापि न याचितो न च रवं श्रुत्वा त्वयाकर्णिताः। यद्वर्षन्नसि सर्वतोऽपि हि तथा त्वहानतात्यद्भुता । तावत्प्रीतिमती प्रिया प्रियतमे माता हिताकांक्षिणी । स्यात्तावत्तनुजे नयस्थितिमनास्तावत्क्षितीशा इमे। मैत्र्यं तावदकृत्रिमं स्फुरति मी स्निग्धेऽपि सप्रत्ययं ।यावत्त्वं जलद प्रवर्षसि पयः-

पूरं प्रसन्नात्मना । हे मेघ त्वयि प्रत्यक्षं वर्षति यदि कस्यापि मनोरथप्राप्तिर्न स्यात्तर्हि तस्यैव दौर्भाग्यम् । यथा । बीजैरंकुरितं लताभिरुदितं वल्लीभिरुज्जृंभितं । कन्दैः कन्दलितं जनैःप्रमुदितं धाराधरे वर्षति । भ्रातश्चातक पातकं किमपिते सम्यङ्न जानीमहे । येनास्मिन्न पतन्ति चंचुपुटके द्वित्राः पयोबिन्दवः"

ईप्सितार्थक्रियैव &c. *Cf.* "नाभ्यर्थितोऽपि जलदः सलिलं ददाति । सन्तः स्वयं परहितेषु कृताभियोगाः" | *Niti. S.* 84. "तृषितश्चातकपक्षी मुदिरमुदीक्षत आकुलितो यावत् । तावज्जलदवितीर्णं निपतितमंभो वदने तस्य" *Pradyumna Vijaya.* I. "चातकस्त्रिचतुरान् पयःकणान् याचते जलधरं पिपासितः । सोऽपि पूरयति भूयसांभसा चित्रमत्र महतामुदारता" । *Purva Chàtakàshtaka.* 2. "शमितचातकार्त्तस्वराः" । *Si.* IV. 24. "मां तावदुद्धर शुचो दयिताप्रवृत्त्या । स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव" *Vi.* IV. 15.

(LIV). प्रियमनुचितं प्रार्थनादात्मनः &c. Here *Bha.*, *Hara.*, Wilson and two other MSS. read, "प्रियसमुचितं प्रार्थनं चेतसः" and explain it as, "प्रियसमुचितं प्रणयियोग्यम्" । *Bha.*; *Mahimasinhagani*, Prof. Isvarachandra, Pandit Pra'nana'th, *Lakshmi.*, and a MS. read, "प्रियमनुचितप्रार्थना वर्तिनः" and explain it as,— "प्रार्थनायां वर्तितुं शीलं यस्येति प्रार्थनावर्ती । अनुचितस्य अयोग्यस्य प्रार्थनावर्ती अनुचितप्रार्थनावर्ती तस्य अनुचितप्रार्थनावर्तिनः । यदुक्तं पूर्वं । अनुचितकर्मारंभः स्वजनविरोधो बलीयसि स्पर्धा । कटके च प्राघुणको (प्राघुणक or प्राघुणिक *m.*, a visitor, a spy) मस्तकशूलानि चत्वारि" ॥ *Mahima.*; *Sana'tana* and two other MSS. read, "प्रियसमुचितं प्रार्थनाचेतसः" and, explain it as, "प्रार्थनाचेतसः अभ्यर्थनायसक्तहृदयस्य" । *Sana'.*; *Val.* *Sa'ro.*, *Su.*, *Kalya'.*, and seven other MSS. read, "प्रियमनुचितप्रार्थनावर्त्मनः" and explain it as,—अनुचितप्रार्थनावर्त्मनोऽननुरूपयाञ्चामार्गस्य" ! *Val.*; "अनुचितः प्रार्थनावर्त्म यस्य असौ, अनुचितप्रार्थनावर्त्मा । तस्य दिव्यानुभावप्राप्तसमस्तवांच्छितवस्तुत्वात् । अयोग्ययाञ्चामार्गस्य" ॥ *Saro.*; "अनुचितं अयोग्यं जलदस्य अचेतनत्वात् पूर्वयाचनाकरणाभावाद्वा प्रार्थनाया वर्त्म मार्गो यस्यासौअनुचितप्रार्थनावर्त्म तस्य अनुचितप्रार्थनावर्त्मनः" । *Su.* &c.

क्षणमपि च ते &c. *Haragovinda* and three other MSS. read here "क्वचिदपि च ते" and explain it as,— "क्वचिदपि काले स्थाने च" ॥ *Hara.* &c.

शुभं भूयादध्येतुरध्यापकस्य च

APPENDIX A.

Verses considered to be spurious and not commented upon by Mallinátha.

पूर्वमेघम्.

After the 18th:—

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूटस्तुंगेन त्वां जलद शिरसा वक्ष्यति श्लाघ्यमानः । आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु ॥ १ ॥

उत्तरमेघम्.

After the 27th:—

स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्तितन्वी
मेकप्रख्या भवति हि जगत्यंगनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥२॥
अन्वेष्टव्यामवनिशयने सन्निकीर्णैकपार्श्वां
तत्पर्यंकप्रगलितलवैश्छिन्नहारैरिवास्त्रैः ।
भूयोभूयः कठिनविषमां सारयन्तीं कपोलात्
आमोक्तव्यामयमितनखेनैकवेणीं करेण ॥३॥

After the 44th:—

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पंचबाणः क्षिणोति ।
घर्मान्तेऽस्मिन्न् विगणय कथं वासराणि व्रजेयुः
दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥४॥

After the 54th:—

इत्याख्याते सुरपतिसखः शैलकुल्यापुरीषु
स्थित्वा स्थित्वा धनपतिपुरीं वासरैः कैश्चिदाप ।
मत्वागारं कनकरुचिरं लक्षणैः पूर्वमुक्तैः
तस्योत्संगे क्षितितलगतां तां च दीनां ददर्श ॥ ५ ॥
तस्माद्द्रर्निगदितपथः शीघ्रमेत्यालकायां
यक्षागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा ।
यत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्नात्
तद्गेहिन्याः सकलमवदत् कामरूपी पयोदः ॥ ६ ॥

तं संदेशं जलधरवरो दिव्यवाचाचचक्षे
प्राणांस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदंतं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥ ७ ॥
श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥ ८ ॥
इत्थंभूतं सुचरितपदं मेघदूताभिधानं
कामक्रीडाविरहितजने विप्रयुक्ते विनोदः ।
मेघस्यास्मिन्नतिनिपुणता बुद्धिभावः कवीनां
नत्वार्यायाश्चरणकमलं कालिदासश्चकार ॥ ९ ॥

पूर्वमेघम्

Various readings of the spurious verses.

1. M. अध्वश्रान्तं for अध्वक्लान्तं K1. K2. M. श्रमपरिगतं for प्रतिमुखगतं. W. M. C1. C2. चित्रकूटः for आम्रकूटः W. C1. M. श्लाघमानं K2. M. श्लाघ्यमानं for श्लाघ्यमानः. M. सत्कारार्द्रः for सद्भावार्द्रः G1. R. M. धारयिष्यत्यवश्यं for वक्ष्यति श्लाघ्यमानः.

उत्तरमेघम्

2. C1. M. क्षणमपि for कथमपि. G2. M. मुंचन्ति for मोक्ष्यन्ति. G2. M. शून्यां for तन्वीम्. G2. M. एकप्रेक्ष्या for एकप्रेक्ष्या. M. G2. च for हि. G2. M. अद्भुतानां for अंगनानां.

3. G1. M. °पर्यन्त for °पर्यंक° M. °नवैः for °लवैः M. सादयन्तीं for नाशयंतीं.

4. G2. K1. R. M. क्षणोति for क्षिणोति. M. मे for अस्मिन् G1. G2. K1. R. M. °प्रविरलं° for °प्रवितत.° K2. omits this.

6. M. निगदितुमथो, R. M. निगदितवचः, K2. M. निगदितकथः for निगदितपथः. M. एव for एत्य. M. विकसितनिभं, M. विगलितविभुं, K1. R. M. विगलितविभं, K2. M. विगलितभुवं for विगलितनिभं. M. K1. दिष्टचिह्नैः. K2. R. M. दृष्टिचिह्नैः for दृष्टचिह्नैः.

7. M. C1. तव for तं. K1. K2. R. M. आचचक्षे for चचक्षे. M. परहितरतः for जनहितरतः. C1. M. अविरतफला for अभिमतफला. C1. M. अभ्युन्नतेषु, M. ह्युन्नतेषु, for ह्युत्तमेषु.

8. M. शापस्यान्ते for शापस्यान्तं. M. निगदितशुचौ for विगलितशुचौ. M. तुष्टचित्ता for हृष्टचित्तौ. K1. M. इष्टान्भोगान् for भोगानिष्टान्. M. C1. K2. अभिमतसुखान्, M. अभिरतसुखं, G2. M. अभिमतसुखं for अभिरतसुखम्.

9. M. सुलल्लितपदं, M. सुचरितमिदं, M. R. सुचरितमतं, K1. सुरचितपदं for सुचरितपदं. M. मेघदूतं च नाम्ना for मेघदूताभिधानं. M. कामक्रीडाविरहजनिते for कामक्रीडाविरहितजने. M. R. K1. विप्रयोगे for विप्रयुक्ते. R. M. विनोदं, M. विनोदि for विनोदः. R. K1. M. मेघश्चास्मिन्, M. कामश्चास्मिन् for मेघस्यास्मिन्. R. K1. M. बुद्धिभावे for बुद्धिभावः. R. M. चरणयुगलं for चरणकमलम्.

Appendix B.

Names of important places, rivers, mountains &c. as given by *Kálidâsa* in the order of verses of the *Meghaduta*:—

Serial No.	Names:—		Page.
1	रामगिरी.	See Note on page	2.
2	अलका.	do.	10.
3	मानस.	do.	15.
4	कैलास.	do.	15.
5	माल.	do.	21.
6	आम्रकूट.	do.	22.
7	रेवा.	do.	23.
8	विन्ध्य.	do.	24.
9	दशार्ण.	do.	28.
10	विदिशा.	do.	29.
11	वेत्रवती.	do.	29.
12	नीचैर्गिरि.	do.	29.
13	वननदी.	do.	30.
14	उज्जयिनी.	do.	30.
15	निर्विन्ध्या.	do.	31.
16	सिन्धु.	do.	32.
17	अवन्ती.	do.	33.
18	विशाला.	do.	35.
19	शिप्रा.	do.	35.
20	गन्धवती.	do.	40.
21	गंभीरा.	do.	47.

18. Bhatti Kavya with Sanscrit Commentaries, *Price Rs.* 3.

19. Apte's English-Sanscrit Dictionary, *Price Rs.* 4.

20. Bhartrihari's Niti and Vairagya Satakas with English Notes by the Honble. Justice Telang, *Price Rs.* 1.

21. Dasakumar Charita of Dandin with English Notes by Dr. Buhler, in 2 parts, *Price of each Part,* 14 *Annas.*

22. Subhashit Ratna Bhandagaram with Notes, *Price Rs.*3–8.

23. Sisupalvadh Magh with Commentaries, *Price Rs.* 3.

24. Sidhant Kaumodi, *Price Rs.* 2.

25. Kiratarjuniya of Bharvi with Commentaries, *Price Rs.* 2.

26. Mahavir Charita of Bhavbhuti with Commentaries, *Rs.* 1–8.

27. Dashkumar Charit with Commentaries, *Price. Rs.* 1-8.

28. Prasanna Raghav Natuck of Jaydev, *Price* 12 Annas.

29. Kumar Sambhav with Sans. Commentaries, *Price Rs.* 2.

30. Raghuvansha with Commentaries, *Price Re.* 1.

31. Rutusanhar of Kalidas with English Notes *Price* 6 *Ans.*

32. Ratnávali of ShriHarsha with English Notes, *Price* 8 *Ans.*

33. Malvikagnimitra of Kalidas with English Notes by S. P. Pandit, M. A. *Price Rs.* 2-2.

34. Tarksangraha with English Translation, *Price* 6 *Ans.*

35. Hitopdesha with English Notes, *Price Rs.* 1.

36. Vikramorvashi of Kalidas with Commentary, *Price* 1

37. Valmiki Ramayana with Full Commentaries, *Price Rs.* 1.

38. Harivansa with Full Sanscrit Commentaries, *Price Rs.* 6.

39. Bhagwat with the Commentaries of Shridhur, *Price Rs.* 10.

40. Bhagwat with Commentaries of Vijaydhawaj, *Price Rs.* 10.

41. Ganesh Purána, *Price Rs.* 6.

42. Krishna Yajurveda Taitareya Brahmana, *Price Rs.* 2–8.

43. Vedanta Sutra Bhashya in 3 parts, *Price Rs.* 10.

44. Vishnu Puran with Commentaries, *Rs.* 3.

45. Sundar Kand of Valmiki Ramayan, *Re.* 1.

46. Subhashitavali with Notes by Dr. Peterson, *Rs.* 5.

47. Kumar Sambhav with Commentaries, English Notes and English Translation, Cantos 1—VI. by Deshpande, B. A. *Rs.* 1-10.

48. Bhartri Hari's Three Shataka's with Commentaries, 12 Annas.

49. Udar Raghav with Commentaries, *Rs.* 1–8.

Gopal Narayen & Co; Booksellers, Bombay.

" I have already hinted at the wonderful balance in Kalidasa's character, by virtue of which he found himself equally at home in a palace and in a wilderness. I know not with whom to compare him in this; even Shakespeare, for all his magical insight into natural beauty, is primarily a poet of the human heart. That can hardly be said of Kalidasa; nor can it be said that he is primarily a poet of natural beauty. The characters unite in him, it might almost be said chemically. The matter which I am clumsily endeavouring to make plain is beautifully epitomised in "The Cloud Messenger". The former half is a description of external nature, yet interwoven with human feeling; The latter half is a picture of a human heart, yet the picture is framed in natural beauty. So exquisitely is the thing done that none can say which half is superior.

Arthur. W. Ryder
University of California
America.